श्रीमते नारायणाय नमः श्रीमते रामानुजाय नमः

Asian
Sans

BL 1141
.8
.V55
2007
Copy 1

CBN BRNCH
Asian

श्रीपाञ्चरात्रागमान्तर्गत

विष्णुतिलक संहिता

जीयर् एड्युकेषनल् ट्रस्ट्

श्रीमते नारायणाय नमः

श्रीमत्पांचरात्रे खगेश्वर संहितायां

श्री विष्णुतिलक संहिता

श्रीश्रीश्री त्रिदंडि चिन्न श्रीमन्नारायण रामानुज जीयर्स्वामिपादानां
मंगळाशासनपूर्वकम्

जीयर् एडुकेषनल् ट्रस्ट्
सीतानगरम्, गुंटूर् जिल्ला- ५२२ ५०१

श्री विष्णुतिलक संहिता

©जीयर् एडुचकेषनल् ट्रस्ट्

श्रीश्रीश्री त्रिदंडि
श्रीमन्नारायण रामानुज जीयर्स्वामिपादानं
तिरुनक्षत्र महोत्सवे आविष्कृतम्
नवंबर्-२००७

मुद्रणम्- २००७ *2007*

प्राप्यस्थानम्-

जीयर् एडुचकेषनल् ट्रस्ट्
सीतानगरम्, गुंटूर् जिल्ला-
५२२ ५०१
फोन्- ०८६६ २७२९२९,
२७२३५३

श्रीरामानुजवाणी
११-४९-१३६
शिवालयं वीधि,
विजयवाड-१
फोन्- ०८६६ २४२९८२०

जीयर् एडुचकेषनल् ट्रस्ट्
गगन्महल् कालनी,
दोमल्गूड, हैदराबाद्.
फोन्- ०४० २३२२४४२६

LIBRARY OF CONGRESS New Delhi Field Office
30 AUG 2013
EXCHANGE

Library of Congress
2013 406594

DTP : परिशोधनालयम्

मुद्रणम् : श्रीमान् प्रिन्टर्स् प्रेसेसर्स्, सीतानगरम्.

श्रीपाञ्चरात्रवैभवम्- श्रीविष्णुतिलकसंहिता

शास्त्ररत्नाकरः डा- समुद्राल वेंकटरंगरामानुजाचार्यः

विश्रान्तप्रधानाचार्यः

अध्यक्षः- श्रीणमदुभयवेदान्ताचार्यपीठम्-श्रीरङ्गम्

विश्ववाङ्मये भारतीय वैदिकवाङ्मयस्य बहुल प्राशस्त्यमस्ति। वेदोपबृंहकपुराणेतिहासाभ्यां साकम् आगमसारस्वतमपि विशेषख्यापनीयं महीयते। वेदप्रामाण्यावलम्बिभिः निर्मत्सरैर्विद्वद्भिः वेदवदेव आगमानाममपि प्रामण्यमुररीकरणीयम्।

शैववैष्णवशाक्ते यादि भेदभिन्नानामप्यागमानां मध्ये वेदाविरुद्धार्थप्रतिपादकानामेव प्रमाण्यं सुस्थमिति वक्तव्यम्। अतएव श्रीमद्भिर्भगवद्रामानुजैः पाशुपतागमप्रस्तावनासन्दर्भे स्वीयसूत्रभाष्ये वेदाविरुद्धाचारविचारवत्त्वेनैव यस्य कस्याप्यागमस्य प्रामण्यमङ्गी करणीयमिति, वेदविद्धेत्वंशे प्रामाण्यं दूरापास्तमेवेति च समाविष्कृतम्।

पाशुपताद्यागमानामपि वेदाविरूद्धांशप्रतिपादनकृतं प्रामाण्यं न परिहीयत इत्यपि विस्पष्टमुक्तम्। श्रीवैष्णवसम्मतौ द्वावागमप्रकारौ स्तः। श्रीपाञ्चरात्रश्रीवैखानसनाम्ना। उभयोरपि वेदावलम्बित्वेन वेदपुरुषसमाविष्कृतत्वेन च सममेव प्रामाण्यं महीयते। अत्रापि केचित् वैदिकत्वावैदिकत्वादिगगनकुसुमायमानां प्रथां प्रचार्य, श्रीपाञ्चरात्रस्यावैदिकत्वं स्वकपोलकल्पितं मात्सर्यग्रस्तबुद्धितया, चपलचित्ताः, लोके वैषम्यमाशी विषसदृक्षम् उद्वमन्ति। श्रीमन्नारायणमुखकमलविनिर्गतस्य पाञ्चरात्रस्य, श्रीमन्नारायणानुग्रहलब्धविज्ञानमुनिनिकरसमाविष्कृतस्य वैखानसस्य च वस्तुस्वभावतारतम्ये असत्यपि, वस्तुतोऽसदेवानुष्ठान वैरुध्यमापादयन्तः परदूषणात्मभूषणादिव्यर्थक्रियाकलापप्रलापैः कालं यापयन्तः साधारणलोकबुद्धिं भ्रंशयन्ति। तदेतत् सर्वथाविगर्हणीयं तत्त्वबुभुत्सुभिः आगमप्रियैः वैष्णवैः।

यदि कश्चिदवैष्णवो वैष्णवागमं सन्दूषयति तर्हि तत्, तदज्ञानविज्जृम्भितमिति तूष्णीं तिष्ठेम, यदि पुनरागगमतत्त्वज्ञा वैष्णवा एव समानोदरयोः द्वयोरागमयोर्मध्ये एकं प्रमाणकोटिमधिरोप्य अन्यमधो निपातयति तर्हि तस्य मात्सर्यविजृम्भणं बुद्धिवैकट्यं च कथं वा विज्ञाः न परिगणयन्ति?

द्वयोः कलहे तृतीयस्य लाभ इति लोकोक्तिमन्वर्थयन्ति एतादृशा वैष्णवप्रबुद्धाः। आस्तां तावदियं चिरप्ररूढा निर्मूला कुकथादुःस्थितिप्रस्तुतिः- कालक्षेपमात्रफला निष्कला च।

श्रीवैष्णवागमौ द्वावपि प्रमाणभूतावेव भगवन्नारायणार्चाविधानकथने। वैदिकोपासनाविधानप्रतिपादनमेव उभयोरपि परमं लक्ष्यम्। उभयत्रापि क्रियाकलापेषु वैदिकमन्त्र विनियोगाविशेषात्। यदि अदुर्मांसलितं तिमिराद्य दूषितं चक्षुरुन्मील्य परिलोकयामः, तर्हि, उभयत्रापि श्रीमतो नारायणस्यैव बहुमुखानुभाव्यं वैभवं दर्शनपदवीमवतरति। अत्रागमयोः वैविध्यमेव नकिञ्चिद्वैरुध्यम्। एतदागमद्वितयमध्यकल्पितं वैमत्यं दूरीकर्तुमेव श्रीमद्यामुन, श्रीमद्वेदान्तदेशिकप्रभृतिभिराचार्यैः आगमप्रामाण्यपाञ्चरात्ररक्षाप्रभृति ग्रन्थनिर्माणं व्यधायि।

श्रीमन्नारायणात् विखनसाभिख्यात चतुर्मुखब्रह्मणः, तद्द्वारा वैखानसमुनेः तद्द्वारा भृग्वत्रिमरीचिकश्यपमुखेन लोके वैखानसनाम्ना भगवदाराधनाप्रकारः प्रादुरभवत् यथा,

तथैव साक्षान्नारायणादेव पञ्चायुधांशसम्भूत- शाण्डिल्यौपगायन मौञ्जायन कौशिकभरद्वाजनामानो मुनयः भगवदुपासनाप्रकारमेवोपलभ्य संहिताद्वारा श्रीपाञ्चरात्रानाम्ना समाविष्कृतवन्त इति पुराणादिप्रसिद्धि रवगन्तव्या। भारतादिषु आगमद्वयप्रशंसैव परिलक्ष्यते, नत्वेकतरप्रंशंसनेन इतरदूषणप्रक्रियागन्धोऽपि।

अनन्तरकाले कुक्षिंभरिभिः तत्तद्देवतायतनस्थान समाक्रमाणप्रलुब्धबुद्धिभिः भ्रष्टमतिभिरेव परस्परदूषणकोलाहलो हालाहलायितः प्रसारित इति वस्तुतत्वं विजानन्त्येव विमत्सराः आगमद्वयप्रेमिणो मादृशाः।

इदानीमियं दुःस्थितिः समधिका जायत इति महत्खेदास्पदमेतत्। एतादृशदुर्दुरूढैः क्रियमाणपरस्परागमसन्दूषणविषविवशं वराकम् आगमपुरुषमात्मोद्धरणाय केवलं प्रार्थयामहे अञ्जलिबन्धेन- हे भगवन्! परिरक्षात्मानमात्मनैवेति।

प्रस्तुतं किञ्चित्।

इदानीं श्रीपाञ्चरात्रान्तर्गतं श्री विष्णुतिलकनामकं ग्रन्थं प्रकाशयामः विद्वदुपयोगाय। इयं हि संहिता समग्रा सर्वाङ्गमनोहरा च वोभवीति। सर्वस्यापि पञ्चरात्रागमप्रमेयस्यात्र एकत्रैव विशेषसाक्षात्करणीयता अस्याः सर्वस्पृहणीयतां पिशुनयति। अध्यायाष्टकनिबद्धाचेयं संहिता। त्रिसहस्राधिका एव श्लोकालक्ष्यन्ते अत्र।

उपनिषत्सु शाण्डिल्यस्य तत्त्वबुभुत्सापरा विचिकित्सा अत्र. प्रथमाध्याये ब्रह्मशाण्डिल्यसंवादरूपेण समुपनिबद्धा परिलक्ष्यते। पाञ्चरात्रसंहितानामसङख्याकत्वेन तत्प्रतिपाद्यविज्ञानस्य दुर्ज्ञेयत्वेन च, साङ्गवेदोपनिषत्सु निष्ठामलभमानः शाण्डिल्यः पाञ्चरात्रविज्ञान सारानुग्रहाय चतुर्मुखं सम्प्रार्थ्य, 'वक्ष्येतत्पाश्चरात्राख्यं यन्मां त्वं परिपृच्छसि' इति उक्तप्रकारेण शास्त्रारम्भं कृतवानिति आवेद्यते अत्र।

इदञ्च विज्ञानं मुक्तिसाधकं भवति। मायाविमोहितानि विविधानि शास्त्राणि अधिकृत्य लोका विभ्रष्टविवेकाः पाञ्चरात्रनिन्दां विदधतीति, श्रीहरेराश्रयणेन केवलं मुक्तिपथगामिनो भवेयुरिति च विभाव्य, ब्रह्मा शास्त्रमिदमवतारितवान्। एतच्छास्त्रप्राक्तविधानानुष्ठानाय पञ्चसंस्कारपरा एवअर्हन्तीति, पञ्चसंस्कारप्रक्रियां प्रशंसतीदं शास्त्रम्-

पञ्चसंस्कार दीक्षैका देवदेव प्रियङ्करी।

अनया दीक्षितो यस्तु स सर्वत्राचरेत् क्रियाम्।।

इति। द्वितीयाध्यायः, ज्ञाननिर्वचनेन प्रारभ्यते। ब्रह्मज्ञानमेव ज्ञानमिति एतत्संहितानिष्कर्षः।

'ज्ञायते येन तद्ब्रह्म तद्ज्ञानमिति कथ्यते' इति चतुर्व्यूहनिरूपण पुरस्सरं भगवत्सृष्टिः विस्तारतया उपवर्णिता अत्र।

'जीवो ब्रह्म जगच्चेति त्रैविध्यमिह वर्तते' इति वचनेन श्रीवैष्णवप्रतितन्त्रभूत तत्त्वत्रय सिद्धान्तं समुधुष्यते अत्र संहितया। 'सदेव सोम्येदमग्रआसी' दित्युक्ता छान्दोग्यप्रक्रिया अत्र विस्पष्टमुक्ता।

श्रीवैष्णवदर्शनसिद्धान्तसारं सङ्ग्रहमनोहरतया कथं वा इयं संहिता समाविष्करोतीति विदाङ्कुर्वन्तु सुधियः-

यथा-

ब्रह्म जीवो जगच्चेति त्रैविध्यमिह वर्तते।

तेजोराशिर्भवेद् ब्रह्म भूतराशिरिदं जगत्।।

ज्ञानराशिर्भवेज्जीव उत्पत्तिलयवर्जितः।

ब्रह्मणोऽस्य जगत्कर्तुः द्रव्यमासीदिदं जगत्।।

मणिरत्नप्रभावेण (मणिरत्नप्रभेवेदं) विकसत्यखिलं जगत्।।

यदा जीवविियोगःस्याद् तदा मौनमिदं जगत्।

जगदस्मिन् कृशे विश्वं भजेत परमाणुताम्।। इत्यादि।

ह्यासमेव समासाद्य, सोऽणुः ब्रह्मणि लीयते इति च। अत्र संहितायां यस्सिद्धान्तःदर्शितः स एव श्रीमद्रामानुजदर्शनसिद्धान्तो भवति।

चतुर्मुखसृष्टिमुपवर्ण्य तत्त्वानां नित्यत्वं भूगोलादिवर्णनं च विधाय द्वितीयाध्यायः परिसमाप्तिं गच्छति।

तृतीयाध्यायः ऋषिभिः वर्णाश्रमादिविषयकतया कृतं प्रश्नं प्रतिसमाधातुं वर्णाश्रमधर्माणां विशकलितनिरूपणं विधाय, आगममात्रनिरूपणीयां पञ्चकालप्रक्रियां संहिता उपस्थापयति। स्त्रीणामपि प्रत्येकशोऽनुष्ठेयां षट्कालप्रक्रियाम् अत्र विशेषतो निरूपयति संहितेति विज्ञेयम्।

चतुर्थाध्यायः योगप्रक्रियां विविधमन्त्रानुष्ठानप्रकारांश्च आविष्करोति। अत्र मन्त्रदीक्षाप्रकाराः, प्रणवादारभ्य आयुधपूजामन्त्रपर्यन्तान् विविधान् ध्यानप्रकारान् संहिता उपपादयति।

धनाकर्षणादि लौकिक प्रयोजनसाधकप्रकारोपवर्णनं यद्यप्यागमानां साधारणमेव लक्षणम्, अतएव लक्ष्मीनारायणसंहितायामिवात्रापि सा प्रक्रिया निरूपिता वितत्य इत्यवधेयम्।

वैदिककर्मानुगुणहोमकुण्डानां होमद्रव्याणां च वर्णनेन साकं शान्तिपौष्टिकक्रियाकलापोऽपि अत्रोपवर्णितः। मुद्राविधयश्चापि विततताः विविधमुद्रालक्षणपुरस्सरम्।

अथ पञ्चमाध्याये वस्त्रधारण- पुण्ड्रधारण- पवित्राचमनादि निरूपणपुरस्सरं पुण्याहवाचं समारभ्य पीठकल्पना- स्नपन- कलाधिवासाग्निकार्याग्निप्रतिष्ठा- पुण्याहस्नपनाग्निकुण्डसंस्कार- सृक्स्रुवाज्यादिसंस्कारपुरस्कृताग्निसंस्कारान् उपवर्ण्य, पूर्णाहुत्या अग्निकार्यप्रक्रियां परिसमाप्य, प्रायश्चित्तादिनिरूपणानन्तरं, नित्योत्सवतद्बेरादिवर्णनेन परिसमाप्यतेऽयमध्यायः।

आचार्यवरणेन समारब्धः षष्ठाध्यायः भूपरीक्षा- प्रवेशबलि- सूत्रनिपात- वास्त्वाराधना- ग्रामादिगर्भन्यासादिभिस्साकं, बालालय- जीर्णोद्धारादिक्रम- मन्दिरनिर्माण तदङ्गविशेषान् विशेषतः उपस्थापयति। एकतल- द्वितलादिनिर्माणं, विविध मण्डप गोपुर- प्राकारादि प्रतिमादिनिर्माण

प्रकारांश्च विशषतो वर्णयति।

सप्तमाध्यायः प्रतिष्ठा विधाननिरूपको बोभवीति।

अष्टमांध्याय उत्सवविधिनिरूपणपरः। विविधजयन्त्योऽत्र विततताः। यद्यपि अत्र संहितायां निरूपिता विशेषाः श्रीप्रश्नादिसंहितास्वपि उपलभ्यन्ते तथापि, अस्याः संहितायाः कापि समग्रता जागर्तीति सूक्ष्मेक्षिकसा अवगम्यते। प्रायशः श्रीपाञ्चरात्रीयसर्वप्रमेय सङ्ग्रहोऽत्र समग्रसाक्षात्कार मुपलभत इति विशेषः।

अस्याश्च अधुना पुनः प्रकाशनेन, सर्वाङ्गसुन्दरतया आगमप्रेमिणां करकमलेषु समर्पयितुं क्रियमाणोऽयं प्रयत्नः विशेषाभिनन्दनीयः। श्रीमत्परमहंस परिव्राजकाचार्य श्रीश्रीश्री त्रिदण्डि चिन्न श्रीमन्नारायण रामानुजजीयर्स्वामि श्रीचरणानामप्रतिहतमङ्गलाशासनमन्तरा कीटोपि न पुरस्सरतीति दृढं विश्वसन्तो वयम्, अस्मिन् पवित्रे कर्मणि पूर्ण निमग्नानां प्रकाशकानां, मुद्रकाणां सर्वेषां श्रियःपतेः मङ्गलाशासनमाशास्महे। एतत् प्रकाशनाय उदारद्रव्यप्रदातारः विशेषतः सभाजनीया इति किमु वक्तव्यम्-

एवं विज्ञापयति

भागवतचरणकमलचञ्चरीकः

वेंकटरङ्गरामानुजाचार्यः

अध्यक्षः-

श्रीमदुभयवेदान्ताचार्यपीठम्,

(श्रीरङ्गम्)

विषयसूचिका

विषयम्	पुट संख्या
प्रथमोऽध्यायः	
जगतः स्थितिनिरूपणम्	३
ब्रह्मस्वरूपनिरूपणम्	३
जगतो न नाशः	४
वपुषो वृद्दिह्रासौ	५
माया पांचभौतिके वपुषि पुरुषं योजयति	६
स्रष्टा ब्रह्मा, सृष्टिसाधनं माया	७
दीर्घायुषः प्रजाः सृष्ट्यादौ	८
रुद्रेण प्राणिनां भक्षणम्	९
यमप्रार्थना	१०
शिवपुरुषयोस्संवादः	१०
शिवस्य रुद्रत्वं, संहारसाधनं मृत्युः,	
ब्रह्मलिपिश्च साधनम्	११
जीवः	१२
मोक्षोपायः	१४
प्रपत्तिः	१४
पंचरात्रम्	१५
सार्धकोटि प्रमाणं पंचरात्रम्	१६
सर्वे पंचरात्रिणः	१६
सर्वे मायाशास्त्रमोहिताः	१६
एकत्र दीक्षितः नान्यत्र कर्तव्यः	१७
अनुक्त मन्यतो ग्राह्यम्	१७
एकत्र दीक्षित स्सर्वत्र कर्तव्यः	१८
पंचसंस्कारवान् सर्वत्राधिकारी	१८
शास्त्रारंभः	१९
द्वितीयोऽध्यायः	
भगवत् ब्रह्मणोः संवादः	२०
ज्ञानम्	२०
ब्रह्मस्वरूपम्	२०

विषयम्	पुट संख्या
चत्वारो व्यूहाः	२१
भगवत्सृष्टि प्रारंभः	
समुद्रः, माया, पद्मनाभः, न्यग्रोधः	२१
हयग्रीवः, अनंतः, गरुडः, देव्यः,	
पार्षदाश्च	२२
विश्वमूर्तिः	२२
जीवः	२३
जगत्	२३
चतुर्मुखस्य सृष्टिः	२४
गुणचतुष्टयम्	२५
प्रकृतिसन्तानम्।	२६
तत्त्वसृष्टिः।	२६
द्विविधं ज्ञानम्।	२७
ब्रह्मलक्षणम्	२८
ब्रह्मणः प्रतीक समर्थनम्	२८
जगतः नित्यत्व समर्थनं	३०
तत्त्वानां नित्यत्वम्	३१
जगज्जीवसंयोगः	३१
चित्तप्रसादनम्	३१
संसृतिबंधन हेतुः	३१
अविद्या	३२
आदिसृष्टिप्रकारः	३२
उत्तमाद्या स्त्रिविधाः	३३
गुणिनां लक्षणम्	३३
शरीरादि तपश्चर्या	३४
सात्विकादि तपः	३४
ब्रह्मणोवयांसि	३५
अण्डसृष्टिः	३५
भूगोळ वर्णनम्	३६

भारतवर्षम्	३७
अतलादिः	३८
नरकलोकः	३९
भुवर्लोकादि वर्णनम्	३९
स्वर्गः	४०
अण्डानि।	४१

तृतीयोऽध्यायः

ऋषिभिः कृत वर्णाश्रम विषयक प्रश्नः।	४३
जातयः	४३
आश्रमाः	४३
आश्रमधर्माः	४३
उद्वाहः	४४
कुण्डगोळौ	४४
संकरजातिः	४४
भिषक्	४५
मौहूर्तिकः	४५
कर्मकः	४५
कुलालः	४५
पारशवः	४५
व्याधः	४५
गोपः	४५
माहिषः	४५
करिबन्धनः	४५
शूलिकः	४५
मणिविक्रयकः	४६
करणः	४६
कटककारः	४६
सूतः	४६
मागधः	४६
चण्डाळः	४६
तंतुवायः	४६
पुळिंदः, पुल्कसः	४६
वैद्यनर्तकौ	४६
तक्षः	४७
तैलिकः	४७
कर्माणि षट्	४७
त्रिकर्माणि	४७
विप्रादिगुणाः	४७
अष्टसंस्काराः	४७
पञ्चकालविभागः	४८
उषःकालादि कृत्यानि	४८
विण्मूत्रोत्सर्जनम्	४९
शौचम्	४९
दन्तधावनम्	४९
आचमनम्	५०
प्राणायामः	५०
संकल्पः	५१
स्नानम्	५१
गौणस्नानम्	५२
पुण्ड्रधारणम्	५३
संध्योपास्तिः	५४
पवित्राणि	५४
संध्या चतुर्विधा	५५
प्रोक्षणादयः	५५
अर्घ्यदानम्	५५
कालातीत उपवासः	५६
संध्याजपः	५६
अभिगमनम्	५८
उपादानसंग्रहः	५८
दर्भाः	५९
समिधः	५९
परिधयः	६०

पात्राणि	६०
पात्रशोधनम्	६०
जलाहरणम्	६१
चन्दनसंघर्षणम्	६१
उपकरणद्रव्याणि	६१
फलानि	६१
पत्राणि	६२
देवपूजार्हद्रव्याहरणम्	६२
धान्यसंग्रहः	६२
द्रव्यशुद्धिः	६२
काष्ठम्	६२
हविर्विधानम्	६२
शुद्धान्नम्	६३
शर्करान्नम्	६३
मुद्गान्नम्	६३
तिन्त्रिण्यन्नम्	६४
दध्योदनम्	६४
तिलाद्यन्नम्	६५
माषान्नम्	६५
सूपः	६५
लेह्यम्	६५
रसः	६६
कदम्बलेह्यम्	६६
पायसम्	६७
पृथुकम्	६८
शाकविधिः	६८
इज्यासंग्रहः	६८
समाराधनम्	६९
घंटार्चनम्	७०
दिग्बंधनम्	७०
प्राणायामः	७०
भूतशुद्धिः	७१
तत्त्वसंहारः	७२
जीवस्वरूपम्	७३
तत्त्वसृष्टिः	७३
मंत्रजपः	७४
मानसाराधनम्	७४
मन्त्रशुद्धिः	७६
बाह्याराधनम्	७६
पात्र शोधनम्	७६
अंबुपूरणमंत्रः	७६
पात्र स्थापनम्	७६
दाहन प्लावनम्	७७
अर्घ्यादि कल्पनम्	७७
योगपीठ प्रकल्पनम्	७८
अर्चनमन्त्राः	७९
धर्माद्यावाहनम्	७९
भगवदावाहनम्	८०
साम्मुख्यादिः	८०
आराधन मंत्रः	८१
न्यासविधिः	८१
अर्घ्यादिदानम्	८२
मधुपर्कः	८२
आवाहनं जङ्गमेषु	८२
परिवारकल्पनम्	८३
दिगीशाः	८४
स्नानासनम्	८४
पंचामृतम्	८५
नित्यस्नपनम्	८५
वटकविधिः	८६
अलङ्कारासनम्	८६

धूपदीपसमर्पणम्	८६
मात्रादानम्	८७
घटदीपः	८७
भोज्यासनम्	८७
देवालये	८८
षडर्चाः	८९
भक्तेभ्यो घटदीप दर्शनम्	८९
घटदीपदर्शन फलम्	८९
परिवार देवाराधनम्	८९
बलिदानम्	९०
मन्त्रासनम्	९०
अनुयागविधिः	९१
भोजनविधिः	९२
स्वाध्यायः	९४
योगः	९४
प्रदोषे जपसंकोचः	९४
शयनविधिः	९५
योषितां पंचकालविभागः	९६
उपादानम्	९७
इज्या	९७
स्वाध्यायः	९८
योगः	९८
विधवाधर्मः	९९
अन्यधर्मविशेषः	९९

चतुर्थोऽध्यायः

योगयुक्त लक्षणम्	१००
योगलक्षणम्	१००
योगो द्विविधः	१००
योगे मुक्त्युपायः	१००
योगांगौ, यमः	१००
नियमः	१०१
आसनानि	१०१
प्राणायामः	१०२
शरीरमानम्	१०२
अग्निस्थानम्	१०२
देहमध्यम्	१०३
नाभिः	१०३
कुंडलिस्थानम्	१०३
सुषुम्ना	१०४
इळादिनाड्यः	१०४
प्राणादिवायवः	१०५
प्राणादिस्थानम्	१०५
प्राणादिचेष्टा	१०५
नाडीशुद्धिः	१०६
प्राणायामः रेचकादिः	१०७
हृदयांबुजम्	१०७
प्राणायामफलानि	१०७
अधमादयः	१०८
वायुधारणम्	१०८
धारणफलम्	१०९
मनःस्थापनाहेतुः	१०९
अनिष्टदर्शनम्	११०
प्रत्याहारः	१११
मर्मस्थानानि	१११
पञ्चभूतस्थानानि	१११
पञ्चभूतांशः	११२
समाधिः	११२
भगवद्ध्यानम्	११३
मंत्रयोगः	११५
मंत्रस्यार्थः	११५
सामान्यतो मंत्राभ्यासे	११६
गुरुकुलवासः	११६

विष्णवर्चनादि	११६
मंत्रग्रहणकालः	११६
दीक्षा	११६
उपदेष्टव्यः	११७
मंत्रस्वीकारकाः	११७
आनुगुण्यः	११८
परीक्षाहीनमंत्राणि	११९
मन्त्रमात्रदीक्षा	११९
पंचसंस्कार दीक्षा	१२०
ऋत्विग्वरणम्	१२०
धर्मोपदेशः	१२३
क्षत्रियादीनाम्	१२४
मंत्रभेदाः	१२४
वर्णाः	१२४
वर्गपंचकाः	१२५
प्रणवमनुः	१२६
हंसमनुः	१२६
सप्तार्णः	१२७
अष्टाक्षरः	१२७
न्यासविधिः	१२८
व्यापकन्यासः	१२९
अङ्गन्यासः	१२९
द्वादशाक्षरी	१३१
विष्णुगायत्री	१३२
सुदर्शनषडक्षरम्	१३२
नृसिंह मनुः	१३४
गरुडमंत्रः	१३४
श्री मंत्रः	१३५
भूमिमंत्रः	१३६
आदित्यमंत्रः	१३६
ब्रह्ममंत्रः	१३७
शिवमंत्रः	१३७
मूर्तिमंत्रः	१३७
तत्त्वमंत्रः	१३७
आयुधपूजामंत्रः	१३८
जपसंख्या	१३८
कृतादिषु जपः	१३८
जपस्थानम्	१३८
जपकालः	१३९
मंत्रप्रयोजनम्	१३९
दिग्व्रतम्	१३९
व्यर्थजप लक्षणम्	१४०
भोजनादिः	१४०
मंत्रलिंगानि	१४१
एकस्मिन् साधिते सर्वफलम्	१४१
जपविधिः	१४१
अग्निकार्यविधिः	१४२
कुंडलक्षणम्	१४२
जपकाल विशेषः	१४२
मोक्षपुरश्चर्या	१४३
सिद्धिप्रत्ययः	१४३
मुक्तिसिध्यादि विशेषाः	१४३
अणिमादिः	१४४
धनाकर्षणम्	१४४
स्त्री वश्यम्	१४४
गुळिकाविधिः	१४५
आकर्षणविधिः	१५६
यक्षसाधनम्	१५७
विद्याधर वशीकरणम्	१५८
पाताळसाधनम्	१५८
खड्गसाधनम्	१५९
शुक्तिविद्या	१५०

इंद्रजालविद्या	१५०
अपमृत्युजयः	१५१
आरोग्यं	१५१
वाक्सिद्धिः	१५१
अन्नसिद्धिः	१५१
पुत्रलाभः	१५२
विषहरणम्	१५२
वृष्टिलाभः	१५२
अतिवृष्टिशमनम्	१५३
मंत्राधिदेवदर्शनम्	१५३
संग्रामविजयः	१५३
भूतादि ग्रहनिवारणम्	१५३
गुळिकाप्रभावम्	१५४
सर्वोपयोगि गुळिकाविधिः	१५४
कालमृत्युजयः	१५५
मृत्युदानम्	१५५
रसातलप्रवेशः	१५६
स्तंभनम्	१५६
उच्चाटनम्	१५७
विद्वेषणम्	१५८
मारणम्	१५८
शांतिकर्म	१६०
पुष्टियजनम्	१६१
कर्मणां कुण्डानि	१६२
कर्मणां होमः	१६२
होमद्रव्यप्रमाणानि	१६३
पूर्णाहुतिः	१६४
परकाय प्रवेशः	१६४
शरीरनिपातः	१६५
परजीवयोर्नभेदः	१६६
देहवातलक्षणम्	१६६
वैकुंठलक्षणम्	१६८
पुररक्षा	१६८
नामत्रय मंत्रः	१६९
अग्निप्राकार मंत्रः	१७०
मुद्राविधिः	१७०
शंखमुद्रा	१७१
चक्रमुद्रा	१७१
अग्निप्राकारमुद्रा	१७१
पद्ममुद्रा	१७१
सुरभिमुद्रा	१७२
धूपमुद्रा	१७२
दीपमुद्रा	१७२
योगमुद्रा	१७२
ग्रासमुद्रा	१७२
महती ग्रासमुद्रा	१७३
अञ्जलिः	१७३
मुद्राविकारः	१७३
प्रार्थना मुद्रा	१७३
पंचमोऽध्यायः	
पुण्याहविधिः	१७५
वस्त्रधारणम्	१७५
उत्तरीयम्	१७५
ऊर्ध्वपुंड्रः	१७६
पवित्रम्	१७६
आचमनम्	१७६
यज्ञसूत्रम्	१७७
पुण्याहविधिः	१७७
पंचोपनिषदः	१७८
पीठकल्पनम्	१८५
वैशेषिकस्नपनम्	१८६

त्रिविधं स्नपनम्	१८६
स्नपने धिवासः	१८६
स्नपनमंडपम्	१८७
सूत्रपातनम्	१८७
धान्यपीठम्	१८८
कलशाधिवासः	१८८
अग्निकार्यम्	१८९
कुंभपूरणम्	१८९
नवरत्नानि	१९०
पंचलोहानि	१९०
कूर्चम्	१९०
पुण्याहम्	१९१
स्नपनकलशेषु आवाहनम्	१९१
अभिषेकः	१९१
हरिद्रास्नपनम्	१९२
नवकलशस्नपनम्	१९२
पंचकलशस्नपनम्	१९३
पंचगव्यविधिः	१९३
पंचगव्य प्रोक्षणम्	१९४
पंचगव्य प्राशनम्	१९४
अग्निकार्य विधिः	१९५
कुंडध्यानम्	१९५
पात्रासादनम्	१९६
कुंडसंस्कारः	१९६
कुंडमध्येध्यानविधिः	१९७
अग्न्युत्पादनम्	१९७
अग्निप्रतिष्ठा	१९७
परिस्तरणम्	१९८
प्रणीतावाहनम्	१९८
ब्रह्मावाहनम्	१९९
चरुपाकः	१९९
चरवः	१९९
आज्य संस्कारः	१९९
स्रुक्स्रुवसंस्कारः	२००
परिधि प्रक्षेपणम्	२००
आघारहोमः	२०१
आज्यभागः	२०१
अग्निध्यानम्	२०२
सप्तजिह्वाः	२०२
जिह्वाहोमः	२०२
अग्निभेदः	२०२
गर्भादानादि संस्काराः	२०३
पंचसंस्कारः	२०३
अग्नावाराधनम्	२०४
प्रतिष्ठादौ	२०५
पूर्णाहुतिः	२०५
प्रायश्चित्तम्	२०६
प्रणीताजल प्रोक्षणम्	२०६
नित्योत्सवः	२०७
बलिदान विधिः	२०८
वाद्यादिविधिः	२०८
महोत्सवे बलिदानविधिः	२०९
नित्योत्सवबेराणि	२०९
षष्ठोऽध्यायः	
आचार्यवरणम्	२११
भूपरीक्षा	२१२
प्रवेशबलिः	२१३
सूत्रनिपातः	२१३
वास्त्वाराधना	२१४
ग्रामादिः	२१५
गर्भन्यासः	२१५
वास्तुदेवाः	२१५

द्वाराणि	२१६
पूजकाः	२१७
श्रेणयः	२१७
श्मशानम्	२१७
तटाकम्	२१८
कर्षणविधिः	२१८
कुंभविन्यासविधिः	२२०
बालालयम्	२२१
जीर्णोद्धारविधिः	२२२
द्विविधस्थानम्	२२३
प्रभापद्मासनादीनाम्	२२४
धामबिंबविषयम्	२२४
शक्त्याकर्षणम्	२२४
बालबिंब प्रोक्षणम्	२२५
जीर्णोद्धारः	२२६
उत्तमादि मंदिरम्	२२९
संचितादिधाम	२२९
द्रव्यार्जनम्	२२९
मंदिर निर्माणम्	२३०
एकतलम्	२३०
द्वितलम्	२३०
त्रितलम्	२३०
दिक्सूत्रभ्रमणम्	२३१
धामभेदः	२३२
नागरद्राविड वेसराः	२३२
धामविस्तारः	२३२
प्रथमेष्टकाः	२३३
मृण्मयेष्टकाः	२३३
सर्वेष्टकानां आयामविस्तारः	२३४
इष्टकाधिवासादि	२३४
जलावर्त परीक्ष	२३६
देवागार निर्मातुः फलम्	२३६
गर्भन्यासविधिः	२३६
मूर्धेष्टकाविधिः	२३९
स्थूपिकाविधिः	२४०
स्थूपीलक्षणम्	२४०
विमान दिङ्मूर्तिस्थापनम्	२४१
अर्धमंडपम्	२४३
नृत्तार्धमण्डपम्	२४३
सोपानम्	२४३
आस्थानमण्डपम्	२४४
गोपुराणि	२४४
प्राकाराः	२४४
कवाटस्थापन, प्रतिष्ठा च	२४५
प्रतिमाभेदलक्षणम्	२४६
शिलासंग्रहः	२४७
दारुसंग्रहम्	२५०
बिम्बनिर्माणम्	२५१
चेष्टा	२५१
विकारः	२५१
स्थितबिंबमानम्	२५२
आसीनबिंबमानम्	२५२
शयानस्य	२५२
यानारूढस्य	२५३
विश्वरूपम्	२५३
त्रिविक्रमः	२५३
देव्यः	२५४
शयनभेदाः	२५४
यानाधिरूढः	२५६
विश्वरूपी	२५६
स्वतंत्र परतंत्र भेदः	२५६
कर्मार्चादिबेराणि	२५७

द्वारपाल लक्षणम्	२५८
विष्णुपार्षदाः	२५९
एकावरणे परिवाराः	२५९
अंतर्हारधाम्नि	२६०
प्रथमावरणे	२६०
अन्तर्हारे	२६०
मध्यांतर्हारे	२६०
मर्यादायाम्	२६१
महामर्यादायाम्	२६१
महापीठम्	२६१
ध्वजस्तंभः	२६१
महानसम्	२६२
धान्यागारम्	२६२
यागशाला	२६३
मत्स्यादिमूर्तीनाम्	२६३
गृहार्चा	२६३
सालग्रामम्	२६३
सप्तमोऽध्यायः	
प्रतिष्ठा विधिः	२६५
वपनम्	२६५
मृत्सङ्ग्रहणम्	२६५
पंचाग भूषणम्	२६६
अंकुरार्पणम्	२६७
नवधान्यम्	२६८
मंदिर संस्कारः	२६९
शान्तिहोमः	२६९
प्रतिसर बंधनम्	२७०
जलाधि वासः	२७१
छायाविधिः	२७१
पीठ संयोजनविधिः	२७३
साक्षाज्जलाधिवास विधिः	२७४
जलाधिवास देशलक्षणम्	२७५
वास्तुपूजा	२७५
नेत्रोन्मीलनम्	२७८
छायास्नपनम्	२७८
स्नपने भेदाः	२७९
कर्मांगस्नपनम्	२७९
चक्राब्जमंडलम्	२८०
वर्णरचना	२८१
शयनाधिवासः	२८३
स्थण्डिल विधिः	२८३
द्वारतोरणपूजाविधिः	२८४
चक्राब्जमंडलाराधनाविधिः	२८५
आवाहनविधिः	२८६
महाकुंभस्थापनम्	२८८
स्थंडिल धान्य प्रमाणम्	२८८
प्रतिमादि विन्यासः	२८९
अष्टमंगळम्	२८९
महाकुंभाराधन विधिः	२९०
यागमंडप वेदिका कुंडलक्षणम्	२९१
कुंडलक्षणविधिः	२९१
स्रुक् स्रुवम्	२९२
स्रुवलक्षणम्	२९३
अग्निप्रतिष्ठा	२९४
तत्त्वसंहारः	२९५
तत्त्वहोमः	२९६
परमंत्रः	२९८
प्राणादिदशवायुन्यासविधिः	२९८
प्राणप्रतिष्ठाहोमविधिः	२९९
आयुधन्यासः	३००
षोडशन्यासविधिः	३००
प्रणवन्यासः	३०१

व्याहृतिन्यासः	३०१
अक्षरन्यासः	३०१
नक्षत्रन्यासः	३०३
नवग्रहन्यासः	३०४
कालन्यासः	३०४
जातिन्यासः	३०६
तोयन्यासः	३०६
निगमन्यासः	३०७
देवतान्यासः	३०७
वैराजन्यासः	३०८
क्रतुन्यासः	३०८
गुणन्यासः	३०९
मूर्तिन्यासः	३१०
शक्तिन्यासः	३१०
लोकविन्यासः	३११
शान्तिहोमः	३११
कुंभाम्बुसेचनम्	३१२
संकीर्णविधिः	३१२
महाप्रतिष्ठाविधाने परिवाराणाम्	३१३
बलिः	३१४
बालशक्तिः	३१४
पूर्णाहुतिः	३१५
एकबेरविधाने	३१५
अष्टबन्धनम्	३१७
बहुबेरे	३१८
आवाहनम्	३१९
विशेषन्यासः	३२०
आत्मसमर्पणम्	३२१
विभवमूर्ती प्रतिष्ठा	३२२
कर्मबिम्बस्थापनम्	३२३
एकबेरविधाने	३२३
देवीनां प्रतिष्ठा	३२४
स्वतन्त्रे देवीनाम्	३२५
देवीनामुद्वाह विधिः	३२६
कन्यादानम्	३२६
मांगळ्यधारणम्	३२६
घृतारोपणम्	३२८
शेषहोमः	३२८
विमानप्रतिष्ठा	३२९
बलिपीठप्रतिष्ठा	३३१
महानसप्रतिष्ठा	३३२
वापीकूपतटाकानाम्	३३३
पीठध्वजप्रभादीनां प्रतिष्ठा	३३३
घंटाधूपदीपानाम्	३३३
वाद्यानि	३३४
छत्रादीनाम्	३३४
ध्वजस्तंभः	३३४
श्रीवत्सस्य	३३४
मकुटादि आभरणानाम्	३३४
हारादीनाम्	३३५
चक्राद्यायुधानाम्	३३५
अनन्तगरुडविष्वक्सेनाः	३३५
अक्षमालाः	३३५
भक्त प्रतिष्ठा	३३६
गृहार्चा	३३६

अष्टमोऽध्यायः

उत्सव विधिः	३३८
ध्वजारोहणम्	३३८
अधिवासविधिः	३४२
देवताह्वानम्	३४४
आह्वानक्रमः	३४५
उत्सवविधिः	३४६
परिवारहोमः	३४८

बलिदानम्	३४९
उत्सवबिंबयात्राविधिः	३५०
चूर्णोत्सवम्	३५१
जलद्रोण्यर्चनम्	३५२
मृगयोत्सवः	३५३
रथोत्सवः	३५३
तीर्थोत्सवः	३५४
अवरोहणम्	३५५
पुष्पयागविधिः	३५६
पवित्रारोपण विधिः	३५८
एक बेरविषये	३६१
तीर्थोत्सवः	३६३
वसंतोत्सवः	३६४
कल्हारोत्सवः	३६४
दमनोत्सवः	३६४
हंसयजनम्	३६४
दीपावळिः	३६४
महानवमी	३६५
दीपोत्सवः	३६५
विवाहोत्सवः	३६६
मृगाया	३६६
मासेशाराधनम्	३६६
पंचपर्वादि	३६६
आग्रेणम्	३६६
प्लवोत्सवः	३६७
शयनोत्थानम्	३६७
एकादशी द्वादशी	३६७
श्रीकृष्णजयंती	३६७
श्रीरामनवमी	३६८
श्रीनृसिंहजयंती	३६८
उपरागः	३६८
धनुर्मासाराधनम्	३६८
एकादशी धनुर्मासौ	३६८
आर्द्रा	३६९
शिवरात्रिः	३६९
प्रायश्चित्तविधिः	३६९
संप्रोक्षणम्	३६९
शास्त्रांतर प्रतिष्ठायाम्	३६९
अस्पृश्यस्पर्शे	३७०
परिवारार्चनभंगे	३७०
अग्नौशांते	३७०
त्रिदशादि प्रतिष्ठायाम्	३७०
गृहार्चायां पूजाभंगे	३७०
आतपस्पर्शे	३७०
अग्निदाहे	३७१
नित्यादियौगपद्ये तंत्रानुष्ठानम्	३७१
स्नपने बिंबपतने	३७१
उत्सवस्खलने	३७१
कुंभादिनष्टे	३७२
उत्सवादिस्खालित्ये	३७२
अधिकारिविघ्ने	३७२
बिंबे वातादिदुष्टे	३७२
बिंबे पतिते	३७२
बिंबनष्टे	३७२
तीर्थोत्सवभंगे	३७३
अवरोहणकालः	३७३
पुष्पयागभंगे	३७३
तंत्रेण कौतुकम्	३७३

श्री विष्णुतिलक संहिता विषयसूची समाप्ता.

सर्वं श्रीकृष्णार्पण मस्तु

श्रियै नमः

श्री लक्ष्मीहयवदन परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

श्री विष्णुतिलक संहिता

श्रीमत् पांचरात्रे खगेश्वरसंहितायां

श्री विष्णुतिलके शास्त्रावतरणं नाम प्रथमोऽध्यायः प्रारंभः

बृहस्पति सुराधीश व्यास गौतम कौशिकाः।
वसिष्ठ कण्व च्यवन शांडिल्य भृगु नन्दनाः।। १

भारद्वाजात्रि जाबालि भरतागस्त्य शौनकाः।
अन्ये च मुनयस्सर्वे समेत्य सहदैवतैः।। २

ब्रह्माणं लोककर्तारं प्रष्टु मारेभिरे कथाः।
ब्रह्मन्! सर्वसुराधीश! स्रष्टा त्वं सर्वदेहिनाम्।। ३

अदृष्टं न त्वया किंचित् नपरोक्षं च विद्यते।
नैवाधीतं त्वया किंचित् न सोऽप्याराधितः परः।। ४

विदितं भवत स्सर्वं विष्णो स्त्वमसि नाभिजः।
संशय द्रुम विच्छेत्ता त्व मेवान्यो न कश्चन।। ५

तस्मा त्त्वां शरणं प्राप्ताः बृहस्पतिमुखा वयम्।
इति ब्रुवाणान् तान् विप्रान् देवराज पुरोगमान्।। ६

ब्रह्मा सकरुणः प्राह मन्दस्मितमुखाम्बुजः।
सर्ववेद विदो यूयं भगवद्ध्यान तत्पराः।। ७

असकृत् देवता स्सर्वाः तपसा राधिताः पुनः।
युष्माभि स्सकला लोका निर्जिता श्च न संशयः।। ८

तपस्विनां तादृशानां किमागमन कारणम्।
इति ब्रुवाणं ब्रह्माणं प्राञ्जलिस्सन् बृहस्पतिः।। ९

संशयं प्रष्टु मारेभे देवराजप्रचोदितः।
अधीतास्सकलावेदाः सव्रतीका न संशयः।। १०

निष्ठा मलभमाना स्ते त्वामेव शरणं गताः।
जगत् सृष्टुं समाधिष्टः कःकेन चतुरानन! ।। ११

जगत् कुत स्समायातं कुत्रासादमनात् पुरा।
इतो यास्यति तत् कुत्र कस्याधीन मिदं जगत्।। १२

अनिशं वा जगदिदं इति न स्संशयोमहान्।
श्रुत्वैतद् भगवान् ब्रह्मा बृहस्पतिसमीरितम्।। १३

रुद्रं पार्श्वस्थ मालोक्य प्रसीदन्निदमब्रवीत्।
सर्वे तपस्सु निरताः धर्मनिश्श्रेयसेरताः।। १४

सभायां श्रोतुमिछ्चंति सर्वगुह्यतरं महत्।
ब्रह्मणो वचनं श्रुत्वा भगवान् लोकशंकरः।। १५

यदुक्तं देवगुरुणा तदेवान्ववदत् स्वयम्।
तत् श्रुत्वा भगवान् ब्रह्मा करुणारसवारिधिः।। १६

मुनिभ्य स्सकलं तत्वं वक्तुं समुपचक्रमे।
श्रुणुताद्य मुनिश्रेष्ठा यद्यूयं परिपृच्छथ।। १७

जगतः स्थितिनिरूपणम्

ब्रह्मण्यास जगत्सर्वं तेन सृष्ट मिदं जगत्।
तेन संरक्ष्यते विश्वं तत्र लीयेत वै पुनः।। १८

तत्रस्थं सकलं विश्वं नानीशं तत् चराचरम्।
विना ते स न वर्तेत तन्नस्यात् शरणं महत्।। १९

श्रुत्वैतत् मुनिशार्दूलो गौतम स्सुरचोदितः।
जातमानसकण्डूतिः पप्रच्छ परमेष्ठिनम्।। २०

किं ब्रह्म किं समाचारं कुत्रास्ते तत् कुतोऽभवत्।
किमर्थं वहते विश्वं कुत्र तत् विलयिष्यति।। २१

गौतमस्य वचश्श्रुत्वा स रुद्र श्चतुराननः।
गौतमादि मुनींद्रेभ्यो व्याहर्तुं समुपाक्रमत्।। २२

ब्रह्मस्वरूपनिरूपणम्

यद्व्याप्य वर्तते सर्वं सदा निरवशेषतः।
तदेव ब्रह्म जानीथ तस्य नास्ति व्यतिक्रमः।। २३

विद्यते तस्य नोत्पत्तिः विनाशो वा कदाचन।
स्थानं वा ब्रह्मणोऽस्थानं कदाचि दिह विद्यते।। २४

विना तेन कदाचिच्च विश्वं तत् सचराचरम्।
वर्तते न परं ब्रह्म बिभर्ति सततं जगत्।। २५

तत्रस्थं सकलं विश्वं विनिर्गम्य तदिच्छया।
विकासं प्राप्य च पुनः मुकुळीभाव माश्रितम्।। २६

याति तत्र लयं विश्वं पुन र्निर्गमनं ततः।
न नाशो जगतोस्यापि विना मौनविकस्वरम्।। २७

निशम्य ब्रह्मणो वाक्यं भारद्वाजो महामुनिः।
बद्धांजलि पुटो भूत्वा पप्रच्छ कमलासनम्।। २८

प्रत्यक्षे जायते जन्तुः कंचित् कालं विभाति च।
ततो मरण मासाद्य न भाति जगतीतले।। २९

एव मेव मया दृष्टाः* जन्तवो जगतीतले।
वदन्ति च महान्तोऽपि सत्यवाच तपस्विनः।। ३०

मरणं प्राणिनो नित्यं जातस्य च न संशयः।
आर्जितव्य स्ततो धर्मः शरीरं क्षणभंगुरम्।। ३१

अनित्यं सकलं विश्वं प्रळये विलयं भजेत्।
ततो मुमुक्षवो भूत्वा ध्यात्वा चिद्घन मीश्वरम्।। ३२

आनन्दं ब्रह्मणोभ्यस्य ब्रह्मभूयात् पुमानिति।

जगतो न नाशः

भारद्वाजवच श्श्रुत्वा ब्रह्मा लोकपितामहः।। ३३

न नाशो जगत स्सत्यं पुंसो जीवस्य योगतः।
पांचभौतिकपाकेन प्राणिनो जायते वपुः।। ३४

वर्धते च ततः काले पुरुषस्य वियोगतः।
वपुः पतति निर्जीवः वह्नौ वह्नि र्जले जलम्।। ३५

---

*सृष्टाः

वायुर्वायौ महीमह्यां अंबरं याति चांबरम्।
काष्ठभूतं महीभागं प्रेतं पश्यन्ति तज्जनाः।। ३६

जीवोऽन्यद्वपु रासाद्य प्राणी भवति पूर्ववत्।
एष एव भवेत्पंथा लोकसृष्टे र्मुनीश्वराः।। ३७

पिपीलिकादि सर्वेषां जंगमस्थावरात्मनाम्।
शरीरस्य विपर्यासो नैव पुंसो विपर्ययः।। ३८

न भूतानां भवे न्नाशः सत्यंसत्यं ब्रवीमि वः।
पितामहवच श्श्रुत्वा महेंद्रः पाकशासनः।। ३९

जातकौतूहलो देवं प्रष्टुं समुपचक्रमे।
भगवन्! सर्वलोकेश! त्वं मूलं सर्वदेहिनाम्।। ४०

त्वां विना नैव पश्यामः संशयच्छेदने गतिम्।
जायतेऽल्पतनुः प्राणी पश्चा द्भूया न्महातनुः।। ४१

न जाने कारणं तत्र संशयं छेत्तु मर्हसि।

वपुषो वृद्धिह्रासौ

संयोगे पंचभूतानां संयुक्तश्चेत् पुमानपि।। ४२

जातप्राणं वपु र्भूयाद् बहुचेष्टा समन्वितम्।
जातचेष्टे वपुष्यस्मिन् तत्राग्निः पांचभौतिकः।। ४३

निर्दहेत् पार्थिवं भूतं उच्यते सक्षुदित्यपि।
क्षुधा संपीडितः प्राणी चान्नेन शमयेत् क्षुधम्।। ४४

पंचभूतमयं चान्नं पुरुषेण विवर्जितम्।
पंचभूतमयै रन्नैः पृथिव्यादि वपु र्गतम्।। ४५

वर्धते रसभागै स्तै र्नान्यथा वृद्धिसंभवः।
अन्नपानादि रहितः प्राणी यदि मनीश्वराः।। ४६

न वर्धते तस्य वपुः क्षयं याति न संशयः।
उत्थायात्रिः सरभसं प्रष्टुकाम स्स्वयंभुवम्।। ४७

बद्धांजलिपुटो भूत्वा व्याहर्तु मुपचक्रमे।
पक्त्रिमा पंचभूतानां योगः पुंस स्तदन्तरे।। ४८

कथं भवति तत्कर्ता वर्तते वा स्वयं भवेत्।
अत्रेस्तु वचनं श्रुत्वा सादरं चतुराननः।। ४९

उत्तरं वक्तुमारेभे रहस्य मतिदुर्लभम्।
मायाऽस्ति वासुदेवस्य कारणं वृद्धिमौनयोः।। ५०

भूतानां योगपाकस्य योगस्य पुरुषस्य च।

माया पांचभौतिके वपुषि पुरुषं योजयति

भूतानि योजयेन्माया जंतुजाति विभागतः।। ५१
पुमांसं विग्रहे तस्मिन् ततः प्राणी स चेष्टितः।

सांजलिः प्रणतो भूत्वा मुनींद्रोऽत्रि स्स्वयंभुवम्।। ५२
पप्रच्छ किमिदं ब्रह्मन्! लोकस्रष्टा भवान् खलु? ।

मायया युज्यते देहो जीवोऽपि तदनन्तरम्।। ५३
देही भवति जीवोऽयं वर्धतेऽन्नेन तद्वपुः।
इत्युच्यते भगवता कर्तृत्वं कुत्र वर्तते? ।। ५४

स्रष्टेति त्वां विदुः प्राज्ञाः याज्ञवल्क्य पुरोगमाः।
उपदेशेन मुख्येन संशयं मे व्यपोह्यथ।। ५५

इत्युक्तो मुनिना ब्रह्मा प्राहात्रि मुखयोगिनः।
आवा मसृज दीशानो वासुदेव स्सनातनः।। ५६

सृष्टिसंहारयो स्सर्वसाधनं मुख्यकारणं।
माया मपि ततो वादीत् सृजतां जगदित्यपि।। ५७

अपृच्छन्तं परेशान मावयोः कोस्य साधनम्।
कः कर्ता च भवेन्मह्यं ब्रूहि जिज्ञासते प्रभो!।। ५८

इति पृष्टो जगन्नाथः सृजस्व त्वं जगत् तव।
इयं स्यात् साधनं माया तत्तत् संयोजने मम।। ५९

स्रष्टा ब्रह्मा, सृष्टिसाधनं माया

पंचभूतमिदं विश्वं सततं मय्यवस्थितम्।
मृत्काग्निवायुशून्याख्यैः एकरूपं समाश्रितम्।। ६०

शरीरं तव जानीहि तदेत न्मुकुळीगतम्।
एतावन्मयि विश्रांत मितो भूया द्विकस्वरम्।। ६१

मनोबुद्धींद्रियादीनि वर्तंते साधनान्यपि।
मायाधीनानि सर्वाणि वर्तंते त्वयि पद्मज!।। ६२

स्रष्टुं प्रयतमान स्त्वां मायेयं पर्युपासते।
त्वद् वांछानुगुणं सर्वंकरिष्यति न संशयः।। ६३

इत्युक्तो देवदेवेन सनकादीन् ततोऽसृजम्।
ते नसृष्टौ मतिं चक्रुः ततोऽसृज महं शिवम्।। ६४

भृकुटी कुटिलादेष नार्यर्धतनु रीश्वरः।
निर्गम्य लोका नसृजत् योषितः पुरुषानपि।। ६५

प्रजापती नहं सृष्ट्वा कृतकृत्योऽभवं ततः।
ततोऽसृजन् प्रजानाथाः प्रजा स्ते मदनुज्ञया।। ६६

तासां लोकाश्च संसृष्टाः अन्नानि च विशेषतः।
चतुर्दश च लोका स्ते मया सृष्टा मुनीश्वराः।। ६७

भूजलाग्नि मरुद्द्याव आहाराय विकस्वराः।
सर्वं जगदिदं व्याप्तं, ब्रह्मतत्सृष्टिकारणम्।। ६८

कर्ताहं साधनं माया सर्वं निगदितं मया।
ब्रह्मणो वचनं श्रुत्वा पुन रत्रि रभाषत।। ६९

एनं रुद्रं महाभागं जगत्संहारकारणम्।
ब्रुवंति सर्वशास्त्राणि मुनयश्च परंतपाः।। ७०

सोऽयं विश्वं ससर्जेति यदाह भगवान् पुरा।
तज्जिज्ञासा बभूवाद्य कथ्यतां यद्यनुग्रहः।। ७१

श्रुत्वाऽत्रि वचनं ब्रह्मा प्रहस न्निद मब्रवीत्।
अर्धनारीनरवपुः अयमासीत् पुरा मुने! ।। ७२

ससर्ज स तदा विश्वं सृष्टौकौतूहलान्वितः।

दीर्घायुषः प्रजाः सृष्ट्यादौ

दीर्घायुषः प्रजास्सर्वे लोका स्ताभिश्च संततताः।। ७३

स सागर वनापृथ्वी भूभारासह नाभवत्।
ततोऽहं याचितो देवै र्भू र्निमज्जेन्महांभसि।। ७४

त्राहि त्राहि सुरेशान! द्यौरासीत्प्राणि संकटा।
इति संप्रार्थितो देवै स्तेभ्यो दत्वाऽभयं परम्।। ७५

कळ्याणगिरिशृंगाग्रे भगवद्ध्यानमासिषम्।

रुद्रेण प्राणिनां भक्षणम्

अद्राक्षं परमं तेजः नेत्रसम्मीलनक्षमम्।। ७६

शिवं शुश्रूषमाणं मां आससाद ततः परम्।
शिवस्य ब्रह्मरंध्रेण कुक्षिस्तस्य समाश्रितम्।। ७७

कुक्षिस्थं पार्थिवं भागं दग्धुं समुपचक्रमे।
ततः परमयं देवः क्षुधातीव निपीडितः।। ७८

किं करिष्ये क्षुधं केन शमयिष्येऽद्य का गतिः? ।
इत्यार्तः प्रलपन् दीनः कल्याणाद्रिद्रुमानसि।। ७९

उन्मूल्य भोक्तु मारेभे भुक्तास्ते द्रुमजातयः।
असमाप्तांतराग्निस्सन् पशुजातीनभक्षयत्।। ८०

ततो भग्न भरापृथ्वी जाता सुखशरीरिणी।
अदृष्ट्वा भूतले प्राणीन् व्योम्नि देवान् व्यलोकयत्।। ८१

दिवि सीदंति ये केचित् तान् भोक्तु मुपचक्रमे।
अमृतप्राशिनो ये च ते प्राप्य जठरं पुनः।। ८२

निर्गताः पायुमार्गेण कालाग्निसमतेजसः।
असुधाप्राशिनो ये च सर्वे जीर्णा श्शिवोदरे।। ८३

संकटं देवलोकस्य ततो दृष्ट्वा मुनीश्वराः।
पाताळादिषु लोकेषु भुक्तेषु पशुजातिषु।। ८४

अतिभीतो जगन्नाथं दृष्ट्वाऽमुं परमं शिवम्।
दक्षिणादिगधीशान आदधाव परेतराट्।। ८५

यमप्रार्थना

मामेव शरणं प्राप्य तुष्टाव च पुनःपुनः।
सर्वस्रष्टः परंधामन्! प्रणतार्तिहर! प्रभो!।। ८६

त्वामेव शरणं प्राप्तो गतिरन्या न विद्यते।
प्राणिनो बहवो नष्टा गताश्च यमसादनम्।। ८७

सर्वलोकस्थिताः प्राप्य ते मां संकटयंति च।
नास्ति भू स्तत्रभूतानां वसन श्वसनादिनाम्।। ८८

गतागतगति र्नष्टा लोके मम जगत्प्रभोः।
अन्योन्यं तत्र संगम्य मर्दयंते परस्परम्।। ८९

नाहं तच्छासने शक्तः त्वामेव शरणं गताः।
इत्युक्तो धर्मराजेन नत माश्वास्य पुनः पुनः।। ९०

मानसेनैव यागेन वासुदेव मतोषयम्।
मार्गेण ब्रह्मरंध्रस्य तेज स्तन्निर्गतं बहिः।। ९१

शिवपुरुषयोरसंवादः

अग्रे शिवस्य पुरुषो बभूवांगुष्ठमात्रकः।
ततः क्षुधा विनिर्मुक्तः सशिवः पुरुषं पुरः।। ९२

दृष्ट्वा प्रणम्य पप्रच्छ क स्त्वं पुरुषसत्तम!।
किमर्थं मे बभूव क्षुत् लोकव्यत्ययकारिणी।। ९३

अपराधं कमासाद्य क्षुधा बहुनिपीडितः।
इत्युक्तः पुरुषस्तेन व्याजहार स शंकरम्।। ९४

न कश्चिदपराध स्ते प्रजाभिः पीडिता मही।
तस्याः भारापहारार्थं तपत्येष प्रजापतिः।। ९५

तपस्सिद्ध्यै बभूवाहं क्षुदुद्बोधकरं महः।
क्षुधा ते ताः प्रजाः नष्टाः भूभारश्च व्यपोहितः।। ९६

शिवस्य रुद्रत्वं, संहारसाधनं मृत्युः, ब्रह्मलिपिश्च साधनम्

प्रजानां क्रूरकर्मासीः यत स्त्वां रुद्र इत्यपि।
वक्ष्यंति देवता स्सर्वाः संहर्तास्यादितः परम्।। ९७

संहरेः प्राणिनः काले कालेषु प्रळयादिषु।
ते साधनं भवेन्मृत्युः कारणं ब्रह्मणो लिपिः।। ९८

तव स्यां हृदये कुक्षौ क्षुध मुद्दीपयन् अहम्।
इत्युक्त्वा पुरुष स्सोऽयं न्यपतत् बडबा मुखे।। ९९

ततःपर मयं शंभू रुद्र इत्युच्यते बुधैः।
संहर्ता सर्वजंतूनां जरायां मृत्युसंयुतः।। १००

लिपिक्रमं ममाश्रित्य संहरेत् मृत्युना स्वयम्।
इत्यत्रिः ब्रह्मणोवाक्यं श्रुत्वा संतुष्टमानसः।। १०१

पप्रच्छ पुन रप्यन्यत् वाक्यं वाक्यविशारदः।
नित्यं ब्रह्मपरं प्रोक्तं नित्यं च जगदित्यपि।। १०२

उत्पत्ति श्च लय स्तस्य रूपे मौनविकस्वरे।
भूतानां परिपाकेन जायते देहिनां वपुः।। १०३

पुरुषस्य निवेशेन वपुषः प्राणसंभवः।
कोऽयं पुमान् कुतो जातः कि माचारः कुतो लयः।। १०४

किं स्वरूपो भवेदेष ब्रूहि तत्त्वं प्रजापते!।
एव मुक्तोऽत्रिणा ब्रह्मा प्रत्युत्तर मभाषत।। १०५

जीवः

पुमा नित्युच्यते जीवः चित्स्वरूप स्स्वयं प्रभः।
शुद्धस्फटिक संकाशः नित्यो न लय माश्रयेत्।। १०६

यथा ब्रह्म भवेन्नित्यं तथा नित्यो भवेत् पुमान्।
यथा दीपो भवे द्दीपात् प्रवृद्धो भाति पूर्वतः।। १०७

यथाच्छिन्ना तरो श्शाखा सन्यस्ता धरणी तले।
फल प्रवाळकुसुमा विभाति बहुशाखिनी।। १०८

तथा जीवस्य सन्तानो देहमाश्रित्य भाति सः।
न कुत्रापि लयः पुंसो देहान्तर मुपाश्रयेत्।। १०९

संश्रयेद्वा परंब्रह्म स शेषो ब्रह्मणो भवेत्।
माया तिरोहितो जीवः देहेषु परिवर्तते।। ११०

ततो देवं समाराध्य तप स्तप्त्वा विशेषतः।
कृपां लब्ध्वा परेशस्य मायां संतीरयेदपि।। १११

आराध्य तत्परंब्रह्म तदेव शरणं गतः।
शरीरस्य निपातांते परे ब्रह्मणि लीय्यते।। ११२

तदेव साक्षात्कर्तव्यं गतिर्नान्या ततो विना।
सुखदुःखौ समौ कृत्वा शीतमुष्णं सहन् पुनः।। ११३

ध्येय स्तत्परमं ब्रह्म परित्यज्य कळेबरम्।
लीयेत परमे व्योम्नि परस्मिन् ब्रह्मणि स्वयम्।। ११४

जगत्सर्वं यथा ब्रह्मण्यास जीवो यथा सुखम्।
स विकासं लसत्येषः पुंसो नोत्पत्ति रुच्यते।। ११५

निशम्य ब्रह्मणो वाक्यं च्यवनो ऋषिसत्तमः।
वेपमान शरीरस्सन् ब्रह्माणं प्रष्टु मारभत्।। ११६

देवदेव! जगन्नाथ! दक्षिणाशापति र्यमः।
त्वा मेव शरणं प्राप्तः किमाचारो जगौ गृहम्।। ११७

श्रुत्वै तद्वचनं ब्रह्मा भगवान् प्रत्यभाषत।
लोकेषु प्राणिशून्येषु धर्मराजपुरं गताः।। ११८

देहान्तरं समासाद्य विचेरु स्तत्र तत्र वै।
धर्मराज स्स्वयं यातः स्वं लोकं शासितुं पुनः।। ११९

कौशिक स्तद्वच श्श्रुत्वा प्रष्टुं समुपचक्रमे।
शिवेन खलु भुक्तानि वपूंषि प्राणिनां पुरा।। १२०

कथं दधार कुक्षौ सः मांसास्थ्यजिनसंचयान्।
जातोऽतो वर्धते जंतुः मरणं यात्यतः परम्।। १२१

जातमात्रे लघु र्जन्तुः तत स्तस्य वपु र्महत्।
वपु र्मरणतः पश्चात् स्थूलमेव हि देहिनाम्।। १२२

बहवो जंतवश्चैवं म्रियंते धरणीतले।
वपूंष्यपि न दृश्यंते न वृद्धा दृश्यते मही।। १२३

लीय्यते कुत्र तत्सर्वं ब्रूहि मे चतुरानन!।
श्रुत्वा तद्वचनं ब्रह्मा प्रतिवक्तुं समारभत्।। १२४

पृथिव्यां पार्थिवोभागः तेजसो विरहे यदि।
वायुर्वायौ रसे चाप अंबरेऽपि तथांबरम्।। १२५

तत्रतत्र लयं प्राप्य वपु स्तच्छून्यतां व्रजेत्।
यथा'सी ज्जननात् पूर्वं तथा मरणतः परम्।। १२६

विरहे पंचभूतानां शून्यभावं भजेत् वपुः।
देवस्य परमेशस्य कुक्षौ तद्देहिनां वपुः।। १२७

सद्यो दग्धं ततो जीर्णं शून्यं पुरुषवह्निना।
विधे स्तद्वचनं श्रुत्वा शौनको मुनिसत्तमः।। १२८

पप्रच्छ परमेशानं सर्वहृद्यं विशेषवित्।

मोक्षोपायः

मोक्षोपायस्तु कः पुंसां अल्पायासेन साध्यते।। १२९

यस्तु प्रसन्नो जगतां उपदेष्टुं त्वमर्हसि।
मध्येसभं विश्वस्रष्टा प्रष्ट श्शौनकयोगिना।। १३०

ईष द्वसिष्ठ मालोक्य प्रहसन् इद मब्रवीत्।
ऋषे! शौनक योगींद्र! शिखारत्न! तपस्विनाम्।। १३१

यद् गुह्यं पृष्टवानेतत् तथाऽप्युपदिशामि ते।

प्रपत्तिः

प्रपत्तिः परमीशाने सैवस्यात् परमागतिः।। १३२

तमेव शरणं याहि नान्यं मनसि धारय।
पंचरात्रोक्तमार्गेण तमेवार्चय पूरुषम्।। १३३

प्रपन्नं त्राति भगवान् नात्र कार्या विचारणा।
नोपायांतर मस्त्यन्यत् तं विना पुरुषोत्तमम्।। १३४

तत स्तं याहि शरणं परंब्रह्म सनातनम्।
सुप्रपन्नस्यशेषस्य निपातो वपुषो यदि।। १३५

परंब्रह्म ध्रुवं याति जीवो निर्धूत कल्मषः।
श्रुत्वैतत् ब्रह्मणो वाक्यं शांडिल्यो मुनिपुंगवः।। १३६

ब्रह्माणं प्रष्टु मारेभे बद्धांजलि पुटस्स्वयम्।

पंचरात्रम्

बहुभि स्संहिताभेदै र्विरुद्धं पंचरात्रकम्।। १३७

तंत्रं ततो न निष्ठा स्यात् ततस्तं कथ मर्चयेत्।
अधीता स्सकलावेदा स्सांगोपनिषदो मया।। १३८

निष्ठा मलभमानोऽहं पंचरात्र मधीतवान्।
नात्रापि सम्यङ्निष्ठासी द्यथानिष्ठा भवेन्मम।। १३९

प्रार्थये तत्परं देव मुपदेष्टुं त्वमर्हसि।
सार्धकोटि प्रमाणानि पंचरात्रवचांस्यपि।। १४०

परस्परविरोधीनि नात्रनिष्ठा चतुर्मुख! ।
सर्वेषां जगतामत्र यथा बोधो भविष्यति।। १४१

तथोपदेशः कर्तव्यो मुक्तिः करतले यथा।
इत्युक्तो भगवान् ब्रह्मा शांडिल्येन महात्मना।। १४२

उपदेष्टुं समारेभे पंचरात्रं समग्रतः।
शांडिल्य! योगिनां श्रेष्ठ! पंचरात्रकृतश्रम! ।। १४३

वक्ष्ये तत्पंचरात्राख्यं यन्मां त्वं परिपृच्छसि।

सार्धकोटि प्रमाणं पंचरात्रम्

सार्धकोटिप्रमाणानि पंचरात्रवचांस्यपि।। १४४

अधीत्य तन्मयोभूत्वा भगवंतं समर्चयन्।
आनंद मनुभूयाहं ऋषिभ्य उपदिष्टवान्।। १४५

मत्तः प्रपेदिरे शास्त्रं मुनय स्संशितव्रताः।
हरि मेवार्चयंतस्ते स्वशिष्येभ्य उपादिशन्।। १४६

अधीत्य पंचरात्राणि सर्वेऽपि प्राणिन स्ततः।
मुक्ता स्ते स्वर्गिणः केचित् त्रैण्यासी न्नारकीमही।। १४७

सर्वे पंचरात्रिणः

किंकराः प्रेतराजस्य चिक्रीडु स्ते यथासुखम्।
ततो मया हरि स्साक्षात् तपसैव प्रसादितः।। १४८

सर्वे मायाशास्त्रमोहिताः

मां रुद्रं कपिलं देव मत्रिणं प्राह केशवः।
यूयं कुरुत शास्त्राणि स्वल्पायासफलान्यपि।। १४९

आमुष्मिक विरोधीनि करिष्ये बौद्ध मप्यहम्।
तदाज्ञया वयं सर्वे चकृमैवं पृथक् पृथक्।। १५०

अधीत्य तानि शास्त्राणि फलान्यासाद्य देहिनः।
विनिंद्य पंचरात्राणि दूषयंतः पुनः पुनः।। १५१

नष्टास्ते प्राणिन स्सर्वे पंचरात्रे कृतश्रमाः।
मुक्त्युपायं न जानंति पाषंडोपहता जनाः।। १५२

बहुभि स्संहिताभेदैः भेदं यांति परस्परम्।
यस्मिन् यस्मिंश्च यस्तंत्रे तस्मिन् तस्मिन् धृतव्रतः।। १५३

आराधयन् हरिं भक्त्या मुक्तिमार्गं समाश्रयेत्।

एकत्र दीक्षितः नान्यत्र कर्तव्यः

एकस्मिन् दीक्षित स्तंत्रे नान्यं तंत्रं समाश्रयेत्।। १५४

आश्रयेद्यदि संमोहात् सत्यं नरकाभा ग्भवेत्।
तस्मात् तन्त्रैकबद्ध स्सन् तेनैव पुरुषं यजेत्।। १५५

नान्यथा स्याद्गति स्तस्य स्वतंत्रोक्त क्रियां विना।
पितुर्वचन मक्लिष्टं जीवातुं पंचरात्रिणाम्।। १५६

श्रुत्वा वसिष्ठः प्रारेभे प्रष्टुं तंत्र विशेषवित्।
जानासि सर्वतंत्राणि सन्ति तंत्रा ण्यनेकशः।। १५७

अनुक्त मन्यतो ग्राह्यम्

अनुक्तं परतंत्रेण साधयेत क्रियापरः।
एकतंत्र प्रविष्ट स्सन् तंत्राण्यन्यानि चाभ्यसेत्।। १५८

नोचेत् कर्मविनिंद्य स्यात् क्रियाहीनो भविष्यति।
एवमेव भवानाह पंचरात्रविशारद! ।। १५९

एकस्मिन् दीक्षित स्तंत्रे कर्मकर्तु स्तथान्यतः।
बहुतंत्र समभ्यासाद् भवेत्तस्याधिकारिता।। १६०

तंत्रांतर प्रतिष्ठादौ नाधिकारोऽस्ति कश्चन।
पृच्छंत मेवं तनयं चतुर्भि र्वदनै रपि।। १६१

प्रहसन्नाह भगवान् वसिष्ठप्रमुखान् ऋषीन्।

एकत्र दीक्षित स्सर्वत्र कर्तव्यः

य स्सात्वतेन तंत्रेण दीक्षितस्स्या न्मुनीश्वराः।। १६२

स्वतंत्रे परतंत्रे च तस्य स्यादधिकारिता।
प्रविष्टे पौष्करेतंत्रे तस्याप्य स्त्यधिकारिता।। १६३

पंचसंस्कारवान् सर्वत्राधिकारी

सर्वत्राप्यधिकार स्स्यात् पंचसंस्कारिणो ध्रुवम्।
सर्वास्वपि च दीक्षासु पंचसंस्कार संज्ञिता।। १६४

दीक्षाश्रेष्ठतरा प्रोक्ता सैव प्रीतिकरी हरेः।
तापः पुंड्र स्तथा नाम मंत्रो यागश्च पंचमः।। १६५

पंचसंस्कारदीक्षैषा देवदेव प्रियंकरी।
अनया दीक्षितो यस्तु स सर्वत्राचरेत् क्रियाम्।। १६६

तेनै वाराधितो देवो भुक्ति मुक्तिप्रदो भवेत्।
ततोगस्त्यो मुनिश्रेष्ठो भगवंतं पितामहम्।। १६७

प्रदक्षिणीकृत्य नत्वा ततः प्रष्टुं समारभत्।
विस्तरं पंचरात्राख्यं हृदि सम्यङ्नधार्यते।। १६८

यथासुखं ते जानीम तथा न उपदिश्यताम्।
अगस्त्यस्य वच श्श्रुत्वा सर्वलोकपितामहः।। १६९

यदाह भगवान् स्वस्मै तद्वक्तु मुपचक्रमे।
पुराहं पंचरात्राख्य मभ्यस्य परमं महत्।। १७०

शास्त्रारंभः

अजानानः स्थिरीभावं पुन रीश मवंदिषम्।
स्वामिन्! सर्वजगन्नाथ! सर्वभूत प्रियावह!।। १७१

बहूपदेशा न्नैवाहं स्थिरीभाव मुपागतः।
उपाये नोच्यतां ब्रह्मन्! अस्तिचे न्मय्यनुग्रहः।। १७२

एव मुक्तो मया देवः सर्वभूतहिते रतः।
उपदेष्टुं समारेभे मह्यं जिज्ञासते विभुः।। १७३

इति श्रीपांचरात्रे श्रीविष्णुतिलके ब्रह्मोपदेशे
शास्त्रावतरणंनाम प्रथमोऽध्यायः

अथ स्वर्गादिवर्णनं नाम द्वितीयोऽध्यायः

भगवत् ब्रह्मणोः संवादः

उपदेक्ष्यामि ते ब्रह्मन्! शास्त्र मेकमना श्शृणु।
सार्थकोटि प्रमाणेन ह्युपदिष्टं मया पुरा।। १

श्रेयसे सर्वजन्तूनां भुक्तये च विशेषतः।
सुखबोधाय सर्वेषां तन्त्रसार इहोच्यते।। २

मा मनन्यमना स्सम्यक् आराध्य यदि मां भजेत्।
स मुक्तिं भजते जन्तुः भक्तिं च सविशेषतः।। ३

ज्ञानम्

ज्ञायते येन तद्ब्रह्म तत् ज्ञान मिति कथ्यते।
ज्ञानेन ब्रह्म जानीयात् सततं ध्यान मास्थितः।। ४

अव्यक्त मच्युतं ब्रह्म नादिमध्यान्त मक्षरम्।
नित्यतृप्तं निरुपमं निर्मलं परमं महः।। ५

ब्रह्मस्वरूपम्

विकारो नैव वर्णानां तमस स्तत्परं महत्।
नोष्णं नशीतं मिश्रं वा सर्वाकारं निरामयम्।। ६

निराकारं परंतत्त्वं न ज्ञाता तस्य विद्यते।
मुमुक्षुभि स्तद्विज्ञेयं सर्वत्र व्याप्य वर्तते।। ७

तत् कारणवशात् आसीत् चिद्घनं स्फटिकप्रभम्।
अनेकार्केन्दु वह्नीनां तेजोराशि रिवामलम्।। ८

भानुचक्रान्तरगतं द्विहस्तं चक्रधृत् परम्।
किरीट हार केयूर श्रीवत्स वनमालिकम्।। ९

मंजीर पीतवसनं चारुकुण्डलमण्डितम्।
तद्ध्येयं योगिभि र्नित्यं वासुदेवाह्वयं महः।। १०

चत्वारो व्यूहाः

चत्वारो जज्ञिरे तस्मात् व्यूहाख्याः पुरुषोत्तमाः।
सर्वालंकार संयुक्ताः सर्वशक्तिमयाः पुनः।। ११

श्रीवत्सकौस्तुभोरस्काः नित्यानन्द स्वरूपिणः।
तमाल काश कुसुम नीलाब्ज समतेजसः।। १२

चतुर्भुजो वासुदेवः स हि नारायणः स्मृतः।
वासुदेवादयः सर्वे केशवादीन् अजीजनत्।। १३

ते ऽसृजन् नारसिंहादीन् मत्स्यादीन् मूर्ति संज्ञितान्।
प्रथमो वासुदेवाख्यः, संकर्षण समाह्वयः।। १४

द्वितीयः कथितो, ब्रह्मन्! प्रद्युम्न स्तदनन्तरः।
अनिरुद्ध स्तुरीय स्स्यात् इमे स्युः व्यूहमूर्तयः।। १५

भगवत्सृष्टि प्रारंभः

समुद्रः, माया, पद्मनाभः, न्यग्रोधः

ततो नारायणो देव स्तोयराशि मजीजनत्।
अनिरुद्धोऽसृजन्मायां सासीत् ते सृष्टिसाधनम्।। १६

पद्मनाभः परो जज्ञे अनिरुद्धा न्महात्मनः ।
माया न्यग्रोध मसृजत् शाखाशत समंचितम् ।। १७

ब्राह्म्यादि मूर्तय श्चाष्टौ नारायण समाह्वयात् ।
मत्स्यादिमूर्तय स्सर्वे वासुदेवाच्च जज्ञिरे ।। १८

पुरुषाद्याश्च चत्वारो जाता स्संकर्षणा दपि ।

हयग्रीवः, अनंतः, गरुडः, देव्यः, पार्षदाश्च

संकर्षणात् हयग्रीवो जातो ज्ञानमयो हरिः ।। १९

अनन्तः पन्नगेशानः चक्राद्यखिलहेतयः ।
गरुडः पक्षिणामिंद्रो वाहनं भूषणान्यपि ।। २०

अष्टौ श्रियादयो देव्यः श्रीवत्सात् दिव्यलांछनात् ।
जज्ञिरे कुमुदाद्याश्च अनिरुद्धान्महात्मनः ।। २१

पादतो जज्ञिरे तस्य बृंदं बृंदं सहस्रशः ।

विश्वमूर्तिः

विश्वमूर्ति स्स्वयंजात अनिरुद्धो महाकृतिः ।। २२

सहस्रशीर्षचरण हस्तनेत्र नसाश्रुतिः ।
स्वांगा दजीजन द्विश्वं शृणुष्व कमलासन! ।। २३

जज्ञाते वह्नि रिंद्रश्च विश्वमूर्तेः मुखांबुजात् ।
जज्ञिरे चषडंगानि मुखात् तस्मान्महात्मनः ।। २४

मूर्ध्नो द्यौः नयनात् सूर्यः चन्द्रमा मनसोऽभवत् ।
दिशो दशाभवन् श्रोत्रात् नाभे स्त्वं धरणी पदः ।। २५

प्राणात् वायुः अपानेभ्यो मृत्यवो जज्ञिरे पृथक् ।
अंबुदाः केशपाशेभ्यो धियः कालाश्च जज्ञिरे ।। २६

वनस्था अपि चौषध्यो रोमकूपात् विनिस्सृताः ।
ब्राह्मण क्षत्र विट्छूद्राः मुखबाहूरुपद्भवाः ।। २७

परमाणु स्वरूपेण श्रुतिभि स्सहितं जगत् ।
तस्मिन् तेजसि विश्रांतं तत आसीत् विकस्वरम् ।। २८

जीवः

जीवः कौस्तुभरूपेण विश्रान्तो ब्रह्मतेजसि ।
इच्छया वासुदेवस्य जगत्यस्मिन् प्रपंचितः ।। २९

ध्यानयागार्चनैः यो मां सततं पर्युपासते ।
जगत स्स विनिर्गत्य पुन र्मे कौस्तुभं भजेत् ।। ३०

कौस्तुभाख्यो मणि र्जीवः चिद्घन स्स निरामयः ।
अनाद्यन्तं भवेत् रत्नं सततं मय्यवस्थितम् ।। ३१

दीपा द्दीपो यथा वृद्धिं प्राप्य भाति तत स्ततः ।
तथा जगति जीवस्य वृद्धि रद्य प्रपंचितः ।। ३२

जीवस्य वृद्धि र्जगति ह्रासो मयि न चान्यधा ।
नोत्पत्तिः न मृति स्तस्य जीवस्य चतुरानन ! ।। ३३

जगत्

ब्रह्म जीवो जगच्छेति त्रैविध्य मिहवर्तते ।
तेजोराशि र्भवेद्ब्रह्म भूतराशि रिदं जगत् ।। ३४

ज्ञानराशिः भवेज्जीव उत्पत्ति लयवर्जितः ।
ब्रह्मणोस्य जगत्कर्तुः द्रव्य मासीदिदं जगत् ।। ३५

मणिरत्न प्रभावेन विकसत्यखिलं जगत् ।
यदा जीवावियोग स्स्यात् तदा मौन मिदं जगत् ।। ३६

जगदस्मिन् कृशे विश्वं भजेत परमाणुताम् ।
ह्रासमेव समासाद्य सोऽणुः ब्रह्मणि लीयते ।। ३७

एवं स्रष्टाऽनिरुद्धोऽयं विश्वरूपी जगत्प्रभुः ।
श्रियादिदेवीभि स्सार्ध मनंतासन मेयिवान् ।। ३८

तोयराशिः पयोराशे स्तस्मिन् न्यग्रोध पल्लवे ।
शेषे शयान इंद्राद्यैः जगत्तत् पर्यपालयत् ।। ३९

चतुर्मुखस्य सृष्टिः

त्वत्सृष्टिं अधुना वक्ष्ये शृणुष्व कमलासन! ।
नारायणांशे महति पयोराशौ पटच्छदे ।। ४०

मायया निर्मिते पद्मनाभस्यानंतशायिनः ।
अनिरुद्धांशजातस्य नाभौ पद्मं महद् बभौ ।। ४०

सहस्रदळ पर्यंतं रव्यग्नींदु समप्रभम् ।
अण्डं हिरण्मयं मध्ये द्योतयत् सकलादिशः ।। ४२

अण्डं द्विधा स्वयं भिन्नं तन्मध्ये त्वं चतुर्मुखः ।
जज्ञिषे सकलान् लोकान् स्रष्टुं विश्वेश्वरेच्छया ।। ४३

सृष्टमात्रे त्वयि ततः परमं ध्यान मास्थितः ।
ध्यायत स्ते पुरो जज्ञे विद्युत् संघात मब्जज! ।। ४४

तन्मध्ये पुरुषः कश्चित् पीतवासा श्चतुर्भुजः ।
श्रीवत्सकौस्तुभोरस्कः किरीटादि विभूषणः ।। ४५

सर्वायुधावृत श्श्रीमान् स वेदान् वैष्णवागमान् ।
उपदिश्यास सोऽदृश्य स्तत स्स्रष्टा त्व मब्जज! ।। ४६

रहस्यं परमं वक्ष्ये वृद्धिः ह्रास स्ततो भवेत् ।

गुणचतुष्टयम्

सत्वं रज स्तमः पश्चात् आनन्दाख्यो गुणा इमे ।। ४७

वृद्धिः ह्रासोस्य जगतः एभिरेव न चान्यथा ।
संसारगोचरा आद्या जगद्बद्धौ निवेशिताः ।। ४८

आनन्दाख्य स्तुरीयस्तु जगद्ध्रासाय युज्यते ।
ह्रासाय वृद्धये चापि युज्यते प्रथमोगुणः ।। ४९

सृजामि रजसा विश्वं सत्वतः पालया म्यहम् ।
तमसा संहराम्येतत् इमे सांसारिकागुणाः ।। ५०

आनन्देन तुरीयेन पाशितो मोचया म्यहम् ।
आद्यं गुणं समासाद्य मध्यमौ द्वौ परित्यजेत् ।। ५१

स तुरीयं समासाद्य संयुज्यात् मम कौस्तुभे ।
गुणौ द्वौ मध्यमौ प्राप्य जगत्येव लुठन्ति ते ।। ५२

सत्वाधिको मध्यलघुः यो हि मां पर्युपासते।
सप्राप्य मत्समं रूपं जगत्याराध्यते परैः।। ५३

मणिरत्ने विलग्नस्य सायुज्यगति रुच्यते।
भगवद्रूप मासाद्य यो जगत्यर्च्यते परैः।। ५४

स सारूप्यगतिः प्रोक्तः भगवद्भक्ति वैभवात्।
सालोक्यमपि सामीप्यं तत्र भेदः प्रकीर्तितः।। ५५

त्रैगुण्याद् बध्यते जन्तुः तद्वियोगात् प्रमुच्यते।
जगन्मयीयं प्रकृतिः बद्धा सत्वादिभि र्गुणैः।। ५६

ब्रह्मानंदमयं विंद्यात् स जीवो निर्गुणोऽब्जज! ।
जगतः प्रकृति र्नाम सा त्रैगुण्यमयी विधे! ।। ५७

प्रकृतिसन्तानम्।

प्रकृत्या पुरुषो बद्धः कर्म तत्तत् समाचरेत्।
कर्म प्रकृति सन्तानं कथ्यते कमलासन! ।। ५८

क्रिया बलीयसी पुंसः पाशयेच्च पुनःपुनः।
पाशितः कर्मणा जन्तुः भजते जन्मसन्ततिम्।। ५९

सत्कर्म यदि कुर्वीत तत्फलं पुरुषोऽश्नुते।
असच्चेत् कर्म कुरुते स पुमान् दःख माप्नुयात्।। ६०

तस्मात् किम प्यकुर्वाणः छित्वा प्रकृतिसन्ततिम्।
मां भजेत तपोध्यानैः मुमुक्षु श्चतुरानन! ।। ६१

पुरुषः प्रकृति श्चेति रूपे द्वे चतुरानन! ।
ते नित्ये मम बुध्यस्व प्राणिना मस्म्यहं गतिः।। ६२

पुरुषाधिष्ठितात् तस्मात् जगतो महदाह्वयम्।
तत्त्वं तत्र गुणै स्साकं जज्ञे पुरुषमोहनम्।। ६३

तत्त्वसृष्टिः।

अहंकारा स्त्रयोजाताः सकाशात् तस्य तत्त्वतः।
वैकारिकश्च तैजस्को भौतिकश्चेति ते त्रयः।। ६४

वैकारिका दहंकारात् पंचज्ञानेन्द्रिया ण्यपि।
कर्मेन्द्रियाणि पंचापि तेजस्कात् जज्ञिरे पुनः।। ६५

भौतिकात् शब्दतन्मात्रं तच्चाकाश मजीजनत्।
आकाशात् स्पर्शतन्मात्रं तस्मा द्वायु रजायत।। ६६

मरुतो रूपतन्मात्रं तदप्यग्निं अजीजनत्।
अग्नेश्च रसतन्मात्रं तस्मा दापोऽपि जज्ञिरे।। ६७

ताभ्यो गन्धाख्यतन्मात्रं तस्मा दासीत् वसुंधरा।
शब्दैकगुण माकाशं शब्दस्पर्शगुणोऽनिलः।। ६८

रूपेण ताभ्यां सहितः त्रिगुणो हव्यवाहनः।
पूर्वत्रयो रसश्चापि चातुर्गुण्यं अपां स्मृतम्।। ६९

शब्दस्पर्शौ रूपरसौ गन्धः पञ्चगुणा मही।
महत्या तत्त्वसंहत्या सृष्टा स्ता स्सकलाः प्रजाः।। ७०

संहति र्यत्र भूतानां तत्र सन्नीयते पुमान्।

द्विविधं ज्ञानम्।

ज्ञानन्तु द्विविधं ब्रह्मन्! सत्त्वाख्यं च क्रियाख्यकम्।। ७१

सत्त्वस्य क्रियया सिद्धिः साऽपिस्या दभिचारिणी।
यमश्च नियमश्चेति क्रियाख्यं द्विविधं स्मृतम्।। ७२

सत्त्वाख्यं ज्ञान माप्नोति ताभ्यां कमलसंभव! ।
जानीहि ब्रह्ममित्रं तत् सत्वाख्यं ज्ञान मुत्तमम्।। ७३

ज्ञेयं ज्ञानेन तद्ब्रह्म शर्मण्यानन्दतेजसि।

ब्रह्मलक्षणम्

लक्षणं ब्रह्मणो वक्ष्ये तद्गतैकमनाः श्रुणु।। ७४

अविक्रियं दिव्यरूपं स्वयं वेद्यं निरंजनम्।
निर्दोष मनवच्छिद्रं अस्पृष्टं निर्विकल्पकम्।। ७५

अद्वन्द्व मक्षयं शान्तं अर्कज्योति रनामयम्।
चिदानन्दस्वरूपं तत् अदृष्टान्त मबुद्धिमत्।। ७६

स्वभावनिर्मलं शुद्धं गतागतविवर्जितम्।
निर्मर्यादं निस्तरंगं निर्विकारं निराकुलम्।। ७७

प्रभवं सर्वभूतानां वासुदेवाह्वयं महः।
हीनवर्णैः मोक्षमाणैः असंसेव्य मतर्कितम्।। ७८

सततं योगिभि र्ध्येयं अध्येयं चाप्यगोचरम्।
प्रधानप्रकृते रन्यत् भोग्यं भोक्तृनिराश्रयम्।। ७९

सर्वतोऽक्षिशिरोवक्त्र श्रुतिपाणिपदं परम्।
अन्तर्बहिश्च सर्वत्र स्वयं व्याप्य प्रकाशते।। ८०

ओंकार मक्षरं व्यक्तं मायारूपं शिवंकरम्।
मूलमन्त्रात्मकं नित्यं अव्यक्त मज मच्युतम्।। ८१

महतोऽपि महद्ब्रह्मन्! अणोरणुः मृदोर्मृदु।
अमायं चिद्घनं मूर्तं अमूर्तं ब्रह्मतत् विधे! ।। ८२

ब्रह्मणः प्रतीक समर्थनम्

ज्ञाने क्षणेन पश्यन्ति ब्रह्मतत्पांचरात्रिणः।
ब्रह्मणा सकलं विश्वं सृष्टं तत् सर्वपाणिना।। ८३

देशकाल विशेषेण सर्वतो व्याप्य तिष्ठति।
तस्मात् सर्वत्र चरणं ब्रह्मेति परिकीर्त्यते।। ८४

अथोर्ध्वं तिर्यगुच्छै श्च भासय त्यखिलं जगत्।
ततस्तत्सर्वतश्चक्षुः वस्तुजातं पुरस्थितम्।। ८५

सर्वत्र ब्रह्मण स्तस्य तस्मात्तत्सर्वतो मुखम्।
आश्रयन्ते हृषीकानि ज्ञानाख्यानि यथा शिरः।। ८६

तथा नानाश्रयत्वेन स ज्ञेयः सर्वतः शिराः।
दूरस्थं वा विदूरस्थं यत्र कुत्रापि वा गतम्।। ८७

श्रुणोति शब्दसंघातं तेनासौ सर्वतः श्रवाः।
भिन्नो वह्निरयःपिण्डात् अभिन्न इव लक्ष्यते।। ८८

तद्वद्व्यक्तात् पृथक् भूतो व्यक्तमावृत्य तिष्ठति।
दर्पणस्योदरे भाति बहिस्थाः प्रतिमा यथा।। ८९

दृश्यते तत्र तत्रैतत् तस्मा दव्यक्त रूपता।
ज्ञानं नैवेन्द्रियाधीनं सर्वत्रास्य स्वभावतः।। ९०

सर्वज्ञः कथ्यते तस्मात् तद्ब्रह्म चतुरानन! ।
अनादि जननाभावात् अनन्तं तदनाशतः।। ९१

आद्यन्तयो श्च राहित्यात् अमध्यं कमलासन!।
व्याप्त्या सर्वत्र सक्तस्य परोक्षत्वा दसत्पुनः।। ९२

त्रिभिर्गुणै रबद्धोऽपि बद्धव त्तेषु तिष्ठति।
यथा पुष्करपर्णेषु स्वच्छ मंभः प्रतिष्ठितम्।। ९३

अन्तर्बहि रभिव्याप्य तिष्ठत्येको महार्णवे।
निमग्नस्यैव कुंभस्य बहिरन्त रपां स्थितिः।। ९४

परक्षेत्रज्ञयो * रैक्यं आत्मनो श्श्रुतिचोदितम्।
क्षेत्रज्ञस्य बहुत्वं हि देहभेदात् प्रतीयते।। ९५

यथा नानाविधै र्द्वारैः पुरान्निर्यान्ति देहिनः।
निर्यान्ति ब्रह्मण स्तस्मात् स हि सर्गो निगद्यते।। ९६

अन्त र्विशन्ति तै र्द्वारैः यथा तत् पुरवर्तिनः।
तथैव यान्ति तद्ब्रह्म सा हि संहति रुच्यते।। ९७

ज्योतिर्मण्डलमध्यस्थं रुक्माभं द्विभुजं विभुम्।
भासयन्तं जगत्सर्वं तेजःपुंजै स्स्ववर्तिभिः।। ९८

ब्रह्ममध्ये भ्रुवोर्मध्ये नाभिचक्रे गळावटे।
जिह्वाग्रे तालुमध्ये च भावयन्ति जितेन्द्रियाः।। ९९

ध्यात्वा ध्यात्वा परंब्रह्म लीयन्ते ब्रह्मतेजसि।
अग्निमध्ये यथा स्वर्णं भासते सक्तवत् पृथक्।। १००

तथा ब्रह्मणि लग्नोऽपि मणिरूपेण दृश्यते।
जगत्करीषवद्भाति वत्सरूपेण तेजसि।। १०१

जगतः नित्यत्व समर्थनं

वृद्धिर् हासोऽस्ति जगतो जीवयोग विरामतः।
महदादीनि तत्त्वानि नित्यान्येव नसंशयः।। १०२

---

* रेकीभवनं श्रुतिचोदितम्

तत्त्वानां नित्यत्वम्

नोत्पत्ति र्नलय स्तेषां विकास ह्रास माप्नुयुः।

जगज्जीवसंयोगः

स्थितिस्तेषां जगत्येव गुह्यमेतत् चतुर्मुख! ।। १०३

यथाऽर्कशशिनोर्योगः तथा श्रीवत्सरत्नयोः।
श्रीवत्सरत्नयो र्योगात् विकासः प्रकृतेरपि।। १०४

सर्गकाल स्तयोर्योगे विरामे प्रळयोमहान्।

चित्तप्रसादनम्

चित्तप्रसादनाद् ज्ञानं तत्प्रकारोऽद्य कथ्यते।। १०५

वाय्वोपरागरहितं निर्मलं तस्य जायते।
विज्ञानं तस्य भगवत् समाराधन कर्मभिः।। १०६

अनाथ विलयोयोगो योगांगैश्च यमादिभिः।
शौच मिज्या तपश्चर्या स्वाध्यायाभ्यसनं तथा।। १०७

परदारपरद्रव्य वैमुख्यं शास्त्रसेवनम्।
अश्रद्धता भोजनादौ स्नानं तीर्थनिषेवणम्।। १०८

ब्रह्मचर्यं मिताहारो मौन मिन्द्रियनिग्रहः।
अहिंसा चोपवासश्च दुष्टाहार विवर्जनम्।। १०९

अक्रूरता वृद्धसेवा क्षमा मैत्रोदय स्तथा।
वैराग्यं पुत्रदारेष्वप्येतै श्चित्तप्रसादनैः।। ११०

ज्ञानं प्रत्यङ्मुखं भूयात् तेन याति परं महः।

संसृतिबंधन हेतुः

शुभाशुभात्मकं कर्म कृत्वा मायावशं गताः।। १११

भोगायतन मासाद्य तत्तत्कर्म प्रवाहजम्।
दुःखं सुखं वा पुरुषाः भुंजते ये जितेन्द्रियाः।। ११२

संसृतिः सा चतुर्वक्त्र! तस्याः कर्मैव कारणम्।
करोति कर्म चाविद्या विवशः पुरुषः स्वयम्।। ११३

चित्तप्रसादनैः सर्वैः भूयात् संसृति संक्षयः।
क्षीणेकर्मणि संसार हेतौ मुक्तिरनन्तरम्।। ११४

अविद्या

अविद्याविवशः कर्म कुरुते पुरुषः स्वयम्।
सत्वं रज स्तमश्चेति तिस्रो विद्या श्चतुर्मुख! ।। ११५

ताभि र्निबध्यते जन्तुः तद्वशः कर्म कारयेत्।
गुणत्रयमयी विद्या मायेति ह्यवधारय।। ११६

मायाया स्त्रिविधा मूर्तिः निद्रा कर्माथ मोहिनी।
सत्त्वादिगुण रूपास्ताः ताभि स्संसरते पुमान्।। ११७

श्रद्धाभक्तिः समाधिश्च त्रिविधा मुक्तिहेतवः।

आदिसृष्टिप्रकारः

विद्याभि स्ताभिरेवायं संसृते र्मुच्यते पुमान्।। ११८

सर्वाकार विनिर्मुक्त रूपं मे परमात्मनः।
दुर्विज्ञेय न्तदन्येषां श्रद्धादीना मगोचरम्।। ११९

अव्यक्तं व्यक्तिमापन्नं कदाचित् पुरुषेच्छया।
अहं जातस्ततोऽव्यक्तान् मत्तोऽजन्यप्यहंकृतिः।। १२०

जज्ञिरे खल्वहंकारात् तन्मात्राण्यपि पञ्च च।
एकादशापीन्द्रियाणि तस्मादेव चतुर्मुख।। १२१

महत्तत्वं पृथिव्यादि पञ्चकं च यथाक्रमम्।
चेतनाचेतने चोभे सृष्टिरेषावधारय।। १२२

उत्तमाद्या स्त्रिविधाः

जीव प्रकृति संयोगः सृष्टेः सर्वत्र कारणम्।
सत्त्वाधिक गुण श्श्रेयान् उत्तम स्स उदाहृतः।। १२३

रजोगुणाधिको मध्यो जघन्य स्तामसाधिकः।
सत्त्वाधिका यजन्ते मां सर्वान्देवान् रजोधिकाः।। १२४

देवयोनी न्यजन्त्येऽन्ये जघन्या स्तामसाधिकाः।
जघन्या नरकं यांति मध्यमा स्स्वर्गिणो विधे! ।। १२५

मामेव यान्ति श्रेयांसः तत्त्वं हृदि विचिन्तय।
भुक्त्वा बहूनि दुःखानि पुनर्जन्मी किलान्तिमः।। १२६

अश्वमेधादिकानिष्ट्वा मध्यमा श्च तथा व्यधान्।
गत्वागत्वा निवर्तन्ते यज्ञधर्म परायणाः।। १२७

मा मेव शरणं प्राप्य यज्ञ माराधयन्ति ये।
तेऽद्यापि न निवर्तन्ते श्रेयांस श्चतुरानन!।। १२८

गुणिनां लक्षणम्

सत्त्वाख्य गुण युक्तस्य लक्षणं वक्ष्यतेऽधुना।
शौचं धृतिः क्षमा मौनं तपो ज्ञानमतः परम्।। १२९

सत्यं शम स्सात्त्विकस्य गुणाः कळ्याणकारिणः।
दम्भः क्रोध स्तथा दर्पः अहंकार इतीदृशाः।। १३०

राजसस्य गुणाः प्रोक्ताः मुक्तिमार्ग विरोधिनः।
निद्रालस्यं च पैशुन्यं नृशंसं धर्मनाशनम्।। १३१

तामसस्य गुणा एते कथिताः कमलासन!।

शरीरादि तपश्चर्या

कायेन मनसा वाचा तप स्त्रिविध माचरेत्।। १३२

गुरुदेवद्विजप्राज्ञ पूजाशौचमथार्जवम्।
ब्रह्मचर्य महिंसाच तप श्शारीर मुच्यते।। १३३

अनुग्रहपरा वाचि भूताना मुपकारिता।
स्वाध्यायो वेदमंत्राणां कथितं वाचिकं तपः।। १३४

निष्ठा ब्रह्मणि संतोषः सौम्यभावो मन श्शुचिः।

सात्त्विकादि तपः

ज्ञानाख्येंद्रिय वश्यं च तत्प्रोक्तं मानसं तपः।। १३५

फलाभिसंधिरहितं तत्तपं सात्त्विकं मतम्।
आत्मनः फलसिद्ध्यर्थं तदुक्तं राजसं तपः।। १३६

परेषां कार्यसिद्ध्यर्थं जयनिग्रह हेतवे।
तदुक्तं तामसं ब्रह्मन्! बुद्ध्या त्वमवधारय।। १३७

सूते प्रकृति रापन्नाः व्यक्तं सर्वं चराचरम्।
पुनश्चलीय्यते तत्र ब्राह्मा युषि गतेसति।। १३८

ब्रह्मणोवयांसि

कलेर्युगसहस्रे द्वे दिवारात्रं तवाभवत्।
तेनैववत्सरोब्रह्मन्! षष्ट्युत्तरशतत्रयैः।। १३९

ब्रह्मणः शतमब्दास्युः तदन्ते प्रळयो महान्।
एकस्य ब्राह्मघस्रस्य मनवस्यु श्चतुर्दश।। १४०

एकोनसप्ततिः कालाः मनोरेकस्य यांति हि।
अवान्तराश्च प्रळया ब्रह्मणो दिनमानतः।। १४१

चक्रयुक्तं यथा चक्रं अविरामं विवर्तते।
तथा विरामं लोकोऽयं वर्तते सततं विधे! ।। १४२

यात्यायाति चतुर्वक्त्र! स्वामिन्या पुरुषेच्छया।
दिनक्षये ब्रह्मणोऽस्य रुद्र स्संहरते प्रजाः।। १४३

सायं संहरते रुद्रः प्रातः सृजति पद्मजः।
ब्रह्मारुद्रश्च द्वावेतौ सर्गसंहारकारिणौ।। १४४

वासुदेवादयस्सर्वे बहून्यण्डानि सस्रजुः।

अण्डसृष्टिः

प्रत्येक मण्डरूपाणि वक्तुं नामानि कः क्षमः।। १४५

वासुदेवादिभिः स्रष्टाः ये ये देवस्य मूर्तयः।
तैरप्यण्डानि सृष्टानि को वा ब्रूयात् पृथक् पृथक्।। १४६

योगिनो योग माहात्म्यात् भित्वाण्डं यान्ति तत्पदम्।
अण्डस्यैकस्य रूपं च स्थितिं वक्ष्ये चतुर्मुख!।। १४७

अतलादिः

भूमेरधस्तादतलं तदथो वितलाह्वयम्।। १६७

तदधः सुतलो लोक स्तदधो महदाह्वयः।
रसातल स्ततोधस्ता त्ततोधस्ता त्तलातलः।। १६८

पाताळाख्य स्ततोधस्ता दिमे सप्तातलादयः।
योजनानां सहस्राणि दशैतेष्वतलादिषु।। १६९

मनुष्याद्या महीलोके दानवा द्यतलादिषु।
अतलादिभवाभोगा न स्वर्गेऽपि कदाचन।। १७०

तेजोभिः सर्वरत्नानां व्याप्तास्त अतलादयः।
चन्द्रतारार्कवह्नीनां तेजःकांक्षा न विद्यते।। १७१

न स्वर्गेपि मतिर्भूयात् अतलादिनिवासिनाम्।
कपिलोनाम भगवान् साक्षाद्विष्णु स्सनातनः।। १७२

पाताळे नागराजेन्द्रै रास्ते पारिषदै स्सह।
तापसीं तनुमासाद्य विष्णुरेषोनपायिनीम्।। १७३

शेषोनाम महानागो बिभर्ति शिरसा जगत्।
अधस्तादस्य नागस्य कूर्मः कालानलाह्वयः।। १७४

शिखा सहस्रजटिलो दुर्निरीक्ष स्सुरासुरैः।
अधस्ता त्तस्य शुक्रस्य शक्ति राधारसंज्ञिता।। १७५

तदधोण्ड कटाहस्था ज्जानीहि कमलासन!।।
इमे तु फलभूभागाः पुण्यरूपस्य कर्मणः।। १७६

नरकलोकः

अथो मह्याजलस्यापि नारकीनाम मेदिनी।
रौरवाख्यश्च नरको महारौरव संज्ञिकः।। १७७

तप्तपूतलिकाख्यश्च कुम्भीपाकाह्वय स्तथा।
शूलारोपण संज्ञश्च सूच्यग्राख्य निषेवणम्।। १७८

क्षुरखण्डाभिधानौ द्वौ सूकरीतैलकुम्भिका।
असिपत्रवनं चापि महाज्वाला च कंपिनी।। १७९

व्याघ्रसिंहभयारण्यं पूयशोणितकर्दमम्।
शाल्मल्योहेमवृक्षाश्च तप्तस्तंभोऽपि सेवनम्।। १८०

देहिकर्मानुगुण्येन वर्तन्ते फलभूमयः।
नरकेष्वपि दृश्यन्ते भोगिभोग्यैक भूमयः।। १८१

न स्वर्गो नापि नरको योगसंस्कृत चेतसाम्।

भुवर्लोकादि वर्णनम्

भुवर्लोकादिलोकानां शृणु लक्षण मब्जज! ।। १८२

भुवः समो भुवर्लोको भूमेरुपरि वर्तते।
उपरिष्टाद्भुवोभानुः सहस्रकिरणान्वितः।। १८३

सप्तभिः तुरगैः सार्धं एकचक्ररथोपरि।
ब्रह्मणो नगरीं त्यक्त्वा सर्वतः परिवर्तते।। १८४

भूभान्वोरंतरं प्राहुः भुवर्लोकं मनीषिणः।
तिर्यगूर्ध्वं मधश्चापि पतगस्य मरीचयः।। १८५

ब्रह्मणः सदनं प्राप्य प्रादक्षिण्या न्निवर्तते।
भुवर्लोके वसंत्येते सिद्धविद्याधरादयः।। १८६

अर्काल्लक्षमिताधूर्ध्वं चंद्रस्थानं समीरितम्।
संचरन्ति ततश्चोर्ध्वं नक्षत्राणि चतुर्मुख!।। १८७

उच्चैर्लक्षत्रयात्सौम्यो व्योम्नि संचरते ग्रहः।
लक्षद्वयमतीत्यास्ते भार्गवः तेजसां वरः।। १८८

योजनात्तु ततो भौमः ततो योजनतो गुरुः।
गुरोरूर्ध्वं लक्षमिता द्रविपुत्रस्य संस्थितिः।। १८९

लक्षलक्षोर्ध्व्य देशेषु नक्षत्राणां पदं विदुः।
सहस्रमृषयस्सन्ति तदुप र्यूर्ध्व तेजसः।। १९०

तेषां मध्ये ध्रुवोनाम राजाऽस्ते तेजसां पतिः।
द्वादशारं जगच्चक्रं भ्रामयन् जगदव्ययम्।। १९१

चक्रस्यनाभिमध्येयं ध्रुव एकः प्रकाशते।
आदित्यध्रुवयोर्मध्ये स्वर्गदेश श्चतुर्मुख!।। १९२

स्वर्गः

विमाने तत्र गीर्वाणाः संचरन्ति इतस्ततः।
ज्योतिस्वरूपिणः सर्वे तत्र गंगामहानदी।। १९३

तत्र चिन्तामणीरत्नं कामधेनु स्सुरद्रुमाः।
क्रीडंत्यप्सरस स्तत्र पीयूषं देवनिर्मितम्।। १९४

ऐरावतश्च नागेन्द्रः तथै वोच्छैश्श्रवाः पुनः।
साक्षादुपेन्द्रो भगवान् सिद्धविद्यधरादिभिः।। १९५

इन्द्रेण पालयन् स्वर्गमास्ते कमलसंभव!।
ध्रुवोपरि महालोकः कोटियोजनसम्मितः।। १९६

जनोलोक स्ततो भाति कोटिद्वयतलोपरि।
ततस्तपोमयोलोकः शतकोटिभिरष्टभिः।। १९७

सत्यलोक स्तद्विगुणः स ते कमलसम्भव!।
मुनीनां तत्पदं विद्धि तपसा भावितात्मनाम्।। १९८

लक्षयोजन विस्तीर्ण सालप्रासाद वेष्टितम्।
उत्तरेसत्यलोकस्य विष्णुलोकः सुखाकरः।। १९९

वर्तते शिवलोकोऽपि सत्यलोकस्य दक्षिणे।
यावान् सत्यस्य विस्तार स्ता वत्स्याद्वैष्णवं पदम्।। २००

तावदेव शिवस्यापि लोकः कमलसंभव!।
सर्वैः पारिषदैः सार्धं विष्णुर्लोके महीयते।। २०१

तथैव प्रमथैः सार्धं स्वलोके भासते शिवः।
विष्णुलोकश्च वैकुण्ठं जानीहि कमलासन।। २०२

अण्डानि।

अण्डभित्ति रुपर्यास्ते कोटियोजन सम्मिता।
हिरण्मयानि चाण्डानि चैवं चित्राणि विद्धिहि।। २०३

वर्तन्त एव प्रत्यण्डं भुवनानि चतुर्दश।
अनेनाण्डकटाहेन लोकाः सर्वे समावृताः।। २०४

विभांत्यण्डेषु ते लोकाः सूत्रेषु मणयो यथा।
अण्डं दशगुणेनैव वारिणा परिवेष्टितम्।। २०५

ततो दशगुणोवह्नि स्तद्वार्यावृत्य वर्तते।
स वायुना तद्वदेव स व्योम्ना च समावृतः।। २०६

सर्वं दशोत्तरं विद्धि व्योम तन्महदावृतम्।
एवमण्डानि सर्वाणि संख्यावक्तुं न शक्यते।। २०७

सर्वाणि चाण्डान्यावृत्य चैकोनारायणः स्थितः।
मया दिङ्मात्रमत्रोक्तं चतुरानन संप्रति।। २०८

इति श्रीपांचरात्रे श्रीविष्णुतिलके ब्रह्मोपदेशे
स्वर्गादिवर्णनं नाम द्वितीयोऽध्यायः

अथ वर्णाश्रम धर्म निरूपणं नाम
तृतीयोऽध्यायः

ऋषिभिः कृत वर्णाश्रम विषयक प्रश्नः।

विररामोपदिश्यैवं पुरुष स्ससनातनः।
तत स्तं पुरुष श्रेष्ठ मपृच्छन् मुनिसत्तमाः।। १

कियन्तो जातयो ब्रह्मन्! तथा वर्णाश्रमाः प्रभो!।
धर्मश्च कीदृश स्तेषां योगयुक्त श्च कीदृशः।। २

कृपयो पदिशस्वाद्य त्वां विना न परागतिः।
मामुवाच ततो देवः कृपया मुनिसत्तमाः।। ३

जातयः

शृण्वद्य क्रमशो वक्ष्ये यन्मां त्वं परिपृच्छसि।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा इति चतुर्विधाः।। ४

जातयः सन्तिचैतेषां आश्रमाश्च चतुर्विधाः।
तत्प्रकारमितो वक्ष्ये श्रुणुष्व कमलासन!।। ५

आश्रमाः

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः।
चत्वार एवाश्रमिणः कथ्यन्ते ब्रह्मयोनिषु।। ६

ब्रह्मचर्यं च गार्हस्थ्यं वनयात्रा च भूभुजाम्।
द्वावाद्यौ वैश्यजातीनां उद्वाहो वृषळस्य च।। ७

आश्रमधर्माः

आश्रमानुगुणं धर्मं श्रुण्वद्य निगदिष्यते।
उपनीय गुरोः पार्श्वे व्रतानुष्ठान तत्परः।। ८

वेदान् शास्त्राणि चाभ्यस्य निनयेत् प्रथमाश्रमम्।
धर्मप्रजार्थं कुर्वीत भार्यासंग्रहणं ततः।। ९

तया सह चरन्धर्मं नयेत् गार्हस्थ्य माश्रमम्।
भार्यया विपिनं गत्वा तत्र वन्यफलाशनः।। १०

जितेंद्रियस्तपः कुर्वन् वानप्रस्थाश्रमं नयेत्।
पुत्रदारधनादीनि परित्यज्य जितेन्द्रियः।। ११

शिखी मुण्डी त्रिदण्डी वा ब्रह्मध्यान परायणः।
यद्वैकदण्डवान् भूत्वा निनयेत् तुर्यमाश्रमम्।। १२

उद्वाहः

प्राणिनस्सकलाः सृष्टाः स्त्री पुंरूपेण पद्मज!।
उद्वाह्य मैथुनं कुर्यात् स्वस्वगृह्योक्त वर्त्मना।। १३

ब्राह्मणः सर्वजातिस्त्रीः उद्वाह्य जनयेत् सुतान्।
अब्राह्मणीषु सर्वासु क्षत्रियो जनयेत् प्रजाः।। १४

वैश्यो वैश्यासु शूद्रासु शूद्रस्स्वासु प्रजापते!।
उदूह्य जनयेत् पुत्रान् धर्म कामार्थ सिद्धये।। १५

कुण्डगोळौ

जारेण विथवाजातो गोळसंज्ञः प्रजापते!।
जारजातः सभर्त्रीषु कुण्ड इत्युच्यते बुधैः।। १६

संकरजातिः

स्वासुस्वासु स्वजातीयः परकीयासु वक्ष्यते।

भिषक्

द्विजोढ क्षत्रियात् जातो जायते स भिषग्वरः।। १७

आयुर्वेद मधीयीत मन्त्रवन्मौंजि बन्धनम्।

मौहूर्तिकः

विप्रेण क्षत्रियाण्यां चेत् जारतो जायते प्रजा।। १८

सा ज्योतिष मधीयीत मन्त्रव च्चोपनायनम्।

कर्मकः

वैश्यायां ब्राह्मणोढायां कर्मकः क्षुरकर्मकृत्।। १९

कुलालः

चौर्यात् कुलालः कथितो विप्रोढा वृषलीसुतः।

पारशवः

स तु पारशवोज्ञेयः सोऽर्चयेत् सप्तमातरः।। २०

व्याधः

वाद्यानि वादये देष चौर्याच्चेत् मृगधावकः।
पट्टबन्धोचितौ विद्धि नृपजौ कुण्डगोळकौ।। २१

गोपः

वैश्यायामूढ भूपायां गोपालः पशुजीवनः।

माहिषः

चौर्येण माहिषो ज्ञेयो महिषा श्चोपजीवकः।। २२

करिबन्धनः

क्षत्रोढवृषळीपुत्रः कथ्यते करिबन्धनः।

शूलिकः

चौर्येण शूलिको ज्ञेयः शूलारोपण तत्परः।। २३

मणिविक्रयकः

मणिविक्रियिणौ ज्ञेयौ वैश्यजौ कुण्डगोळकौ।

करणः

विड्विन्न वृषळीपुत्रः करणोद्यूतजीवकः।। २४

कटककारः

चौर्यात्कटककारः स्यात् अनुलोम प्रजा इमे।

माळवः

माळवश्चाश्वपालश्च शूद्रजौ कुण्डगोळकौ ।। २५

सूतः

क्षत्रोढ ब्राह्मणीपुत्रः सूत इत्यभिधीयते।
मौंजीबन्धनमप्येष प्राप्नोत्येव समन्त्रकम्।। २६

चौर्यादपि ससूतोऽन्य स्तद्वदेवोपनायनम्।
ब्राह्मण्यां वैश्यविन्नायां रजको वस्त्रशुद्धिकृत्।। २६

मागधः

मागधस्तत्र चौर्येण पादजंघानि पीडयेत्।

चण्डाळः

शूद्रेणजातो ब्राह्मण्यां विवाहाच्चौर्यतोऽथ वा।। २७

तंतुवायः

चण्डाळो वैश्यविन्नायां क्षत्राण्यां तन्तुवायनः।

पुळिंदः, पुल्कसः

चौर्यात् पुळिंदः शूद्रोढ क्षत्रियाण्यां तु पुल्कसः।। २८

वैद्यनर्तकौ

वैद्यश्च चौर्यतस्तत्र जृंभनृत्तादि देशिकः।

तक्षः

वृषळेनोढ वैश्यायां तक्षः स्वर्णादिकारकः।। २९

लोहायस्कारकोज्ञेयो नैल्यकृत् शिल्पकृत् भवेत्।

तैलिकः

चौर्येण तैलिकोज्ञेय स्त इमे प्रतिलोमजाः।। ३०

षट्कर्म निरतो विप्रः त्रिकर्मा क्षत्रियोमतः।
वैश्यस्त्रिकर्मा कथितो विप्रजौ कुण्डगोळकौ।। ३१

त्रिकर्माणौ नयेत्कालं शूद्रस्तु द्विजसेवया।

कर्माणि षट्

अध्यापनं चाध्ययनं याजनं यजनं तथा।। ३२

दानं प्रतिग्रहश्चेति षट्कर्माणि चतुर्मुख!।

त्रिकर्माणि

दान मध्ययनं ब्रह्मन्! यजनं त्रीणि तत् पृथक्।। ३३

विप्रादिगुणाः

शौच मार्जव मास्तिक्यं दान्ति र्दानं क्षमा शमः।
ज्ञानविज्ञानसंपत्तिः विप्रस्य सहजागुणाः।। ३४

तेज श्शौचं धृतिर्धार्ष्ट्यं युद्धेऽहं पूर्विकागतिः।
दातृत्व मीश्वरत्वं च क्षात्रस्य सहजा गुणाः।। ३५

गोरक्षणं च वाणिज्यं कर्षणं च स्वभावजम्।
कर्मवैश्यस्य शूद्रस्य वर्तनं द्विजसेवया।। ३६

अष्टसंस्काराः

द्विजानामष्टसंस्काराः ब्रह्मक्षत्र विशां विधे!।

द्विजत्व मष्टसंस्कारैः तैर्विना वृषळो भवेत्।। ३७

वृषळस्य न संस्कारो वर्तनं द्विजसेवया।
गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा।। ३८

जातकर्माख्य संस्कारो नामाख्य करणं तथा।
अन्नप्राशन संज्ञश्च चौळाख्यो मौंजि बन्धनम्।। ३९

द्विजाना मष्टसंस्काराः तत्तत् गृह्योक्तवर्त्मना।
अथ वा मूलमन्त्रेण द्वादशाक्षरतोऽथ वा ।। ४०

संस्काराः कथिता ब्रह्मन्! ये स्ववंश्यै रधिष्ठिताः।

पञ्चकालविभागः

प्रातस्संध्याऽभिगमनं उपादानं ततः परम्।। ४१

तृतीय मिज्याचरणं स्वाध्यायाचरणं ततः।
योगः पंचतमे काले पंचकालिक वर्त्मनाम्।। ४२

उषःकालादि कृत्यानि

पञ्चपञ्च उषःकालः सप्तपंचारुणोदयः।
अष्टपंच भवेत् प्रातः शेष स्सूर्योदय स्स्मृतः।। ४३

उत्थायोषसि शय्यायां आसीनो ध्यानमास्थितः।
सृष्ट्वा सर्वाणि तत्त्वानि नामानीशस्य कीर्तयन्।। ४४

भूं भूम्यै नम इत्युक्त्वा पदौ न्यस्यान्महीतले।
तीर्थायतन मालोक्य स्वप्नदोषं विमोचयेत्।। ४५

ततो जलाशयं गत्वा तां दृष्ट्वा जलसंपदम्।
विण्मूत्रोत्सर्जनायाथ श्मशानोषर वर्जिते।। ४६

अकेदारे तृणेदेशे विण्मूत्रोत्सर्जनं चरेत्।

विण्मूत्रोत्सर्जनम्

उदङ्मुखो दिवा कुर्यात् संध्ययो रुभयोरपि।। ४७

दक्षिणाशामुखः कुर्यात् यामिन्यां वायुसम्मुखः।
उत्सृज्य मलमूत्रे द्वे शौचदेशं समाश्रयेत्।। ४८

शौचम्

अपः कुंभे समादाय यावत् मलविमोचनम्।
मृज्जलाभ्यां शोधयित्वा हस्तौ प्रक्षाळयेत् ततः।। ४९

मूत्रोत्सर्जनमात्रे तु लिंगशौचं समाचरेत्।
याव द्दुर्गन्ध निस्सारो यथास्या न्मनस श्शुचिः।। ५०

तावन्मृदा जलेनापि शौचं कुर्वीत मानवः।
शोधयेत् योनिदेशं च नारी मूत्रविसर्जने।। ५१

पादहस्तोरु जंघानां शौचं कुर्यात् ततःपरम्।
उद्धृतेनैव तोयेन शौचं कुर्यादतन्द्रितः।। ५२

जलाशये न कुर्वीत कृत्वा नरकभाक् भवेत्।
ततो जलाशयं गत्वा कुर्वीत नखशोधनम्।। ५३

कुर्यात् द्वादश गंडूषान् कुर्यात् मलविसर्जने।
षट् मूत्रोत्सर्जने कुर्यात् वामभागे भुव स्थसले।। ५४

आचम्य प्रोक्ष्यचात्मानं दन्तधावनमाचरेत्।

दन्तधावनम्

न्यग्रोध प्लक्ष निंबानां काष्ठमेकं समाहरेत्।। ५५

षडंगुळमितं ब्रह्मन्! कनिष्ठाङ्गुळनाहकम्।
तेन संशोधयेत् दंतान् गाथामेतां उदीरयेत्।। ५६

आयु र्बलं यशो वर्चः प्रजां पशून् वसूनि च।
ब्रह्मप्रज्ञां च मेधां च त्वन्नो देहि वनस्पते!।। ५७

अमायां श्राद्धदिवसे न कुर्यात् दन्तधावनम्।
दन्तकाष्ठं द्विधा छित्वा जिह्वानिर्लेहनं चरेत्।। ५८

ततो द्वादश गंडूषान् कारयेत् उद्धृतांबुभिः।
कुक्कुटासन मासीनः कुर्यादाचमनद्वयम्।। ५९

आचमनम्

नामत्रयेण मंत्रेण माषमग्नजलं पिबेत्।
एको भवेत् तथाऽचामः त्रिधापानेन पद्मज! ।। ६०

कुर्यात् द्वादशमूर्तीनां न्यासमंगेषु वै क्रमात्।
ताल्वो र्नयनयो र्नासा रंध्रयोः श्रोत्रयोरपि।। ६१

भुजयो रुदरे मूर्ध्नि पूर्वस्यात् दक्षिणेतले।
मूर्तीनां केशवादीनां मन्त्रेण न्यसनं भवेत्।। ६२

प्राणायामः

प्राणायामत्रयं कुर्यात् तत् प्रकारोऽद्य वक्ष्यते।
नासा दक्षिणरंध्रेण देहस्थं वायुमुत्सृजेत्।। ६३

वामेन पूरयेत् वायुं ततः कुर्वीत कुंभकम्।
हृत्पद्मे कर्णिका मध्ये मां भजेत् कनक प्रभम्।। ६४

प्रणवं व्याहृतीस्सप्त गायत्रीं तस्य मस्तकम्।
जप्त्वा त्रिवारं वायुं तं दक्षिणेन विसर्जयेत्।। ६५

कृते चैवं त्रिवारं स एकः प्राणायति र्भवेत्।

संकल्पः

ततः कुर्वीत संकल्पं स्नानार्थं कमलासन! ।। ६६

गुरुध्यानं पुरा कृत्वा मां भजेत् कमलासखम्।
कर्मस्थलं तथा वर्षं ऋतु मासं तथायनम्।। ६७

तिथिं वारं च नक्षत्रं योगं करणमेव च।
उक्त्वा कर्मकरोमीति चोक्ति स्संकल्प उच्यते।। ६८

ओं तत्सदिति मन्त्रेण संकल्पे मां स्मरेत् विधे! ।

स्नानम्

तीर्थराजमनुज्ञाप्य नाभिदघ्नजलं व्रजेत्।। ६९

नारायणं स्मरं स्तत्र त्रिरात्मानं निमज्जयेत्।
आचम्य चतुरश्रं तत् तीर्थपीठं प्रकल्पयेत्।। ७०

तस्मिन् आवाहयेत् देवीं पुण्यरूपां सुरापगाम्।
अर्घ्यादिभि स्ता माराध्य तीर्थमंजलिनाऽहरेत्।। ७१

अभिमन्त्र्याथ मूलेन मूर्धानमभिषेचयेत्।
एवं त्रिः पंच वा सप्त ततो दक्षिण हस्ततः।। ७२

माषमग्नोदकं गृह्णन् मूलेनैवाभिमन्त्रयेत्।
तत् पीत्वा तत आचम्य तीर्थपीठगतं जलम्।। ७३

अभिमन्त्र्याथ मूलेन तत्रात्मानं निमज्जयेत्।
यावत् प्राणं मूलमन्त्रं मज्जन्नेव जपेन्नरः।। ७४

आत्मानं परिषिच्याथ कुर्यादाचमनद्वयम्।
विद्ध्येत दवगाहाख्यं स्नानं कमलसंभव! ।। ७५

अवगाहाह्वये स्नाने देवर्षि पितृतर्पणम्।
स्नानशाटीं धरन् स्नानं आचरेत् कमलासन!।। ७६

तीरमासाद्य वस्त्रेण कारयेदंगमार्जनम्।
उत्तर्यावेष्टितशिराः कौपीनं धारयेत् ततः।। ७७

ततः प्रक्षाळ्य पत् पाणी वस्त्रधारणमाचरेत्।
शोधयित्वार्द्र वस्त्रं तत् पीडयेत् पितृतृप्तये।। ७८

गौणस्नानम्

प्रसंगादत्र वक्ष्यामि स्नानानि कमलासन! ।
वर्जयित्वा शिखां स्नायात् कंठस्नानं तदुच्यते।। ७९

नाभिजंघोरुगुह्यानां क्षाळनं कापिलं स्मृतम्।
आमयाख्यं भवेत् स्नानं आर्द्रवस्त्रेण मार्जनम्।। ८०

तारव्याहृतिगायत्र्या ऽऽपोहिष्ठा मन्त्रसत्तमैः।
प्रोक्षणं मान्त्रमेतानि स्नानानि कमलासन!।। ८१

उष्णोदकेनामयी यः स्नायात् तत्राप्युपद्रवे।
कुर्वीत कण्ठस्नानाख्यं कापिलं तदुपद्रवे।। ८२

मार्जनम्मान्त्रमप्येतत् तत्राशक्तस्य पद्मज!।
अवगाहजलाभावे स्नानं स्यात् उद्धृतांबुभिः।। ८३

नार्यः स्नायासुराकण्ठं विना पुण्य निमित्तके।

पुण्ड्रधारणम्

तत आचम्य सौवर्णे राजते दारुनिर्मिते।। ८४

पात्रे तोयं समादाय पुण्ड्रधारण माचरेत्।
उद्धरिण्योदकं गृह्य वामहस्तोदरे न्यसेत्।। ८५

अश्वक्रान्तेति मन्त्रेण श्वेतमृत्स्नां निवेशयेत्।
पेषयित्वा ततो मृत्स्नां मूलेन मनुना जपेत्।। ८६

अथ वा चंदनं गृह्य गन्धद्वारेति मन्त्रतः।
भूतेः पवित्रमन्त्रेण पेषणं कमलासन! ।। ८७

सर्वत्र मूलमन्त्रेण जप स्स्यादविचारतः।
अनामिक्याथ तर्जन्या दक्षिणेनैव धारयेत्।। ८८

ललाट उदरे वक्षः कण्ठयो र्दक्षिणोदरे।
तथैव दक्षिणभुजे कण्ठे सव्येतरे तथा।। ८९

वामोदरे वामभुजे वामकण्ठे च पृष्ठतः।
पृष्ठतः कण्ठदेशे च पुण्ड्राण्येतानि धारयेत्।। ९०

धारयेत् ऊर्ध्वपुण्ड्राणि मुक्तिकाम श्चतुर्मुख! ।
आमुष्मिकफल प्रेप्सुः तिर्यक् पुंड्रान् न धारयेत्।। ९१

सर्वत्र पुण्ड्रमध्येषु हरिद्रारेखिकामता।
द्वादशैतानि पुण्ड्राणि नोचेत् चत्वारि धारयेत्।। ९२

ललाटे भुजयो र्वक्षो देशे च कमलासन! ।
अथ वा धारयेत् पुण्ड्रं एकं फाले चतुर्मुख! ।। ९३

केशवादीनि नामानि तत्र न्यासः क्रमात् स्मृतः।
रेखिकासु श्रियादीनां मन्त्रन्यासं समाचरेत्।। ९४

श्रियस्सुधोद्भवाया श्च कमलाया स्ततःपरम्।
चन्द्रस्वसुर्विष्णुपत्न्या वैष्णव्या श्च परागतेः।। ९५

हरिप्रियायाः शार्ङ्गिण्या देवदेव्या स्तत श्श्रुणु।
लक्ष्मी निर्घरसुंदर्योः न्यासं मन्त्रवत् आचरेत्।। ९६

संध्योपास्तिः।

स्वान् गुरून् सकलान् नत्वा संध्योपास्ति मथाचरेत्।
प्रक्षाळ्यपाणी पादौ च कृत्वाचाचमनद्वयम्।। ९७

पवित्राणि

पवित्रं करयोर्धार्यं अनामिक्यां कुशच्छदैः।
पवित्रमेकदर्भेण प्रेतकर्मणि धारयेत्।। ९८

नित्यकर्मणि दर्भाभ्यां द्वाभ्यामेव चतुर्मुख!।
पितृकार्ये त्रिभि र्दर्भैः चतुर्भिश्चाभिचारके।। ९९

पञ्चभिः पौष्टिके दर्भैः षड्भिश्शान्त्यां पवित्रकम्।
भोजने वलयं कुर्यात् सप्तभि स्सर्वकर्मसु।। १००

द्वाभ्यां त्रिभि र्वा वलयं नैवैकेन कदाचन।
द्व्यंगुळं वलयं ब्रह्मन्! ग्रन्थिरेकांगुळी मता।। १०१

चतुरंगुळमायामः पञ्चमुष्टिमिताः कुशाः।
स पवित्रकरो भूत्वा प्राणायामत्रयं चरेत्।। १०२

कालक्रमानुगुण्येन संध्यासंकल्पमाचरेत्।

संध्या चतुर्विधा

संध्या चतुर्विधा ब्रह्मन्! श्रुणु गुह्यं सनातनम्।। १०३

प्रात स्संध्योदयात् पूर्वं सायंसंध्या ततः पुरा।
माध्याह्निकी दिवामध्ये निशीधे तुर्यसंज्ञिका।। १०४

जानुदघ्नोदके तिष्ठन् संध्योपास्तिं समाचरेत्।
तीर्थमध्ये हरिं ध्यायेत् शंखचक्रगदाधरम्।। १०५

प्रोक्षणादयः

आपोहिष्ठादिभि र्मन्त्रैः प्रोक्षयेत् शुद्धवारिणा।
उत्ताननैव हस्तेन कर्तव्यं प्रोक्षणं भवेत्।। १०६

अर्वाचीनेन हस्तेन कर्तव्यं स्यादवोक्षणम्।
मुष्टीकृतेन हस्तेन कृतमभ्युक्षणं भवेत्।। १०७

तन्मन्त्रै श्शिरसि प्रोक्ष्य जान्वोर्यस्यक्षयाय च।
पुनर्मूर्ध्नि च संप्रोक्ष्य व्याहृत्या परिषेचनम्।। १०८

आत्मनो मूलमन्त्रेण मन्त्राचमनमुच्यते।
स्वगृह्योक्त विधानेन मन्त्राचामोऽथ वा भवेत्।। १०९

आचम्य दधिमन्त्रेण आपोहीत्यादिभिः क्रमात्।
पूर्ववत् प्रोक्षणं ब्रह्मन्! आत्मनः परिषेचनम्।। ११०

अर्घ्यदानम्

प्राणानायम्य संकल्प्य सूर्यायार्घ्यं निवेदयेत्।
सायं प्रात स्त्रयं दद्यात् दिवारात्र्यो स्सकृत् सकृत्।। १११

कालातीते सकृत् दद्यात् प्रायश्चित्तार्थमब्जज! ।
ओं पूर्वया च गायत्र्या ह्युत् क्षिपेदुदकांजलिम्।। ११२

आभ्रूदेशसमं दद्यात् नोर्ध्वं नाधः कदाचन।
स्थले तिष्ठन् जले दद्यात् जलस्थो न तले क्वचित्।। ११३

तले तिष्ठन् स्थले दद्यात् जलस्थस्तु जले क्षिपेत्।

कालातीत उपवासः

अतीत्योदयमस्तं वा यस्संध्यां पर्युपासते।। ११४

प्रायश्चित्तार्घ्यदानं च दत्वा ह्युपवसेन्नरः।
उपवासाक्षमो नक्तं प्रसृत्येकं पयः पिबेत्।। ११५

अशक्तश्चेत् दिवा ब्रह्मन्! फलमात्रं घृतं पिबेत्।
अतीते नवमे भागे उपवासश्च पूर्ववत्।। ११६

रात्रौ तथोपवासश्च रात्रिसंध्या विनाशने।
परिषिच्य परिक्रम्य स्वात्मानं ब्रह्मचिंतयेत्।। ११७

असावादित्य मन्त्रेण तत आचम्य तर्पयेत्।
केशवादीन् मूर्तिमन्त्रैः आचांतस्तीरमाव्रजेत्।। ११८

संध्योपासति देशस्य चत्वारिंशत् पदात्परम्।
नान्यत्र धीमान् गच्छेत गच्छन् संध्यां विनाशयेत्।। ११९

आसाद्य तीरं संप्रोक्ष्य कुशे वा कृष्णचर्मणि।

संध्याजपः

आसनाख्येन मन्त्रेण सूपविष्टो वसुंधराम्।। १२०

संप्रार्थ्य पृथ्वी मन्त्रेण प्राणायामत्रयं चरेत्।
प्राणायाम विधौ ये ये मन्त्राः पूर्वमुदीरिताः।। १२१

तान् सर्वानेकतः कृत्वा दशवारं जपं चरेत्।
ततः प्राणान् समायम्य गायत्र्यावाहनं चरेत्।। १२२

अष्टोत्तरसहस्रं वा शतमष्टोत्तरं शतम्।
अष्टाविंशतिवारं वा गायत्र्या जप उच्यते।। १२३

मूलमन्त्रशिरस्कांतां गायत्रीं वेदमातरम्।
जपेत मनसा ध्यायन् तदर्थं कमलासन! ।। १२४

उत्तमाख्येन मन्त्रेण प्राणायामपुरस्सरम्।
उपस्थानं तु गायत्र्याः घृण्यष्टाक्षरमन्त्रतः।। १२५

पंचकालपरो भूत्वा संध्योपस्थानमाचरेत्।
नोचेद्गृह्योक्तविधिना प्युपस्थाय कृतांजलिः।। १२६

संध्यादि देवता नत्वा दिङ्नमस्कार माचरेत्।
ततः प्रणम्य देवेश माधारादींश्च तर्पयेत्।। १२७

कुर्वीत ब्रह्मयज्ञान्तं कर्मजालं चतुर्मुख!।
अष्टाक्षरादयो मन्त्राः बहवोमुक्ति दायकाः।। १२८

तान् जपेत्तन्मना भूत्वा तत् कल्पोक्तवर्त्मना।
निर्गमय्य ततो गावो देवदेवं समर्चयेत्।। १२९

वैष्णवां श्च ततो नत्वा हरे रायतनं व्रजेत्।
प्रदक्षिण प्रणामाद्यैः तोषयित्वा जनार्दनम्।। १३०

अभिगमनम्

ततो गृहं समासाद्य देवार्चा द्रव्यमार्जयेत्।
स्नानादि देवनत्यन्त मेषाभिगमन क्रिया।। १३१

उपादानसंग्रहः

उपादानमतो वक्ष्ये तत् प्रकारमतः शृणु।
मदर्चनाय पुष्पाणि वनाद्वा नंदनादपि।। १३२

स्वारामादापणाद्वापि कमनीयानि चार्जयेत्।
अयाचितानि योग्यानि वासुदेवार्चना विधौ।। १३३

निर्गन्धान्यल्पगन्धानि दुर्गन्धानि परित्यजेत्।
अन्यायार्जित पुष्पाणि तथा देवांतराण्यपि।। १३४

पतितानि च भिन्नानि जीर्णानि मुकुळान्यपि।
कीटादि दुष्ट पुष्पाणि तथा पर्युषितान्यपि।। १३५

म्लानानि नीचस्पृष्टानि विवर्णैः प्रतिलोमजैः।
स्पृष्टानि चरणन्यास लंघितान्यपि वर्जयेत्।। १३६

स्नातः शुद्धांबरधरः स्वाचांत स्सूर्ध्वपुण्ड्रवान्।
पवित्रपाणि र्गृह्णीयात् द्वादशाक्षर विद्यया।। १३७

हरिचंदन मंदार कल्पसन्तान संभवम्।
पारिजातोद्भवं ग्राह्यं तुलसी द्वे विशांपते! ।। १३८

सौगंधिकोद्भवं पुष्पं सदा प्रीतिकरं मम।
पालाशं केतकीयुग्मं माधवी चंपकद्रुजम्।। १३९

नंद्यावर्तं च पुन्नाग मालती सुरपर्णिकाः।
प्रैय्यंगवं पाटलं च कर्णिकारं च यूधिका।। १४०

श्रीवृक्षं कुरवःपट्टी लोद्ध्रं च करवीरजम्।
मल्लीसहचरीपुष्पे सौवर्णं वकुलं तथा।। १४१

कुंदं च कुमुदं पद्मं इंदीवर सितांबुजे।
तथा कोकनदं पुष्पं बकपुष्पं विशेषतः।। १४२

दूर्वामनो हरा ग्राह्या मम पूजाविधौ विधे! ।

दर्भाः

स्त्रीपुमानिति दर्भौ द्वौ पुष्ट्यां वश्येर्चना विधौ।। १४३

स्त्री दर्भः फलदो ब्रह्मन्! प्रतिष्ठोत्सवकर्मसु।
नित्येनैमित्तिके चापि पुमान्दर्भः फलप्रदः।। १४४

अभिचारक यागे च परेत पितृकर्मसु।
काशः प्रशस्तो विज्ञेयः काम्ये स्त्रीदर्भ उच्यते।। १४५

कुशोदर्भश्च काशश्च त्रयस्ते कमलासन! ।
अहन्यहनि गृह्णीयात् दर्भान् मूलमनुं स्मरन्।। १४६

अलाभो यदि दर्भाणां अमायां वा समाहरेत्।
तत्राप्यलाभे श्रावण्या ममायां वत्सरावधि।। १४७

माघे षाण्मासिको दर्भो यथालाभं समार्जयेत्।
साग्रं मनोहरं ग्राह्य मग्रहीनं विवर्जयेत्।। १४८

समिधः

गृह्णीयात् समिधश्चापि शुचिदेश समुद्भवाः।
अश्वत्थ वट पालाश प्लक्षौदुम्बर सम्भवाः।। १४९

शम्यपामार्ग खदिराः कुशेन समिधो नव।
आयामः समिधां तालः कनिष्ठानाहनं मतम्।। १५०

चर्महीने विनाशाय भेदे क्षीणकुलो भवेत्।
क्षतासु भार्यानश्येत शाखिनी कलहप्रदा।। १५१

उद्वेगाय भवेत् स्थूला ह्रस्वावग्रहकारिणी।
दीर्घातिवृष्टिजननी गृह्णीयात् दोषवर्जिताम्।। १५२

परिधयः

कनिष्ठा मध्यमांगुष्ठा नाहां स्त्रीन् परिधीनपि।
कुण्डायामांश्च गृह्णीयात् शोषये दातपे पृथक्।। १५३

आर्द्राः पुरातना वापि न दहेत् समिधोऽनले।
आर्द्रा बन्धु विनाशाय पुत्रहान्यै पुरातनाः।। १५४

पात्राणि

सौवर्णं रजतं ताम्रं रीतिः कांस्यं च मृण्मयम्।
ईदृशान्यपि पात्राणि शोधयेत् तद्विधिं शृणु।। १५५

पात्रशोधनम्

सौवर्णानि निशाचूर्णैः भस्मनाचापि चूर्णतः।
शोधयेत् राजतं पात्रं ताम्रजं तिंत्रिणीरसैः।। १५६

भस्मना कांस्य पात्राणि मृद्भीरीति मयानि च।
मृण्मयं सतृणै र्मृद्भिः यावत् स्यात् मल शोधनम्।। १५७

संघृष्य शुद्धतोयेन क्षाळयित्वा पुन स्त्रिधा।
नामत्रयाह्वयै र्मन्त्रैः शोधयेत चतुर्मुख! ।। १५८

जलाहरणम्

शुद्धोदकानि गृह्णीयात् पात्रेषु प्रणवं स्मरन्।
आलिप्ते गोमयैर्गेहे प्रोक्ष्य पात्राणि विन्यसेत्।। १५९

चन्दनसंघर्षणम्

तत श्चन्दन काष्ठस्य शाणे संघर्षणं चरेत्।
घनसारं गन्धतैलं तथा मृगमदं पुनः।। १६०

केसरी मपि संयोज्य राशीकृत्य निवेशयेत्।
धूपद्रव्यं च कर्पूर तांबूली दळ संचयम्।। १६१

पूग मेला लवंगानि जाती तक्कोल मार्जयेत्।

उपकरणद्रव्याणि

गव्यं पयोदधिघृत माजं वा कमलासन! ।। १६२

तैलं मधु गुळं चाम्लं सर्षपं लवणं तथा।
द्वौ मरीची तथा शुण्ठी गन्धिपत्रं च जीरकम्।। १६३

हिंगुमान्दि च गृह्णीयात् कळंज दळमब्दज! ।
निष्पाव पनसाम्रं च कारवल्ली पटोलिका।। १६४

कदळी वज्रवल्ली च तथैवागस्त्य पर्ण्यपि।
गृह्णीयात् पाकयोग्यानि वक्ष्ये शृणु फलान्यपि।। १६५

फलानि

कदळी चूत पनस जंबीर बदरीण्यपि।
कपित्थं नारिकेळं च नारंगं दाडिमं तथा।। १६६

जंबूफलानि पक्वानि चार्जनीयानि पद्मज! ।

पत्राणि

भुक्त्यर्थ मार्जनीयानि पत्राण्यद्य ब्रवीमि ते।। १६७

पालाशं कदलीपत्रं पैशाचागस्त्य संभवम्।
चूतच्छदानि चैतानि भुक्तियोग्यानि चाहरेत्।। १६८

देवपूजार्हद्रव्याहरणम्

शोधितं पात्रमादाय वीधीपर्यटनं चरेत्।
देव देवार्हणार्हाणि देहीत्यपि सकृद्वदेत्।। १६९

द्विवारं नैवपृच्छेत दत्त द्रव्याणि चार्जयेत्।
लब्धमात्रेण सन्तुष्टो गृह्णन् स्वसदनं व्रजेत्।। १७०

धान्यसंग्रहः

गोधूम यव निष्पाव तिल माष चणान्यपि।
व्रीहि मुद्ग कुळुत्थानि नवधान्यानि चार्जयेत्।। १७१

अन्यानि भोग्यद्रव्याणि संपाद्य चतुरानन! ।

द्रव्यशुद्धिः

धान्यानि रसवर्गांश्च भानुपादेन शोधयेत्।। १७२

शाका दीन्यपि सर्वाणि शुद्धोदैः क्षाळनं चरेत्।

काष्ठम्

रोमजन्तु विहीनानि काष्ठान्यपि समाहरेत्।। १७३

ग्रन्थिहीनानि शुष्काणि ऋजूनि घनवन्त्यपि।

हविर्विधानम्

अश्वत्थ पुष्प वृक्षाणां काष्ठानि परिवर्जयेत्।। १७४

शुद्धान्नम्

चुल्याया मग्नि मादीप्य पाकं कुर्या द्विचक्षणः।
सद्यो मृण्मय पात्रे वा पाकः स्वर्णादि भाजने।। १७५

तालमात्र समुत्सेधः तंडुलो पर्यपां स्मृतः।
पूतिगन्धोभिः सटाचापि अन्नानामतिपक्वता।। १७६

न भविष्य द्यथा कुर्यात् शुद्धमन्नं चतुर्मुख! ।
तंडुले पक्व मापन्ने दर्व्या दृष्ट्वा ततः परम्।। १७७

पात्रान्तरे यवागूनि गृहीत्वा न्यत्र निक्षिपेत्।

शर्करान्नम्

शुद्धमन्न मिदं ब्रह्मन्! शर्करान्न मिहोच्यते।। १७८

पंचांगुळ समुत्सेधः तंडुलोपरि पद्मज! ।
समुद्गे तंडुले पक्वे अर्थमात्रे गुडान्यपि।। १७९

निक्षिप्य पाकपात्रेऽस्मिन् दर्व्या सम्यक् विचालयेत्।
अवतार्य ततश्चुल्याः पात्रादन्नं शिलातले।। १८०

संयोज्य द्रावितं सर्पि द्राक्षाबिन्दूंश्च विन्यसेत्।
नारिकेळ रसं चापि रसबिन्दून् मधून्यपि।। १८१

एलाफलं केसरीं च पक्वं च कदळीफलम्।
एतानि दश संयोज्य पेषयित्वा निवेशयेत्।। १८२

पाकन्तु पयसा कुर्यात् गुडान्नस्य चतुर्मुख! ।

मुद्गान्नम्

मुद्गान्न मद्यवक्ष्यामि चतुरंगुळ मुन्नतिः।। १८३

मुद्गतंडुलयो रूर्ध्व मपां पक्वेऽथ तंडुले।
अवरोप्य शिलामध्ये निक्षिपेदन्न संचयम्।। १८४

लवणं द्रावितं सर्पि राद्रकं च नियोजयेत्।

तिन्त्रिण्यन्नम्

तिन्त्रिण्यन्नं ततो वक्ष्ये पाकः शुद्धोदनं यथा।। १८५

आयसे भाजने तैलं चुल्या मारोपयेत् ततः।
मरीचिं सर्षपं हिंगुं तैले तस्मिंस्तु भर्जयेत्।। १८६

भर्जितेऽथ मरीच्यादौ लवणं तिन्त्रिणीरसम्।
तैले नियुज्य चुल्यायां यथा शुष्यति तज्जलम्।। १८७

तैलंविना निशामान्दि भर्जयुत्वाथ चूर्ण्य च।
भर्जयित्वाथ चणकं चूर्णयित्वा पृथक् पृथक्।। १८८

अवतार्याम्ल तैलन्तत् अन्नराशौ निवेश्य च।
पेषयुत्वा समंचूर्णै स्तैलेन सहयोजयेत्।। १८९

दध्योदनम्

दध्योदन विधिं वक्ष्ये पाकः शुद्धान्नवत् पुरा।
मरीचिं सर्षपं हिंगुं गन्धिपर्णिं च पद्मज! ।। १९०

भर्जयित्वा तत स्तैले दधिमध्ये निवेशयेत्।
आमं मरीचिं शुंठिं च चूतखण्डां स्ततःपरम्।। १९१

नाळिकेरस्य खंडांश्च योजये दन्नसंचये।
दध्नाऽन्नं प्लावयेत् सम्यक् एतत् कमलसंभव! ।। १९२

सर्पिश्च नवनीतं च दध्नासह नियोजयेत्।

तिलाद्यन्नम्

तिलां स्त्वचो मोचयित्वा तिंत्रिण्यन्ने निवेशयेत्।। १९३

तत्तिलोदन मित्याहुः त्वङ्मुक्तं माष संचयम्।

माषान्नम्

तंडुलै स्सहितं पक्वं संस्कारो मुद्गभक्तवत्।। १९४

एतन्माषोदनं ब्रह्मन्! कुळुत्थान्नं तथा भवेत्।

सूपः

त्वङ्मुक्तमाढकीसूपं अथ वा मौद्गमुच्यते।। १९५

स्वादूदकेन पक्वंस्यात् किंचित् लवणमिश्रितम्।
पक्वं सूपं विलोक्याथ किंचित्तु लवणं क्षिपेत्।। १९६

लेह्यम्

ततस्तु लेह्यं वक्ष्यामि तत् प्रकारमितः शृणु।
आम्लं रसं स लवणं संक्षिप्याग्नौ निवेशयेत्।। १९७

तत्र शाकादि खंडानि सम्यक् पक्त्वा ततः परम्।
पेषयित्वा मरीचींश्च तत्र हिंगुरसं पुनः।। १९८

निक्षिप्य दर्व्याचालोड्य सूप माढकि संभवम्।
मर्दयित्वा विशेषेण यद्वापिष्टं च चाणकम्।। १९९

हरिद्रामांदि चूर्णं च भर्जितं पंकजासन! ।
दध्नितक्रे विनिक्षिप्य हस्तेनालोड्य वै पुनः।। २००

सर्वान् संमिळितं कृत्वा चुल्यां पात्रे नियोजयेत्।
पुनर्दर्व्या समालोड्य सर्षपान् भर्जयेत् घृते।। २०१

तन्निक्षिप्य ततो लेह्ये चुल्याया अवतारयेत्।

रसः

समाहारो रसानां यस्सरसः परिकीर्तितः।। २०२

सवक्ष्यतेऽधुना ब्रह्मन्! तत् सम्यक् अवधारय।
पक्त्वा बहूदके सूपं सूपं संत्यज्य वै बहिः।। २०३

तत्राम्लं लवणं क्षिप्त्वा चुल्या मारोपयेत् पुनः।
गुडं च तत्र निक्षिप्य कळंजं जीरकं तथा।। २०४

मरीचिद्वय मप्यत्र चूर्णयित्वा पृथक् पृथक्।
एकदा योजयेत् पात्रे दर्व्या चापि विलोडयेत्।। २०५

हिंगूरसं च संयोज्य गंधोत्पत्तिं विलोकयेत्।
घृतेन सर्षपान् सम्यक् भर्जयित्वा विनिक्षिपेत्।। २०६

ततः शुद्धोदकं किंचित् निनीयाग्ने र्भुवि क्षिपेत्।

कदम्बलेह्यम्

कदम्बलेह्यं वक्ष्यामि बहुस्वाद्ववधारय।। २०७

पात्रे महति वैदुग्धं पूरयित्वाथ चोषयेत्।
पृथक् पात्रान्तरे चाम्लं शुद्धोदे लवणं क्षिपेत्।। २०८

तत्र शाकानि सर्वाणि यानि योग्यानि भोजने।
मूलानि कन्दानि तथा खण्डयित्वा यथालघु।। २०९

निक्षिप्याम्लरसे सम्यक् पाचयित्वाथ लेह्यवत्।
मरीच्यादीनि चूर्णानि हिंगुसारं च पूर्ववत्।। २१०

योजयित्वा विलोड्याथ सर्षपं घृत भर्जितम्।
निक्षिप्य पनसं चूतं द्राक्षां च कदळीफलम्।। २११

एकत्र निक्षिपेत् पात्रे ततो वक्ष्ये शृणुष्व ह।
एलाफलं लवंगं च जातीपत्रं फलं तथा।। २१२

बिंदून् रसद्राक्षयो श्च तथा वै खंडशर्कराम्।
सर्वं पयसि निक्षिप्य गोघृतं तत्र योजयेत्।। २१३

लेह्यदुग्ध उभे पक्वे द्वयं चैकत्र योजयेत्।
तथा फलानि सर्वाणि तत्र क्षिप्त्वा मधून्यपि।। २१४

पुनश्चुल्यां समारोप्य शोषयेत् गाढ वह्निना।

पायसम्

पायसन्तु ततो वक्ष्ये शृणुष्व कमलासन! ।। २१५

कदंब लेह्य दुग्धस्य यस्संस्कारः पुरोदितः।
स गोधूमलवः प्रोक्तः पायसाख्य रसोमहान्।। २१६

माषापूपो गुडापूपो द्वावपूपौ शृणुष्व ह।
निस्त्वचं माषमानीय्य जलमध्ये विनिक्षिपेत्।। २१७

प्लाविते नीरतो माषे मरीचिं जीरकं तथा।
लवणं च विनिक्षिप्य शैलपुत्रेण वेषयेत्।। २१८

तालाया मांगुल घन मपूपं कदळीदळे।
कृत्वा सर्पिषि सन्तप्ते क्षिपेत्पक्वं निरीक्षयेत्।। २१९

माषापूपो भवेदेष गुडापूप विधिं शृणु।
गोधूमचूर्णं शुद्धोदे लेह्यवत् संविलोड्य च।। २२०

शर्करां तत्समं क्षिप्त्वा फलान्येलानि च क्षिपेत्।
सन्तप्ते गोघृते दर्व्या क्षिप्त्वा पक्वं विलोकयेत्।। २२१

पृथुकम्

दध्नि तक्रेऽथ वा शुद्धे पृथुकं संप्रशस्यते।
अभावे दधि तक्राणां शुद्धतोये विधीयते।। २२२

(गोधूम पिष्टं चणकस्य पिष्टं पिष्टं यवस्यापि समन्त्रयं स्यात्।
कळंज पर्णांश्च मरीचिनार्द्रकं हिंगूरसं चापि मरीचिरेणवः।। २२३
दध्नाथ तक्रेण जलेनवापि विलोडयेत् कर्दमवत्प्रजापते।)
गंधिपर्णी सर्षपं च भर्जयित्वाऽथ गोघृते।। २२४

क्षिप्त्वा दर्व्या विलोड्याथ पक्वे सर्पिषि निक्षिपेत्।
एवमादीनि भक्ष्याणि बहूनि विविधानि च।। २२५

यथाशक्ति स्वयं पक्त्वा देवार्हं विनिवेशयेत्।
सर्पिः पात्रे विनिक्षिप्य मरीचिं हिंगुमाषजौ।। २२६

शाकविधिः

भर्जयित्वा ततः शाकान् खंडितान् निक्षिपेत् ततः।
पात्रान्तरेण तत्पात्रं पिधाय तदनन्तरम्।। २२७

शाके त्रिपादपक्वे तु लवणं तत्र निक्षिपेत्।
सम्यक् पक्वेषु शाकेषु वह्नेः समवरोपयेत्।। २२८

उपादानाह्वयं काल मेवं नीत्वा ततः परम्।

इज्यासंग्रहः

माध्याह्निकाह्वयं स्नानं इज्यर्थं च समाचरेत्।। २२९

स्नात्वा माध्याह्निकं कृत्वा जप्त्वा जप मनुत्तमम्।
तत स्समर्चनं कुर्यात् मोक्षार्थं प्रीतये मम।। २३०

समाराधनम्

प्रक्षाळ्य पाणीपादौ च कुर्वीत आचमन द्वयम्।
स पवित्रकरो भूत्वा प्रविशे द्यागमन्दिरम्।। २३१

व्याहृत्या प्रोक्ष्य धरणीं नत्वा द्विः परमेश्वरम्।
आत्मदिग्बंधनं कृत्वा कवाटाभिमुख स्स्थितः।। २३२

अस्त्रमन्त्रं स्मरन् हस्तताडन त्रय माचरेत्।
वायुमन्त्रेण देवेश कवाटोद्घाटनं चरेत्।। २३३

द्वारस्य वामभागेन दक्षिणेन पदाविशेत्।
दीपानुज्वाल्य सदने निर्माल्यानि स्वमस्तके।। २३४

धृत्वा तद्देवगन्धानि स्वयं वक्षसि धारयेत्।
वेदिकापात्र बिंबानि यथार्हं शोधयेत्ततः।। २३५

चण्ड प्रचण्डावारभ्य पार्षदान्तं समर्चयेत्।
शुक्लोपवीतोत्तरीयः चंदना द्यनुलेपनः।। २३६

सितोर्ध्वपुंड्र तिलकः देवदक्षिण माश्रितः।
पूर्वपश्चात् मुखे देवे स्वयं स्यादुत्तरामुखः।। २३७

याम्योत्तर मुखे देवे स्वयं प्राचीमुखो भवेत्।
कुशेषु कृष्णत्वचि वा स्वस्तिकं वाऽथ पद्मकम्।। २३८

बध्वा द्वारं समाच्छाद्य निच्छिद्रं काण्ड वस्त्रतः।
प्रवर्तिते तूर्यघोषे भूतशुद्धिं समाचरेत्।। २३९

अपक्रामन्तु भूतानि पिशाच प्रेतगुह्यकाः।
सर्वेषा मविरोधेन विष्णोः कर्मसमारभे।। २४०

निष्कामन्तु पिशाचाये ये भूताभुवि पारगाः।
ये भूता विघ्नकर्तारः ते गच्छ न्त्वाज्ञया हरेः।। २४१

कूर्मादीन् दिव्यलोकं तदनु मणिमयं मंडपं तत्रशेषम्
तस्मिन् धर्माऽदिपीठं तदुपरि कमलं चामरग्राहिणीश्च।

विष्णुं देवी विभूषायुध गणमुरगं पादुके वैनतेयं
सेनेशं द्वारपालान् कुमुद मुखगणान् विष्णुभक्तान् प्रपद्ये।। २४२

घंटार्चनम्

इति गत्वा देशिकेन्द्र स्ततो घंटार्चनं चरेत्।
ब्रह्माणमपि घंटायां मुकुळे च सुदर्शनम्।। २४३

सूत्रेऽनन्तादि नागेन्द्रान् रसनायां सरस्वतीम्।
नादे प्रजापतिं गन्ध पुष्पाद्यै रर्चयेत् पृथक्।। २४४

एव मभ्यर्च्य तां घंटां चालयेत् परिचारकैः।

दिग्बंधनम्

अग्निप्राकार मन्त्रेण सांगन्यासेन पद्मज! ।। २४५

आत्मदिग्बंधनं कुर्यात् अग्निप्राकार मुद्रया।
चक्रं षडक्षरं ध्यात्वा चक्रमुद्रां शिरोपरि।। २४६

विन्यस्य चेत्थमात्मानं संगोप्य चतुरानन! ।

प्राणायामः

प्राणायामत्रयं कुर्यात् तत् प्रकारोऽद्य वक्ष्यते।। २४७

प्रणवाख्यस्य मन्त्रस्य छंदोन्यासादिकं चरेत्।
द्वारात् दक्षिण नासस्य द्वात्रिंश न्मात्रया स्वयम्।। २४८

वायुं विसृज्य वामेनापूर्य षोडशमात्रया।
मात्रयाथ चतुष्षष्ट्या कुंभकं चतुरानन! ।। २४९

देव यागेषु सर्वेषु प्राणायामे सदा मनुः।
प्रणवः कथ्यते ब्रह्मन्! ततो दक्षिण नासया।। २५०

पूर्वव द्विसृजे द्वायु मेवं त्रि श्चतुरानन! ।
प्राणायामेषु सर्वेषु तर्जनी मध्यमांगुळी।। २५१

सस्पृशेतां यथा नासां प्राणायाम स्तथोच्यते।
दक्षिणेनैव हस्तेन प्राणायामं समाचरेत्।। २५२

अनामिका कनिष्ठाभ्यां वामनासापुटे विधे।
सव्येतरे तथांगुष्ठो वाय्वार्जन विसर्जने।। २५३

भूतशुद्धिः

योगमुद्रां प्रदर्श्याथ नाभौ वायुमहामनुम्।
वेद्याकारं ओं यं इति तस्मादुत्थित वायुना।। २५४

धूम्रेण देहं पाप्मानं शोषयित्वा निरम्मयम्।
हृत्पंकजे रमि त्यग्निमन्त्रं रक्तमयं स्मरेत्।। २५५

स त्रिकोणाकृति स्तस्मात् उत्थित ज्वालया वपुः।
दग्धं भस्म च निध्याय कंठे पीताभ मक्षरम्।। २५६

चतुरश्रं च पीताभं स्मृत्वा लमिति पद्मज! ।
तेन संस्तंभये दग्निं स्व देहोत्थं स्वमूर्धनि।। २५७

वृत्तं स्मरे दों वमिति वारुणं स्फटिक प्रभम्।
तज्जामृतांभसा देहं क्षाळितं मनसा स्मरेत्।। २५८

तत्त्वसंहारः

पृथिव्यादीनि तत्त्वानि प्रळयक्रम माश्रितः।
भगवन्मानसो भूत्वा परमात्मनि संहरेत्।। २५९

चतुरश्रां पीतवर्णां पृथ्वीं पंचगुणां विधे।
घ्राणोवस्थेंद्रिय युतां गन्धमात्रे तु संहरेत्।। २६०

ङकारः पृथिवीमन्त्र ष्टकारो घ्राण संज्ञिकः।
उपस्थ मन्त्र श्च कार स्तकारो गन्ध संज्ञिकः।। २६१

अर्धचंद्राकृती श्वेत आपस्ताश्च चतुर्गुणाः।
जिह्वापाय्विंद्रिय युता गन्धतन्मात्रया सह।। २६२

संहरे द्रसतन्मात्रे घकार स्त्वाप अब्जज! ।
ठकारो रसनामन्त्र श्चकारः पायु रुच्यते।। २६३

थकारो रसतन्मात्रं ततः श्रुणु चतुर्मुख! ।
त्रिकोणः पाटलो वर्णः त्रिगुणोऽग्नि समीरितः।। २६४

दृष्ट्या पादेन संयुक्त स्तं तया रसमात्रया।
संहरेत् रूपमात्रायां गकारो वह्नि रुच्यते।। २६५

डकारो दृष्टिमन्त्रः स्यात् जकार श्चरणे मनुः।
दकारो रूपमात्रास्यात् वृत्तं धूम्रं गुणद्वयम्।। २६६

त्वत् कराभ्यांयुतं वायुं स्पर्शमात्रे समाहरेत्।
वायोः खकारो मंत्रस्स्यात् ढकारस्तु त्वचो मनुः ।। २६७

झकारः करमन्त्र स्स्यात् धकार स्स्पर्श उच्यते ।
गुणैक माकारहीनं नीलोत्पलदळ प्रभम् ।। २६८

आकाशं श्रुतिवाग्भ्यां च शब्दमात्रे समाहरेत्।
ककार आकाशमन्त्रो णकार श्श्रुति संज्ञिकः ।। २६९

ज्ञकारो वाङ्मनुः प्रोक्तो नञ् शब्दो मनुरुच्यते ।
शब्दं मनसि संहृत्य मनश्च तदहंकृतौ ।। २७०

अहंकारं तथा बुद्धौ तां बुद्धिं प्रकृतौ तथा।
प्रकृतिं संहरेत् जीवे पकारो मानसो मनुः।। २७१

अहंकृतेः फकार स्स्यात् बकारो बुद्धिसंज्ञिकः।
भकारः प्रकृतिः प्रोक्तो मकारो जीव उच्यते।। २७२

जीवस्वरूपम्

जीवोऽयं वासनाहीनः सूसूक्ष्मो भास्कर प्रभः ।
पद्मनालोद्भवा तन्तु र्यथा सूक्ष्मतरा भवेत् ।। २७३

नादृशी सुषुमा नाडी सर्वजन्तुषु वर्तते।
मरुता कुंभकाख्येन जीवन्तत्र समाहरेत् ।। २७४

मन्तर्देहान्तया नाड्यारोपये दूर्ध्व मुच्छकैः।
हृदबहि र्विनिर्गत्य प्राप्य मार्तांड मंडलम्।। २७५

र्गतं मंडलात्तस्मात् ध्यायेत्तं ब्रह्मणि ध्रुवे।
दक्षिण पदादुत्थ मग्निं ध्यात्वाऽग्नि मन्त्रतः।। २७६

दुत्थ ज्वालया देहं निर्दग्धं भावये त्ततः।

तत्त्वसृष्टिः

काशेऽयुत पूर्णेन्दु प्रभं बीजं निवृत्तिकृत् ।। २७७

ध्यात्वा वमिति मन्त्रं तत् तस्माद्ध्यायेत् सुधानिधिम्।
तदब्धौ पांडरं पद्मं तस्मिन् जीवं स्मरे त्ततः।। २७८

सकाशात् ब्रह्मणोजातं जीवात्तु प्रकृतिं पुनः।
उत्पन्नां प्रकृते र्बुद्धिं बुद्धेर्जाता महंकृतिम्।। २७९

अहं कृतेर्मनो जातं शब्दमात्रां च मानसात्।
आकाशं च ततो ध्यायेत् श्रुतिवाक् सहितं ततः।। २८०

ध्यायेत् च स्पर्शतन्मात्रां ततो वायुं त्वचा सह।
करणे च ततो ध्यायेत्तन्मात्रां रूपसंज्ञिकाम्।। २८१

ततो वह्निं दृष्टिपद्भ्यां रसमात्रां हुताशनात्।
आपस्तु रसतन्मात्रात् रसनावायु संयुताः।। २८२

ताभ्यस्तु गन्धतन्मात्रां ध्यात्वा पृथ्वीं ततः परम्।
घ्राणोपस्थेंद्रिय युतां ध्यात्वेत्थं चतुरानन! ।। २८३

पृथ्व्यादि भूतजं स्मृत्वा बुद्ध्या पांडरपंकजम्।
उपरिष्टात् प्रबुद्धं तत् चिंतयित्वा तदुद्भवैः।। २८४

पीयूषैः पूरितैः कुंभै रभिषिक्तं निजं वपुः।
वासुदेवार्चनायोग्यं चिन्तयित्वा ततः परम्।। २८५

मंत्रजपः

मूलं वा द्वादशार्णं वा ह्यन्यं वा मंत्र मुत्तमम्।
सृष्टि स्थिति लयन्यास पूर्वं जप मथाचरेत्।। २८६

मानसाराधनम्

विन्यस्यांगेषु मन्त्राणि मन्त्रोक्त ध्यानमाचरेत् ।
न्यास बीजानि सर्वाणि गंधाद्यै स्सम्यगर्चयेत् ।। २८७

आत्मान मीश्वरं ध्यायेत् शंखचक्र गदाधरम् ।
श्रीवत्स कौस्तुभोपेतं वनमाला विराजितम् ।। २८८

नाभौ ब्रह्मांजलिं बध्वा ऋजुकायः प्रसन्नधीः ।
नासाग्रन्यस्त नयनः दन्तैर्दन्तान् नसंस्पृशेत्।। २८९

जिह्वां तालुनि विन्यस्य किंचित् कुंचित मस्तकम् ।
शृतबाहुद्वयो भूत्वा सर्व बाह्येन्द्रियाण्यपि ।। २९०

कृत्वा मनस्सु लग्नानि मनो बुद्धौ निवेशयेत्।
बुद्धिं भगवति ध्यायेत् भगवन्तं हृदंबुजे ।। २९१

अंगुष्ठ मात्रं पुरुषं आसीनं कर्णिकान्तरे ।
उच्चैः स्ववपुषः पादपद्मात् श्वेता द्विनिस्सृताम् ।। २९२

हरेर्मूर्ध्नि पुरश्चापि निपतन्तीं सुरापगाम् ।
ध्यात्वा तत्तीर्थतः कुर्यात् देवस्यार्घ्यादि कल्पनम् ।। २९३

आभिमुख्य प्रार्थनादीन् तत्र कृत्वाऽथ मानसैः ।
स्वागतं देवदेवेश! सन्निधिं भजमेऽच्युत ।। २९४

गृहाण मानसीं पूजां यथार्थं परिभाविताम् ।
इति प्रार्ध्यार्चये देवं यथाबाह्ये तथान्तरे ।। २९५

होमान्त मिष्ट्वा देवेशं ततस्तं प्रार्थयेदपि ।
नमस्ते सर्वलोकेश! भगवन्! मंत्र विग्रह! ।। २९६

आराधयामि त्वां बिंबे तावन्निवस मे हृदि ।
इति प्रार्थ्य निवेद्याथ मन्त्रशुद्धिं समाचरेत् ।। २९७

मन्त्रशुद्धिः

प्रणवेनैव मन्त्रेण शोषणं दाहनं तथा ।
स्तंभनं प्लावनं चापि प्रबुद्धीकरणं तथा ।। २९८

साम्मुख्य करणं कृत्वा मंत्रबीजानि पद्मज! ।
ततश्शुद्धं महामंत्रं बीज संपुटितं क्रमात् ।। २९९

जपेत् तदक्षमालायां करपर्वणि वा क्रमात् ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरंतु वा ।। ३००

अष्टाविंशति वारं वा जपेन्मंत्रं ममार्चने ।

बाह्याराधनम्

बाह्यार्चना विधिं ब्रह्मन्! वक्ष्यामि श्रुणुविस्तरात् ।। ३०१

गळंतीं विष्णुगायत्र्या प्रक्षाळय शुचिवारि च ।
आपूर्य प्रणवेनैव पूजाद्रव्याणि तारतः ।। ३०२

पात्र शोधनम्

शुद्धोदकेन संप्रोक्ष्य पूजापात्राणि शोधयेत् ।
सर्वत्र पात्र शुद्धीनां गायत्री वैष्णवीमनुः ।। ३०३

अंबुपूरणमंत्रः

प्रणवो मंत्र इत्युक्त स्सर्वत्रांबु प्रपूरणे ।
आधारपात्रे देवस्य पुरतोवा'त्मनोऽथ वा ।। ३०४

पात्र स्थापनम्

मध्य दक्षिण वामेषु पाद्यार्घ्याचमनानि वै ।
विन्यस्य चांबुनाऽपूर्य प्रणवेन स्पृशेत् पृथक् ।। ३०५

एला ल[illegible] कर्पूर केसरी कुंकुमान्यपि ।
चांपेय मुकुळै[illegible]पि तक्कोलं चन्दनं न्यसेत् ।। ३०६

दाहन प्लावनम्

द्वादशारं महच्चक्रं हस्तमध्य[illegible] दक्षिणे ।
तस्य मध्ये स्मरेत् सूर्यं हकारो मन्त्र[illegible]च्यते ।। ३०७

दीप्तैः तद्रश्मिभि र्दग्धं पूजाद्रव्यं स्मरेदपि ।
दाहनाह्वय मुद्रां च दर्शयेत् कमलासन! ।। ३०८

वामे करतले ध्यायेत् पंकजं षोडश च्छदम् ।
श्वेतं तदंतरे चंद्रं कलाषोडश मंडितम् ।। ३०९

ध्यायेत् वमिति मन्त्रैश्च पीयूषैः तत् विनिर्गतैः ।
अंशुभिः प्लावितं ध्यात्वा दृश्याऽऽप्लावन मुद्रिकाम् ।। ३१०

उभयो र्हस्तयो र्देवं ध्यात्वा नारायणं हरिम् ।
ध्यात्वा द्रव्याणि संस्पृश्य हस्ताभ्यां तानि पद्मज! ।। ३११

पात्राणि विष्णुगायत्र्या हस्ताभ्या मभिमंत्र्य च ।
याग योग्यानि सर्वाणि चिंतयित्वा ततः परम् ।। ३१२

स्वीं सुरभ्यै नम इति तस्यामुद्रां प्रदर्शयेत् ।

अर्घ्यादि कल्पनम्

दुग्धपूर्णानि पात्राणि स्मृत्वार्घ्यादि प्रकल्पनम् ।। ३१३

अर्घ्यं पाद्यं तथाऽचामं कल्पयाम्यंत मुच्चरेत् ।
प्रणवादि स्मरन् मंत्रं संस्पृशेत पृथक् पृथक् ।। ३१४

पात्रान्तरे गृहीत्यार्घ्यं उदकं विन्यसेत् पृथक् ।
अर्घ्यादि त्रिषु पात्रेषु देवताऽवाहनं चरेत्।। ३१५

श्रियमध्ये पित्रून् पाद्ये वागीशं च रमे तथा ।
आवाह्याभ्यर्च्य चाधार स्थापितं पात्र माहरेत् ।। ३१६

संस्थाप्य वामे हस्ते तत् कूर्चं तदुपरि न्यसेत् ।
आभ्रूमध्यं समुद्धृत्य सप्तकृत्वोपि मन्त्रयेत् ।। ३१७

मूलेन तज्जलं किंचित् किंचित् पात्रेषु विन्यसेत् ।
तत् शेषेणास्त्रमंत्रेण द्रव्याण्यात्मान मब्जज! ।। ३१८

कूर्चेन प्रोक्षयेत् पश्चात् अच्युतार्चन मारभेत् ।

योगपीठ प्रकल्पनम्

अभिन्ने सहजे विष्णोः पीठे पीठार्चनम्मतम् ।। ३१९

आधारशक्तिं कूर्माख्यं कालाग्निं तदनंतरम् ।
अनंतं च ततो भूमिं पीठाधोर्चन मिष्यते ।। ३२०

अनंत स्तदुपर्यास्ते भूमिरास्ते तदुच्चकैः ।
आग्नेयादिषु कोणेषु धर्मं ज्ञानं ततः परम् ।। ३२१

वैराग्य मैश्वर्यमथ समभ्यर्च्य दिशास्वपि ।
क्रमेणाधर्म मज्ञान मवैराग्यं ततोऽर्चयेत् ।। ३२२

अनैश्वर्यं च तन्मन्त्रैः प्रणवादि नमोन्तकैः ।
चतुर्हस्ता स्सिंहवक्त्रा रचिताञ्जलि संपुटाः ।। ३२३

जघन्याभ्यां च हस्ताभ्यां दधाना योगपीठिकाम् ।
कल्पिताः पादरूपेण चाष्टौ धर्मादयो विधे! ।। ३२४

मध्ये सदाशिवोऽभ्यर्च्यः पादरूपेण कल्पितः ।
ऋग्वेदं च यजुर्वेदं सामवेद मथर्वणम् ।। ३२५

अभ्यर्चयेत् पीठदेशे दिक्षु चैतान् चतुर्मुख! ।
ईशरूपा इमे सर्वे पीठदेशं समाश्रिताः ।। ३२६

वैकारिका द्यहंकारान् अर्चयेत् तदुपर्यपि ।
गुणत्रयार्चनं पश्चात् कुर्वीत तदनंतरम् ।। ३२७

पंचभूतार्चनं कुर्यात् पीठोपरि चतुर्मुख! ।
पंचभूतानि सर्वाणि देवदेवस्य तूलिका ।। ३२८

अथास्तरण रूपाय जीवायाभ्यर्चनं चरेत् ।
अग्नि सोम सहस्रांशु मंडल्या न्यर्चयेत् ततः ।। ३२९

तदूर्ध्वं द्वादशदळं कर्णिका केसरान्वितम् ।
अव्यक्त कमलं श्वेतं अर्चयेत् तदनंतरम् ।। ३३०

भद्रासनं समभ्यर्च्य त्रिमूर्त्यर्चन माचरेत् ।
ब्रह्माणं च हरिं शंभुं अर्चये द्देव दक्षिणे ।। ३३१

सनत्कुमारं सनकं सनंद च तदुत्तरे ।
दुर्गां विघ्नेश्वरं चाथ नारदं पश्चिमेऽर्चयेत् ।। ३३२

वायव्ये देवदेवस्य गुरूणा मर्चन म्मतम् ।

अर्चनमन्त्राः

तत्तन्नाम चतुर्थ्यन्तं प्रणवादि नमोंतकम् ।। ३३३

उद्धृत्य तेन मन्त्रेण सर्वेषा मर्चनं विधे! ।
गंधैः पुष्पैश्च धूपैश्च दीपै रेषां समर्चनम् ।। ३३४

धर्माद्यावाहनम्

प्रतिष्ठा रहिते स्थाने धर्मा द्यावाह्य पूजयेत् ।
पूजिते पूर्व मावाह्य पूजने सन्तते सति ।। ३३५

भगवदावाहनम्

पुन रावाहनं नैव केवलार्चन मिष्यते ।
याव दुद्वासनं विष्णोः तावन्नावाहनं मतम् ।। ३३६

प्रतिष्ठितस्य बिंबस्य पुनर्नावाहनं मतम् ।
बिंबान्तरं चे दत्रास्ति ध्रुवाख्यं कमलासन! ।। ३३७

जंगमाराधने तत्र पूजामावाह्य कारयेत् ।
जंगमेषु च बिंबेषु ध्रुवादावाहनं मतम् ।। ३३८

नैकबेर विधाने तत् तत्र नावाहनं भवेत् ।
कुंभेऽग्नौ स्थंडिले कूर्चे यत्र कुत्रापि चान्यतः ।। ३३९

आवाह्य पूजनं कुर्यात् उद्वासन्तु क्रियावधौ ।
सालग्राम शिलायां नावाहोद्वासन मुच्यते ।। ३४०

योगपीठं प्रकल्प्यैव देवताऽवाहनं चरेत् ।
अस्ति चेत् जंगमं बिंबं नास्तिचेत् ध्रुवबिम्बकम् ।। ३४१

हृदंबुजात् देवदेवं आवाह्यार्चन मिष्यते ।
पुनरुद्वासनं नैव कारये न्मानसे ततः ।। ३४२

समीपं ध्रुवबिंबस्य गत्वालोक्य तदाननम् ।

साम्मुख्यादिः

स्वामिन्! अभिमुखो भूया इति संप्रार्थयं स्ततः।। ३४३

दर्शयित्वा च तन्मुद्रां स्वागतं चेति तं वदेत् ।
दर्शयन्नपि तन्मुद्रां प्रार्थना मुद्रया ततः ।। ३४४

प्रार्धयेत स्थितिं तत्र सर्वदा कमलासन! ।

आराधन मंत्रः

साम्मुख्यादिषु सर्वेषु मूलमंत्रो महामनुः ।। ३४५

द्वादशाक्षरविद्या वा मूर्तिमंत्रोऽथवा भवेत् ।
सर्वत्रैवोपचारेषु मंत्र वर्त्मैष पद्मज! ।। ३४६

आसनंतु सपर्याख्यं दत्वा तदनु पद्मज! ।

न्यासविधिः

मंत्राक्षराणां विन्यासं देवांगेषु समाचरेत्।। ३४७

सृष्टि स्थिसति र्लयश्चेति न्यासश्च त्रिविधो भवेत्। ३४६
स्थिते देवे स्थितिन्यास आसिने सृष्टि संज्ञकः।।

शयने संहृतिन्यासः संहारः शयनं यदि।
विश्वरूपे स्थितिन्यासः यानारूढे त्रयं भवेत्।। ३४७

भोगे योगे च शयने स्थितिन्यासः प्रचक्षते ।
एवं बिम्बानुगुण्येन मंत्रन्यासं विधाय च।। ३४८

क्रुद्धोल्कादि महामन्त्रैः अङ्गन्यासं समाचरेत्।
बिम्बन्यस्तेन मन्त्रेण तद्बिम्बं सम्यगर्चयेत्।। ३४९

अङ्गन्यासात् परं कुर्याद् व्यापक न्यास मुत्तमम्।
चक्र शङ्खाख्य मन्त्राभ्यां ते द्वे मुद्रे प्रदर्शयेत्।। ३५०

देवीनां पद्ममुद्रा मप्यन्येषा मंजलिर्भवेत्।
पुष्पांजलिं विकीर्याथ गाथा मेना मुदीरयेत् ।। ३५१

विभो! सकललोकेश! विष्णो! जिष्णो! प्रभो! हरे! ।
त्वां भक्त्या पूजयाम्यद्य भोगै रर्घ्यादिभिः क्रमात्।। ३५२

दिव्येनार्घ्योपचारेण यथाशक्ति यथाविधि ।
अर्चयिष्यामि समये भगवन्तं जनार्दनम्।। ३५३

अर्घ्यादिदानम्

इति विज्ञाप्य देवेशं अर्घ्यात् पात्रांतरेण च।
गृहीत्वांबु सकृद्देव शिरस्यर्घ्यं समर्पयेत्।। ३५४

कूर्चेन प्रोक्षणं कुर्यात् तच्छेषं तु प्रतिग्रहे।
पात्रे विन्यस्य च ततः पाद्यांबु ग्रहणं ततः।। ३५५

प्रोक्षणं पादयो र्विष्णोः तत् शेषं पूर्ववत् क्षिपेत्।
तच्छेषेण्यात्म शिरसि प्रोक्षयेत् श्रद्धयासह।। ३५६

एवं द्विः पाद्यदानं स्यात् तोय माचमनीयतः।
गृहीत्वा देववदने दद्यात् आचमन त्रयम्।। ३५७

न तत्र कूर्चविन्यास आचान्तं तं स्मरेत् ततः।

मधुपर्कः

फलान्येलाफलं सर्पिः शर्करा च मधून्यपि।। ३५८

पंचाना मपि संयोगो मधुपर्क उदीरितः।
एकबेर विधानेतु नैवावाहन मिष्यते ।। ३५९

बहुबेरेषु सर्वेषु मूला दावाहनं मतम् ।

आवाहनं जङ्गमेषु

आसाद्य जंगमं बिम्बं योगपीठार्चनादिकम् ।। ३६०

गुर्वर्चनान्तं कृत्वाऽथ अर्घ्यात् पात्रांतरे जलम्।
गृहीत्वा मूलबिम्बस्य नासांतं तत्समुद्धरेत् ।। ३६१

मूलबेरस्य हृदयद्वारा दक्षिण[illegible]स्पया ।
निर्गतां भगवच्छक्तिं ध्याये त्पात्रा[illegible] जले ।। ३६२

सर्वत्रावाहने काले सकूर्चः कुम्भ उच्यते ।
दीपात् दीपवदाकृष्य ध्रुवात् बिम्बात्ततः परम् । ३६३

कूर्चेण चलबिम्बस्य मूर्ध्नि प्रोक्षण माचरेत् ।
द्वारेण ब्रह्मरंध्रस्य प्रविष्टां बिंबहृत्पदे ।। ३६४

तच्छक्तिं भावयेत् धीमान् प्रणवेन ततः परम् ।
ब्रह्मरंध्रं विधायाथ साम्मुख्य स्वागतादिकम् ।। ३६५

आचरे न्मधुपर्कांतं यागांतं प्रार्थनामता ।
दासोऽहं ते जगन्नाथ! सपुत्रादि परिग्रहः ।। ३६६

प्रेष्यं प्रशाधि कर्तव्ये मान्नियुंक्ष्व हिते सदा ।

परिवार कल्पनम्

इति विज्ञाप्य देवेशं परिवारान् प्रकल्पयेत् ।। ३६७

एकबेर विधाने तु सुरसिद्धावतारिते ।
कल्पनं परिवाराणां न कुर्वीत चतुर्मुख! ।। ३६८

अन्यत्र बहुबेरेतु परिवारार्चनं मतम् ।
योगासनाब्जपत्रेषु प्रागादि द्वादशस्वपि ।। ३६९

श्रीवत्सं वनमालां च योगमायां च वैष्णवीम् ।
विमलां च तथा सृष्टिं तत्तदुत्कर्षणी मपि ।। ३७०

प्रज्ञां सत्यां तथैशानीं अनुकंपां पितामहीम् ।
आवाह्य तासां परितः तधाचामर धारिणीः ।। ३७१

व्याप्तिं कान्तिं तत स्तृप्तिं श्रद्धां विद्यां जयां क्षमाम् ।
शान्ति मष्ट समावाह्य प्रथमावरणे ऽर्चयेत् ।। ३७२

ततो द्वितीयावरणे शङ्खि चक्र्यादि पूजनम् ।
शङ्खी चक्री गदी पद्मी मुसली खड्गि शार्ङ्गिणौ ।। ३७३

वजीत्यष्टौ समावाह्य यजे दायुध धारिणः ।

दिग्गीशाः

इन्द्राद्याशासु सर्वासु दिगीशा नर्चयेत् ततः ।। ३७४

इन्द्रो वह्निः परेतेशः नैऋतो वरुणोऽनिलः ।
कुबेर श्शंभु रित्येते दिगीशाः कमलासन! ।। ३७५

पादुकाया मनन्तं च सेनेशं शिवदिक् स्थितम् ।
अग्रे देवस्य पक्षीन्द्रं गन्धपुष्पादिभि र्यजेत् ।। ३७६

स्नानासनम्

स्नानार्थ मासनं दद्यात् देवाय चतुरानन! ।
आसनं गंतुरीशस्य पादयोः पादुकां न्यसेत्।। ३७७

सङ्गृह्य देवं हस्ताभ्या मासने विनिवेशयेत् ।
अर्घ्यादि दानं कुर्वीत यथापूर्व मुदीरितम् ।। ३७८

अर्घ्यं पाद्यं तथाचामं दन्तकाष्ठं ततः परम्।
काष्ठेन देववदने सव्यादारभ्य दक्षिणम् ।। ३७९

शोधनार्धं तु दन्तानां स्पर्शयित्वा ततः परम् ।
जिह्वानिर्लेखनं दद्यात् दन्तकाष्ठांतरेण च ।। ३८०

गण्डूषं च ततो दद्यात् आचामं तदनंतरम् ।
तैलाभ्यंगं ततो दद्यात् शुद्धमामलंकांबु च ।। ३८१

तैल व्यपोहनार्थं स्यात् धात्री चूर्णाभिषेचनम् ।
शुद्धोदके नाभिषेकं अभिषेकं फलाम्बुभिः ।। ३८२

पंचामृतम्

पंचामृताभिषेकं तु कारयेत् तदनंतरम् ।
पयोदधि घृतं ब्रह्मन्! माक्षिकं मधुशर्कराः ।। ३८३

एतेषान्तु समाहारात् पंचामृत मुदीरितम् ।
एवं मामभिषिच्याथ नित्यस्नपन माचरेत् ।। ३८४

नित्यस्नपनम्

तत्प्रकार मिहाख्यास्ये शृणुष्व कमलासन! ।
देवाग्रे वेदिकामध्ये धान्यपीठे निवेशितम् ।। ३८५

गंधद्रव्यैरपां पूर्णं तंतुपल्लव भूषितम् ।
स्नपनोक्त विधानेन संस्कृतं कूर्चसंयुतम् ।। ३८६

आवाह्याभ्यर्चितं सम्यक् मूलमन्त्राभिमन्त्रितम् ।
पुंसूक्ते सन्तते ब्रह्मन्! तमादायाभिषेचयेत् ।। ३८७

निवेद्य धूपदीपार्घ्यात् उपचार पुरस्सरम् ।
शुद्धोदकेन देवं तं सावित्र्या परिषेचयेत् ।। ३८८

तत स्सहस्रधाराभिः अभिषिच्य चतुर्मुख! ।
सहस्रधारास्नानाम्बु ये पिबन्ति द्विजादयः ।। ३८९

तेषां अंतर्गतं पापं विनश्यति न संशयः ।
प्रति द्रव्याभिषेकं तु शुद्धो देवाभिषेचयेत् ।। ३९०

तत श्शुद्धेन वस्त्रेण देह सम्मार्जनं भवेत् ।
आर्द्रवस्त्रं परित्यज्य धौतं वस्त्रं समर्पयेत् ।। ३९१

प्रणवेन ब्रह्मसूत्रं दद्या दाचमनं ततः ।
अस्त्रमंत्रेण वटकं प्रोक्ष्य तस्मै निवेदयेत् ।। ३९२

वटक विधिः

एकभागं गंधवस्तु कटुकन्तु द्विभागतः ।
वटकेश स्तद्विभागी सर्वाण्येकत्र चूर्णयेत् ।। ३९३

भर्जयित्वाथ संचूर्ण्य समशर्करया सह ।
मधुसर्पिश्च संयोज्य देवाय विनिवेदयेत् ।। ३९४

एलालवंगे जाती द्वे तथाऽवालमरीचकम् ।
पञ्चगंधाख्य वस्तूनि कटुकानि तत श्शृणु ।। ३९५

मरीचिः पिप्पली शुंठी कलंजं जीरकं तथा।
पंचैतानि वटेशानि ताळीशः कमलासन! ।। ३९६

अलङ्कारासनम्

तत आचमनं दद्या दलंकारासनं परम् ।
पूर्ववत् पादुके दत्वा प्रापयेच्च तदासने ।। ३९७

अर्घ्यं पाद्यं तथाचामं दत्वा धूपोत्थ धूमतः ।
केशान् विशोषये त्पश्चात् गंधं पुष्पं समर्पयेत् ।। ३९८

भूषणानि च सर्वाणि तिलकं चांजनं ततः ।

धूपदीपसमर्पणम्

दर्शनं दर्पणस्यापि धूपस्याघ्रापणन्ततः ।। ३९९

दीपस्य दर्शनं पश्चात् धूपे वह्निं समर्चयेत् ।
दर्शये द्दूपमुद्रां च दीपपात्रे ऽर्कमर्चयेत् ।। ४००

दीपमुद्रां प्रदर्श्याथ दर्शयेत् देवनेत्रयोः ।

मात्रादानम्

मात्रादानं ततो दद्यात् तत् प्रकार इहोच्यते ।। ४०१

सौवर्णादिषु पात्रेषु यद्वा वेत्रलता कृते ।
तंडुलं च ततो वस्त्रं तदूर्ध्वं विन्यसे त्तिलान् ।। ४०२

तिलेषु विलिखे त्पद्मं विश्वमंत्रेण पद्मज! ।
कर्णिका केसरयुतं चतुर्दळ समन्वितम् ।। ४०३

हेमं फलं च मध्वाज्ये प्रतिपर्णं पृथक् पृथक् ।
सचूर्णपूगं तांबूलं विन्यसेत् कर्णिकातले ।। ४०४

पात्रमुद्धृत्य हस्ताभ्यां दीप्यस्वेत्यपि दर्शयेत् ।
देशिकाय स्वयं दद्यात् गोविंदः प्रीयता मिति ।। ४०५

घटदीपः

तिरस्कृतिं व्यपोह्याथ घटदीपार्चनं चरेत् ।
अर्चना विश्वमन्त्रेण घटदीपस्य पद्मज! ।। ४०६

त्रिः परिभ्रामयेत् देवं गुणमन्त्रै स्त्रिधा स्वयम् ।

भोज्यासनम्

भोज्यासनं ततो दद्यात् प्रापयेत् तत्र पूर्ववत् ।। ४०७

पाद्य मर्घ्यं तथाचामं मधुपर्कं निवेदयेत् ।
तांबूलं च ततो दत्वा प्रणवेन ततः परम् ।। ४०८

सिद्धं भोज्यं तथा भक्ष्यं लेह्यं चोष्यं रसान्यपि ।
पायसं च फलादीनि प्रोक्षये दस्त्रमन्त्रतः ।। ४०९

वर्मणा परिषिच्याथ प्रणवे नार्हणांबु च ।
दत्वाथ भोज्य वस्तूनां दाहन प्लापनं चरेत् ।। ४१०

दर्शयेत् सौरभीं मुद्रां ततो दद्यात् तदर्हणम् ।
वामजानुं समुन्नम्य स्पृष्ट्वा भूमिं तदन्यतः ।। ४११

एक त्रि पंच सप्ताष्ट नव वा मूलमन्त्रतः ।
देवस्य दक्षिणे हस्ते हवि र्न्यासं समाचरेत् ।। ४१२

निवेदनेषु सर्वेषु ग्राह्यमुद्रा प्रकीर्तिता ।
पानकं चापि पानीयं हस्त प्रक्षाळनं ततः ।। ४१३

आचामन् देवदेवाय दद्यात्तांबूल संचयम् ।
आरात्रि मंगळं कुर्यादन्ते देवस्य पद्मज! ।। ४१४

आरात्रि मंगळं कुर्यात् देवे मन्त्रासन स्थिते ।
देवीना मर्चनं चैवं तत्तन्मन्त्रै र्नचान्यथा ।। ४१५

सर्वासामपि पूजानां विधिरेष न चान्यथा ।
मानुषे मन्दिरे चैष विधि रेवं मठेष्वपि ।। ४१६

यदि विष्णोरायतने विशेषो वक्ष्यतेऽधुना ।

देवालये

पादप्रक्षाळनाचामौ कारये द्गोपुराद्बहिः ।। ४१७

महामंडप मासाद्य कुर्यात् पुण्याहपूजनम् ।
तज्जलैः प्रोक्षणं कुर्यात् मंडपावरणादिषु ।। ४१८

गन्धमाल्यानि दैवानि विष्वक्सेनाय दापयेत् ।
विष्वक्सेन धृतं सर्वं देशिको धारये त्स्वयम् ।। ४१९

मूलबेर स्थितां शक्तिं कर्मार्चायां समाह्वयेत् ।

षडर्चाः

कर्मार्चा चोत्सवार्चा च बल्यर्चा च तथैव च ।। ४२०

यागार्चा तीर्थयात्रार्चा शयनार्चेति षट्क्रमात् ।
आवाहनं क्रमा देषां पूर्वात् पूर्वात् परेऽपरे ।। ४२१

देवीभ्यां वा विना वापि देवार्चन मुदीर्यते ।
मूलदेवगतां शक्ति मौत्सव्या मर्चये द्गुरुः ।। ४२२

प्रवर्तिते वेदघोषे कांडवस्त्रे व्यपोहिते ।

भक्तेभ्यो घटदीप दर्शनम्

सेवार्थं वैष्णवादीनां घटदीपार्चनं चरेत्।। ४२३

घटे दीपं समुद्दीप्य देवदास्यो महानसात् ।
आधारपात्रे देवस्य स्थापयेयुः पुरो भुवि ।। ४२४

पूर्ववत्तिः परिभ्राम्य निक्षेपे न्मंडपाद्बहिः ।

घटदीपदर्शन फलम्

घटदीपन्तु यः पश्ये द्देवस्य पुरतस्स्थितः ।। ४२५

सप्तजन्मार्जितं पापं तत् क्षणादेव नश्यति ।

परिवार देवाराधनम्

देवार्चने समाप्तेऽथ देवीना मर्चनं मतम् ।। ४२६

आलयाश्रितदेवानां अर्चनं तदनन्तरम् ।
पुंदेवार्चनतः पश्चात् स्त्रीदेवार्चन मिष्यते ।। ४२७

पर्याप्ते पूजने तेषां द्वारपालान् समर्चयेत् ।
अनन्त सेनेश खग पूजनं तदनन्तरम् ।। ४२७

भक्त बिंबार्चनं कुर्यात् विहगेन्द्रार्चना त्परम् ।

बलिदानम्

तदन्ते बलिदानं स्यात् चंडादीनां यथाक्रमम् ।। ४२८

पार्षदेभ्यो बलिं दद्यात् बलिपीठे चतुर्मुख! ।
बल्यर्चा सहितं कुर्यात् बलिदानं दिनेदिने ।। ४२९

अंतेस्यात् उत्सवं विष्णोः सेवायै सर्वदेहिनाम् ।

मन्त्रासनम्

पुन र्मंत्रासने देवं निवेश्य कमलासन! ।। ४३०

अर्घ्यादि मधुपर्कान्तं कृत्वा कांडपटं ततः ।
व्यपोह्य देवं नीराज्य प्राशयेत् पाद्यमम्बु तत् ।। ४३१

प्राशनं विष्णुपाद्यस्य त्रिः खलूक्तं चतुर्मुख! ।
आद्यन्तयोः प्रोक्षणं स्यात् गंध पुष्पाणि धारयेत् ।। ४३२

पादुका शिरसा धार्या बाह्वो रुरसि वा विधे! ।
अश्नीयात् पादतुलसीं कर्णयो रुभयो रपि ।। ४३३

धार्या सा वासुदेवान्न पावनं सर्वदेहिनाम् ।
विष्णुपादोदके नैन पितृश्राद्धं समाचरेत्।। ४३४

विष्णोर्निवेदिताऽन्नेन श्राद्धकर्माणि कारयेत् ।
भुंजीत विष्णु नैवेद्यं देवीभ्योऽपि निवेदितम् ।। ४३५

चंडादि परिवाराणां यदन्नं च निवेदितम् ।
तन्नभुंजीत मनुजः जलेऽग्नौ वा विनिक्षिपेत्।। ४३६

आद्रियेत् देवदेवाय यद्यत्तस्मै निवेदितम् ।
तेनैव स्वगृहे विष्णुं तोषये दविशंकितः ।। ४३७

विष्णु प्रसादान् सर्वेभ्यो यथायोग्यं विचक्षणः ।
दत्वा काण्डपटेनैव तिरोधाय ततः परम् ।। ४३८

यथाशक्ति जपं कुर्यात् येन विष्णु स्समर्चितः ।
आवाहन क्रमेणैव पुनरुद्वासनं मतम् ।। ४३९

अदर्शयन् पृष्ठदेशं निर्गच्छेत् यागमंदिरात् ।
विधाय तत् कवाटाभ्यां द्विराचम्य बहिर्गतः ।। ४४०

अनुयागविधिः

इज्यां समर्प्य हरये अनुयागं ततश्चरेत् ।
गृहस्थेभ्यो यतिर्गृह्णन् शिक्येभिक्षां कुटिं व्रजेत् ।। ४४१

तत्र देवेश मभ्यर्च्य निवेद्यान्नं ततः परम् ।
बलिं दत्वान्न मश्नीयात् वन्यवृत्तीवनी यदि ।। ४४२

पक्त्वावन्यं समभ्यर्च्य देवेशं विनिवेद्य च ।
वैश्वदेवादिकं सर्वं समाप्य कमलासन! ।। ४४३

भिक्षुका नतिथीन् वृद्धान् आराध्य तदनंतरम् ।
ततो भुंजीत विधिवत् गृहस्थं परमेश्वरम् ।। ४४

आराध्य वैश्वदेवं च समाप्य शृणु पद्मज ! ।
यतीनां भिक्षुकाणां च भिक्षां दत्वाऽतिथीनपि ।। ४४५

भोजनविधिः

बालान् वृद्धा नातुरांश्च भोजयित्वा शिशूनपि ।
इष्टैः समेतो भुंजीत नैकभक्तिः प्रशस्यते ।। ४४६

पादौ पाणी विशोध्याथ द्विराचम्य परं शृणु ।
प्राक् पश्चा द्वदनो नोचेत् दक्षिणाभिमुख स्स्वयम् ।। ४४७

शोधिते भुक्तिसदने कुक्कुटासन संस्थितः ।
चतुरश्रं समालिप्ते गोमयेन महीतले ।। ४४८

विन्यसेत् भोजनं पात्रं दक्षिणे तीर्थ भाजनम् ।
भुक्तिपात्रे पानपात्रं परिवेषण माचरेत् ।। ४४९

अन्नं शाकं ततो भक्ष्यं रस लेह्ये च पायसम् ।
मध्वाज्य पेय वस्तूनि सूपं च परिवेषयेत्।। ४५०

पवित्र वलयं धृत्वा मूलेन मनुना जलम् ।
अभिमंत्र्य ततः प्रोक्ष्य वाय्वग्नि वरुणाक्षरैः ।। ४५१

शोषयित्वा ततो दग्ध्वा प्लावयित्वा ऽमृतेन च ।
वैष्णव्याचापि गायत्र्या तदन्न मभिमंत्र्य च ।। ४५२

हृत् पुण्डरीक विलसत् ब्रह्मणे विनिवेदयेत् ।
तर्जन्यंगुष्ठ मध्याभिः वामहस्तस्य पद्मज! ।। ४५३

*भुक्तिपात्रं स्पृशन् सम्यक् परिषेचन माचरेत् ।
परिषेचन वेळायां नान्नं हस्तेन लङ्घयेत् ।। ४५४

* शिष्टैः नाद्रियते

व्याहृत्या परिषिच्याथ स्वस्व गृह्योक्त वर्त्मना ।
नोचे द्वर्माख्य मंत्रेण परिषिच्य ततः परम् ।। ४५५

परिषेचन हस्तं तत् शोधयेत् शुद्धवारिणा ।
देवपाद्योदके नैव पूर्वापोशन मुच्यते ।। ४५६

प्राणादि पंचप्राणेभ्यो हवनं हृदयेऽनले ।
कुर्वीत पंचरात्रज्ञः आहुति र्ग्रासमुद्रया ।। ४५७

महती ग्रासमुद्रैव भोजनेषु प्रकीर्तिता ।
तत स्सूपादिभि स्सार्थं भुंजीत चतुरानन! ।। ४५८

आभोजनं वामहस्तं न त्यजेत् वैष्णवोत्तमः ।
अन्यानि मौनी भुंजीत पानपात्रेण पायसम् ।। ४५९

पीत्वा पाद्योदकेनैव पुनरापोशनं चरेत् ।
तत उत्थाय निर्गत्य हस्त प्रक्षाळनं चरेत् ।। ४६०

शोधयित्वा मुखं सम्यक् गंडूषान् द्वादशाचरेत् ।
शुद्धसद्मनि चेत् ब्रह्मन्! गंडूषान् पूर्व माचरेत् ।। ४६१

ततो मुखं च हस्तौ च क्षाळयेत् चतुरानन! ।
ततः पादौ च संशोध्य कुर्या दाचमन द्वयम् ।। ४६२

वैष्णव्या चैव गायत्र्या सूर्यायार्घ्यं सकृच्चरेत् ।
सकृदाचम्य शुचिनिदेशे मूलमनुं तथा ।। ४६३

द्वादशाक्षरविद्यां च गायत्रीं वैष्णवी मपि ।
यथाशक्ति स्वयं जप्त्वा प्रणम्य परमेश्वरम् ।। ४६४

दत्वा द्विजेभ्य स्तांबूलीं स्वयं कुर्याच्च चर्वणम्।
इज्या विधिरयं ब्रह्मन्! इतः स्वाध्याय उच्यते ।। ४६५

स्वाध्यायः

उपदेश क्षमान् प्राप्य प्रणम्य विधिपूर्वकम् ।
अभ्यसेत् वेदवेदांगान् पुराण श्रवणं चरेत् ।। ४६६

स्वय मध्यापयेत् वेदान् पुराण पठनं चरेत् ।
अन्यानि चापि शास्त्राणि श्रावयेत् शृणुया दपि ।। ४६७

गृहक्षेत्रादिकान् पश्येत् इज्योपकरणानि च ।
गमनं तीर्थयात्रार्थं राजकार्यं तदाचरेत् ।। ४६८

वाणिज्यादि क्रियाश्चापि ग्रन्धानां लेखनं तथा ।
एव मादीनि चान्यानि काले स्वाध्याय संज्ञके ।। ४६९

योगः

ततो योगविधिं वक्ष्ये ततः शृणुष्व यथातथम् ।
सायं स्नानं प्रकुर्वीत व्रती यदि चतुर्मुख! ।। ४७०

आदित्येऽस्तमिते चार्धं अर्घ्यदानत्रयं चरेत् ।

प्रदोषे जपसंकोचः

प्रदोषे जपसंकोचः कथ्यते कमलासन! ।। ४७१

त्रयोदश्यां तु संध्यायां जपस्स्यात् दश संख्यया ।
अन्येषुचेत् प्रदोषेषु अष्टाविंशति संख्यया ।। ४७२

गायत्रीन्तु जपेद्धीमान्! नान्यमन्त्रजपः स्मृतः ।
प्रदोषेषु यजे देवं नरकेसरिणं विभुम् ।। ४७३

उपस्थाय ततो ब्रह्मन्! भोजनान्तं समाचरेत् ।
सन्ध्योपस्थान मारभ्य देवमन्दिर दर्शनम् ।। ४७४

स्वगृहे देवतार्चा च भगन्नाम कीर्तनम् ।
एतानि कृत्वा भुंजीत रात्रौ कमलसंभव! ।। ४७५

अनुयागोक्त विधिना कारयेत् रात्रिभोजनम् ।
पादौ प्रक्षाळ्य पाणी च कृताचामः प्रसन्नधीः ।। ४७६

विविक्तं देश मासाद्य ब्रुस्यां वा मृगचर्मणि ।
पवित्रं करयो र्धृत्वा प्राणायामं समाचरेत् ।। ४७७

संहृत्य सर्वतत्त्वानि अनतिक्रम्य तं विधिम् ।
परमात्मनि युंजीत प्रतिरात्रं महानिशि ।। ४७८

अज्ञात योग मार्गश्चेत् शयित श्शयने ततः ।
उत्थायाथ महानिश्यां पादपाणी विशोध्य च ।। ४७९

पवित्रपाणि राचान्तः शुचिदेशं समाश्रितः ।
आसीन आसनेशुक्ले मन्त्रयोगं समाचरेत् ।। ४८०

भगवन्तं हृदि ध्यायेत् यावत् ब्रह्ममुहूर्तकम् ।

शयनविधिः

शयनस्य विधिं वक्ष्ये पादपाणी विशोध्य च ।। ४८१

आचम्य शयनं प्राप्य स्वपेत शयने सुखम् ।
त्यजेत योषित स्संगं ऋतुकाले चतुर्मुख! ।। ४८२

आसंगमेक शयनं परसंगात्पृथक् पृथक् ।
ऋतुस्नानं दिनात् पश्चाता आद्वादशदिनं विधे! ।। ४८३

उपवीत्येव संगच्छन् निवीतं परतो यदि ।
रतिकाले मुखं शुद्धं योषितां कमलासन! ।। ४८४

अष्ट म्येकादशी पर्व प्रतिपत् कल्यमा तिथौ।
आर्द्राग्नि भरणी ज्येष्ठा व्यतीपाते च वैधृतौ ।। ४८५

संक्रान्तौ श्राद्धदिवसे मंद मंगळवारयोः ।
उत्सवे देवदेवस्य ग्रहणे चंद्रसूर्ययोः ।। ४८६

अन्यत्र पुण्यकालेषु व्रतेषु सहयोषिता ।
संगमं नैव कुर्वीत प्रवासा दागतं विना ।। ४८७

योषितां पंचकालविभागः

पंचकालविधिं वक्ष्ये योषिता मपि पद्मज! ।
प्रात स्स्नात्वा विधानेन शिखावर्जं सुमङ्गली ।। ४८८

न्यासवर्जतयाचम्य वस्त्रमार्द्रं परित्यजेत् ।
धौतवस्त्रेण संवीता फाल इंदु कलासमम् ।। ४८९

सर्वत्रेन्दु कलातुल्यं धारयेत् पुंड्रमुत्तमम् ।
हरिद्रारेखिता म्मध्ये धृत्वा न्यासानिचाचरेत् ।। ४९०

गुरून्नत्वा ततः कुर्या दुपदेश विधानतः ।
जप मष्टाक्षरादीनां तत आचम्य वैष्णवान् ।। ४९१

नत्वा द्विजेभ्य स्तांबूलीं दत्वा साद्यालयं हरेः ।
पुत्राद्यै स्सह चंडादीन् नत्वांतर् गृहमाप्नुयात् ।। ४९२

तत्र नत्वा परं देवं देवीः पुष्पफलादिभिः ।
तोषयित्वा परिक्रम्य पुनश्च स्वगृहं व्रजेत् ।। ४९३

आत्मन स्सदने देवं प्रणम्य स्तोत्रयेदपि ।
एतावान् प्रथमः काल उपादान मित श्शृणु ।। ४९४

उपादानम्

आर्जितान्यपि वस्तूनि भाजनान्यपि शोधयेत् ।
यथाहरे र्भवेत् प्रीतिः तथा पाकं समाचरेत् ।। ४९५

वस्त्राणां शोधनं कुर्यात् आतपे शोषयेदपि ।
उपादानस्य समयः इज्या विधिमतः शृणु ।। ४९६

इज्या

इत इज्याः विधिं वक्ष्ये श्रुणुष्व यदि ते मतिः।
पूजान्ते देव देवस्य पादोदक निषेवणम् ।। ४९७

पादुकाधारणं तस्य गंधपुष्पा द्यलंकृतिः ।
तुलस्या भक्षणं चापि भुक्ति भूमि विशोधनम् ।। ४९८

कार्यस्य साधनं चापि वैश्व देवादि कर्मसु ।
भिक्षुभ्य अन्नदानं च स्थविराणां ततः परम् ।। ४९९

पत्युः श्वशुरयो श्चापि भक्तानां परिवेषणम् ।
तेषां तोयादिदानं च तालवृन्तादि सेवनम् ।। ५००

तांबूलादि प्रदानं च सखीभि स्सह भोजनम् ।
तांबूली धारणान्तं स इज्याकाल उदीरितः ।। ५०१

स्वाध्यायः

पुराण श्रवणं चापि ध्यानं भगवतः पुनः ।
जपं चाष्टाक्षरादीनां पात्राणां शोधनं ततः ।। ५०२

स्वाध्यायकाल उदितः योगकाल स्स उच्यते ।

योगः

संध्यायां मन्त्रजापश्च दीपारोपश्च मंदिरे ।। ५०३

स्वगृहे चापि देवस्य सन्निधौ परितो गृहम् ।
दर्शनं देवदेवीनां गुरूणां वंदनन्तथा ।। ५०४

भिक्षूणा मन्नदानं च गुरूणां परिवेषणम् ।
तोयतांबूल दानं च शय्याऽलंकरणं ततः ।। ५०५

प्रक्षाळ्य पत्यु श्चरणौ स्व हस्त चरणावपि ।
आचम्य शयनं गत्वा भर्त्रे तांबूलपल्लवम् ।। ५०६

संचूर्णपूगं दत्वाऽथ लवंगैलादिभि स्सह ।
स्वयं च वासनाद्रव्यैः सह तच्चर्वणं चरेत् ।। ५०७

भर्तृहस्तौ च चरणौ बाहुभ्यां परिपीडयेत् ।
यद्यस्ति संगमे बुद्धिस्तेन गच्छेत् सुमंगली ।। ५०८

तत स्स्व शयनं प्राप्य चिन्तयन्ती हरिं हृदा ।

विधवाधर्मः

स्वपेत, विधवा धर्मो वक्ष्यतेऽद्य श्रुणुष्व ह ।। ५०९

श्रीचूर्ण तिलकं धार्यं पुंड्रमध्ये चतुर्मुख! ।
शिरःस्नानं सदा तस्या अन्यत् सर्वं पुरोदितम् ।। ५१०

अत्रधर्मविशेषः

यतीनां ब्रह्मचारीणां विधवानां चतुर्मुख! ।
तांबूल गंध पुष्पादि सेवनं दूषणं रतिः ।। ५११

विधवानां यतीनां च रात्रौ भुक्ति र्नशस्यते ।
ब्रह्मचारी यतिश्चोभौ यथालाभं हरिं यजेत् ।। ५१२

इति श्रीपांचरात्रे श्री विष्णुतिलके ब्रह्मोपदेशे वर्णाश्रम धर्म निरूपणं नाम तृतीयोऽध्यायः

पर्याप्ते पूजने तेषां द्वारपालान् समर्चयेत् ।
अनन्त सेनेश खग पूजनं तदनन्तरम् ।। ४२७

भक्त बिंबार्चनं कुर्यात् विहगेन्द्रार्चना त्परम् ।

बलिदानम्

तदन्ते बलिदानं स्यात् चंडादीनां यथाक्रमम् ।। ४२८

पार्षदेभ्यो बलिं दद्यात् बलिपीठे चतुर्मुख! ।
बल्यर्चा सहितं कुर्यात् बलिदानं दिनेदिने ।। ४२९

अंतेस्यात् उत्सवं विष्णोः सेवायै सर्वदेहिनाम् ।

मन्त्रासनम्

पुन मंत्रासने देवं निवेश्य कमलासन! ।। ४३०

अर्घ्यादि मधुपर्कान्तं कृत्वा कांडपटं ततः ।
व्यपोह्य देवं नीराज्य प्राशयेत् पाद्यमम्बु तत् ।। ४३१

प्राशनं विष्णुपाद्यस्य त्रिः खलूक्तं चतुर्मुख! ।
आद्यन्तयोः प्रोक्षणं स्यात् गंध पुष्पाणि धारयेत् ।। ४३२

पादुका शिरसा धार्या बाह्वो रुरसि वा विधे! ।
अश्नीयात् पादतुलसीं कर्णयो रुभयो रपि ।। ४३३

धार्या सा वासुदेवान्नं पावनं सर्वदेहिनाम् ।
विष्णुपादोदके नैन पितृश्राद्धं समाचरेत्।। ४३४

विष्णोर्निवेदिताऽन्नेन श्राद्धकर्माणि कारयेत् ।
भुंजीत विष्णु नैवेद्यं देवीभ्योऽपि निवेदितम् ।। ४३५

चंडादि परिवाराणां यदन्नं च निवेदितम् ।
तन्नभुंजीत मनुजः जलेऽग्नौ वा विनिक्षिपेत्।। ४३६

आद्रियेत् देवदेवाय यद्यत्तस्मै निवेदितम् ।
तेनैव स्वगृहे विष्णुं तोषये दविशंकितः ।। ४३७

विष्णु प्रसादान् सर्वेभ्यो यथायोग्यं विचक्षणः ।
दत्वा काण्डपटेनैव तिरोधाय ततः परम् ।। ४३८

यथाशक्ति जपं कुर्यात् येन विष्णु स्समर्चितः ।
आवाहन क्रमेणैव पुनरुद्वासनं मतम् ।। ४३९

अदर्शयन् पृष्ठदेशं निर्गच्छेत् यागमंदिरात् ।
विधाय तत् कवाटाभ्यां द्विराचम्य बहिर्गतः ।। ४४०

अनुयागविधिः

इज्यां समर्प्य हरये अनुयागं ततश्चरेत् ।
गृहस्थेभ्यो यतिर्गृह्णन् शिक्येभिक्षां कुटिं व्रजेत् ।। ४४१

तत्र देवेश मभ्यर्च्य निवेद्यान्नं ततः परम् ।
बलिं दत्वान्न मश्नीयात् वन्यवृत्तीवनी यदि ।। ४४२

पक्त्वावन्यं समभ्यर्च्य देवेशं विनिवेद्य च ।
वैश्वदेवादिकं सर्वं समाप्य कमलासन! ।। ४४३

भिक्षुका नतिथीन् वृद्धान् आराध्य तदनंतरम् ।
ततो भुंजीत विधिवत् गृहस्थं परमेश्वरम् ।। ४४

आराध्य वैश्वदेवं च समाप्य शृणु पद्मज ! ।
यतीनां भिक्षुकाणां च भिक्षां दत्वाऽतिथीनपि ।। ४४५

भोजनविधिः

बालान् वृद्धा नातुरांश्च भोजयित्वा शिशूनपि ।
इष्टैः समेतो भुंजीत नैकभक्तिः प्रशस्यते ।। ४४६

पादौ पाणी विशोध्याथ द्विराचम्य परं शृणु ।
प्राक् पश्चा द्वदनो नोचेत् दक्षिणाभिमुख स्स्वयम् ।। ४४७

शोधिते भुक्तिसदने कुक्कुटासन संस्थितः ।
चतुरश्रं समालिप्ते गोमयेन महीतले ।। ४४८

विन्यसेत् भोजनं पात्रं दक्षिणे तीर्थ भाजनम् ।
भुक्तिपात्रे पानपात्रं परिवेषण माचरेत् ।। ४४९

अन्नं शाकं ततो भक्ष्यं रस लेह्यं च पायसम् ।
मध्वाज्य पेय वस्तूनि सूपं च परिवेषयेत्।। ४५०

पवित्र वलयं धृत्वा मूलेन मनुना जलम् ।
अभिमंत्र्य ततः प्रोक्ष्य वाय्वग्नि वरुणाक्षरैः ।। ४५१

शोषयित्वा ततो दग्ध्वा प्लावयित्वा ऽमृतेन च ।
वैष्णव्याचापि गायत्र्या तदन्न मभिमंत्र्य च ।। ४५२

हृत् पुण्डरीक विलसत् ब्रह्मणे विनिवेदयेत् ।
तर्जन्यंगुष्ठ मध्याभिः वामहस्तस्य पद्मज! ।। ४५३

*भुक्तिपात्रं स्पृशन् सम्यक् परिषेचन माचरेत् ।
परिषेचन वेळायां नान्नं हस्तेन लङ्घयेत् ।। ४५४

---

* शिष्टैः नाद्रियते

व्याहृत्या परिषिच्याथ स्वस्व गृह्योक्त वर्त्मना ।
नोचे द्वर्माख्य मंत्रेण परिषिच्य ततः परम् ।। ४५५

परिषेचन हस्तं तत् शोधयेत् शुद्धवारिणा ।
देवपाद्योदके नैव पूर्वापोशन मुच्यते ।। ४५६

प्राणादि पंचप्राणेभ्यो हवनं हृदयेऽनले ।
कुर्वीत पंचरात्रज्ञः आहुति र्ग्रासमुद्रया ।। ४५७

महती ग्रासमुद्रैव भोजनेषु प्रकीर्तिता ।
तत स्सूपादिभि स्सार्थं भुंजीत चतुरानन! ।। ४५८

आभोजनं वामहस्तं न त्यजेत् वैष्णवोत्तमः ।
अन्यानि मौनी भुंजीत पानपात्रेण पायसम् ।। ४५९

पीत्वा पाद्योदकेनैव पुनरापोशनं चरेत् ।
तत उत्थाय निर्गत्य हस्त प्रक्षाळनं चरेत् ।। ४६०

शोधयित्वा मुखं सम्यक् गंडूषान् द्वादशाचरेत् ।
शुद्धसद्मनि चेत् ब्रह्मन्! गंडूषान् पूर्व माचरेत् ।। ४६१

ततो मुखं च हस्तौ च क्षाळयेत् चतुरानन! ।
ततः पादौ च संशोध्य कुर्या दाचमन द्वयम् ।। ४६२

वैष्णव्या चैव गायत्र्या सूर्यायार्घ्यं सकृच्चरेत् ।
सकृदाचम्य शुचिनिदेशे मूलमनुं तथा ।। ४६३

द्वादशाक्षरविद्यां च गायत्रीं वैष्णवी मपि ।
यथाशक्ति स्वयं जप्त्वा प्रणम्य परमेश्वरम् ।। ४६४

दत्वा द्विजेभ्य स्तांबूलीं स्वयं कुर्याच्च चर्वणम्।
इज्या विधिरयं ब्रह्मन्! इतः स्वाध्याय उच्यते ।। ४६५

स्वाध्यायः

उपदेश क्षमान् प्राप्य प्रणम्य विधिपूर्वकम् ।
अभ्यसेत् वेदवेदांगान् पुराण श्रवणं चरेत् ।। ४६६

स्वय मध्यापयेत् वेदान् पुराण पठनं चरेत् ।
अन्यानि चापि शास्त्राणि श्रावयेत् शृणुया दपि ।। ४६७

गृहक्षेत्रादिकान् पश्येत् इज्योपकरणानि च ।
गमनं तीर्थयात्रार्थं राजकार्यं तदाचरेत् ।। ४६८

वाणिज्यादि क्रियाश्चापि ग्रन्धानां लेखनं तथा ।
एव मादीनि चान्यानि काले स्वाध्याय संज्ञके ।। ४६९

योगः

ततो योगविधिं वक्ष्ये ततः शृणुष्व यथातथम् ।
सायं स्नानं प्रकुर्वीत व्रती यदि चतुर्मुख! ।। ४७०

आदित्येऽस्तमिते चार्धं अर्घ्यदानत्रयं चरेत् ।

प्रदोषे जपसंकोचः

प्रदोषे जपसंकोचः कथ्यते कमलासन! ।। ४७१

त्रयोदश्यां तु संध्यायां जपस्स्यात् दश संख्यया ।
अन्येषुचेत् प्रदोषेषु अष्टाविंशति संख्यया ।। ४७२

गायत्रीन्तु जपेद्धीमान्! नान्यमन्त्रजपः स्मृतः ।
प्रदोषेषु यजे द्देवं नरकेसरिणं विभुम् ।। ४७३

उपस्थाय ततो ब्रह्मन्! भोजनान्तं समाचरेत् ।
सन्ध्योपस्थान मारभ्य देवमन्दिर दर्शनम् ।। ४७४

स्वगृहे देवतार्चा च भगन्नाम कीर्तनम् ।
एतानि कृत्वा भुंजीत रात्रौ कमलसंभव! ।। ४७५

अनुयागोक्त विधिना कारयेत् रात्रिभोजनम् ।
पादौ प्रक्षाळ्य पाणी च कृताचामः प्रसन्नधीः ।। ४७६

विविक्तं देश मासाद्य ब्रुस्यां वा मृगचर्मणि ।
पवित्रं करयो र्धृत्वा प्राणायामं समाचरेत् ।। ४७७

संहृत्य सर्वतत्त्वानि अनतिक्रम्य तं विधिम् ।
परमात्मनि युंजीत प्रतिरात्रं महानिशि ।। ४७८

अज्ञात योग मार्गश्चेत् शयित श्शयने ततः ।
उत्थायाथ महानिश्यां पादपाणी विशोध्य च ।। ४७९

पवित्रपाणि राचान्तः शुचिदेशं समाश्रितः ।
आसीन आसनेशुक्ले मन्त्रयोगं समाचरेत् ।। ४८०

भगवन्तं हृदि ध्यायेत् यावत् ब्रह्ममुहूर्तकम् ।

शयनविधिः

शयनस्य विधिं वक्ष्ये पादपाणी विशोध्य च ।। ४८१

आचम्य शयनं प्राप्य स्वपेत शयने सुखम् ।
त्यजेत योषित स्संगं ऋतुकाले चतुर्मुख! ।। ४८२

आसंगमेक शयनं परसंगात्पृथक् पृथक् ।
ऋतुस्नानं दिनात् पश्चाता आद्वादशदिनं विधे! ।। ४८३

उपवीत्येव संगच्छन् निवीतं परतो यदि ।
रतिकाले मुखं शुद्धं योषितां कमलासन! ।। ४८४

अष्ट म्येकादशी पर्व प्रतिपत् कल्यमा तिथौ।
आर्द्राग्नि भरणी ज्येष्ठा व्यतीपाते च वैधृतौ ।। ४८५

संक्रान्तौ श्राद्धदिवसे मंद मंगळवारयोः ।
उत्सवे देवदेवस्य ग्रहणे चंद्रसूर्ययोः ।। ४८६

अन्यत्र पुण्यकालेषु व्रतेषु सहयोषिता ।
संगमं नैव कुर्वीत प्रवासा दागतं विना ।। ४८७

योषितां पंचकालविभागः

पंचकालविधिं वक्ष्ये योषिता मपि पद्मज! ।
प्रात स्स्नात्वा विधानेन शिखावर्जं सुमङ्गली ।। ४८८

न्यासवर्जतयाचम्य वस्त्रमार्द्रं परित्यजेत् ।
धौतवस्त्रेण संवीता फाल इंदु कलासमम् ।। ४८९

सर्वत्रेन्दु कलातुल्यं धारयेत् पुंड्रमुत्तमम् ।
हरिद्रारेखिता म्मध्ये धृत्वा न्यासानिचाचरेत् ।। ४९०

गुरून्नत्वा ततः कुर्या दुपदेश विधानतः ।
जप मष्टाक्षरादीनां तत आचम्य वैष्णवान् ।। ४९१

नत्वा द्विजेभ्य स्तांबूलीं दत्वा साद्यालयं हरेः ।
पुत्राद्यै स्सह चंडादीन् नत्वांतर् गृहमाप्नुयात् ।। ४९२

तत्र नत्वा परं देवं देवीः पुष्पफलादिभिः ।
तोषयित्वा परिक्रम्य पुनश्च स्वगृहं व्रजेत् ।। ४९३

आत्मन स्सदने देवं प्रणम्य स्तोत्रयेदपि ।
एतावान् प्रथमः काल उपादान मित श्शृणु ।। ४९४

उपादानम्

आर्जितान्यपि वस्तूनि भाजनान्यपि शोधयेत् ।
यथाहरे र्भवेत् प्रीतिः तथा पाकं समाचरेत् ।। ४९५

वस्त्राणां शोधनं कुर्यात् आतपे शोषयेदपि ।
उपादानस्य समयः इज्या विधिमतः शृणु ।। ४९६

इज्या

इत इज्याः विधिं वक्ष्ये श्रुणुष्व यदि ते मतिः।
पूजान्ते देव देवस्य पादोदक निषेवणम् ।। ४९७

पादुकाधारणं तस्य गंधपुष्पा द्यलंकृतिः ।
तुलस्या भक्षणं चापि भुक्ति भूमि विशोधनम् ।। ४९८

कार्यस्य साधनं चापि वैश्व देवादि कर्मसु ।
भिक्षुभ्य अन्नदानं च स्थविराणां ततः परम् ।। ४९९

पत्युः श्वशुरयो श्चापि भक्तानां परिवेषणम् ।
तेषां तोयादिदानं च तालवृन्तादि सेवनम् ।। ५००

तांबूलादि प्रदानं च सखीभि स्सह भोजनम् ।
तांबूली धारणान्तं स इज्याकाल उदीरितः ।। ५०१

स्वाध्यायः

पुराण श्रवणं चापि ध्यानं भगवतः पुनः ।
जपं चाष्टाक्षरादीनां पात्राणां शोधनं ततः ।। ५०२

स्वाध्यायकाल उदितः योगकाल स्स उच्यते ।

योगः

संध्यायां मन्त्रजापश्च दीपारोपश्च मंदिरे ।। ५०३

स्वगृहे चापि देवस्य सन्निधौ परितो गृहम् ।
दर्शनं देवदेवीनां गुरूणां वंदनन्तथा ।। ५०४

भिक्षूणा मन्नदानं च गुरूणां परिवेषणम् ।
तोयतांबूल दानं च शय्याऽलंकरणं ततः ।। ५०५

प्रक्षाळ्य पत्यु श्चरणौ स्व हस्त चरणावपि ।
आचम्य शयनं गत्वा भर्त्रे तांबूलपल्लवम् ।। ५०६

संचूर्णपूगं दत्वाऽथ लवंगैलादिभि स्सह ।
स्वयं च वासनाद्रव्यैः सह तच्चर्वणं चरेत् ।। ५०७

भर्तृहस्तौ च चरणौ बाहुभ्यां परिपीडयेत् ।
यद्यस्ति संगमे बुद्धिस्तेन गच्छेत् सुमंगली ।। ५०८

तत स्स्व शयनं प्राप्य चिन्तयन्ती हरिं हृदा ।

विधवाधर्मः

स्वपेत, विधवा धर्मो वक्ष्यतेऽद्य श्रुणुष्व ह ।। ५०९

श्रीचूर्ण तिलकं धार्यं पुंड्रमध्ये चतुर्मुख ! ।
शिरःस्नानं सदा तस्या अन्यत् सर्वं पुरोदितम् ।। ५१०

अत्रधर्मविशेषः

यतीनां ब्रह्मचारीणां विधवानां चतुर्मुख ! ।
तांबूल गंध पुष्पादि सेवनं दूषणं रतिः ।। ५११

विधवानां यतीनां च रात्रौ भुक्ति र्नशस्यते ।
ब्रह्मचारी यतिश्चोभौ यथालाभं हरिं यजेत् ।। ५१२

इति श्रीपांचरात्रे श्री विष्णुतिलके ब्रह्मोपदेशे वर्णाश्रम धर्म निरूपणं नाम तृतीयोऽध्यायः

अथ योगाध्यायो नाम
चतुर्थोऽध्यायः

योगयुक्त लक्षणम्

लक्षणं योग युक्तस्य वक्ष्यामि शृणु पद्मज! ।
शरीरादि तपश्चर्यो द्विविध ज्ञानवानपि ।। १

मध्यमाभ्यां गुणाभ्यां च विमुख श्चानुलोमजः ।
स्ववर्णाश्रमधर्मेषु नित्यसक्तो हरिप्रियः ।। २

योगलक्षणम्

योगयुक्तो स विज्ञेयः श्रुण्वितो योगलक्षणम् ।
अव्याकुलस्य मनसो बंधनं विषये यदि ।। ३

योगो द्विविधः

यत् तद्योगं विजानीहि न योगो द्विविधो भवेत् ।
कर्तव्यं विहितं कर्म इति यत् बंधनं नृणाम् ।। ४

स कर्मयोगः कथितः ज्ञानयोग मित श्शृणु ।
अर्थे श्रेयसि चित्तस्य सततं यन्निबंधनम् ।। ५

योगे मुक्त्युपायः

ज्ञानयोग स्स एवस्यात् सर्वसिद्धि प्रदायकः ।
यस्मिन्योगे मयि मनो विन्यस्तं सततं विधे! ।। ६

योगांगौ, यमः

स मामेव भजेदंते मोक्षलक्षण मंजसा ।
यमश्च नियमश्चोभौ योगांगौ श्रुणु वच्म्यहम् ।। ७

नियमः

ब्रह्मचर्यं दया सत्यं अहिंसा चार्जवं क्षमा ।
मिताहारो धृति श्शौचं अक्रोधं च यमा दश ।। ८

वासुदेवार्चनं तुष्टिः आस्तिक्यं च जप स्तपः ।
सिद्धांत श्रवणं दानं इत्यादि नियम स्मृतः ।। ९

आसनानि

आसनादि विधिं वक्ष्ये श्रुणु योगप्रसाधनम् ।
विन्यसेत् दक्षिणे पार्श्वे सव्यं सव्येतु दक्षिणम् ।। १०

चरणं कारयेत् गुह्यं आसनं स्वस्तिकं विधे ।
सव्यं पाद मुपादाय दक्षिणो रुपरि क्षिपेत् ।। ११

तथैव दक्षिणं पादं सव्यो रुपरि विन्यसेत् ।
पद्मासन मिदं ब्रह्मन्! आसने षूत्तमं विदुः ।। १२

एकं चरण मन्यस्मिन् ऊरावारोपयेत् यदि ।
वीरासनं विजानीहि सिंहासन मित श्श्रुणु ।। १३

स्वस्तिकं गुल्भदेशाभ्यां व्युत्क्रमेण निपीडयेत् ।
प्रसार्य जानुनाधस्तात् *सिंहासन मिदं विदुः ।। १४

कूर्पकौ विन्यसे न्नाभौ कराभ्यां पीडये द्भुवम् ।
समुन्नसेत् शिरः पादौ मायूर मिद मासनम् ।। १५

सव्यपृष्ठे तदितरं गुल्फं विन्यस्य पद्मज! ।
तत् चेष्टावत्सव्य गुल्फं यथा गोशयनं भवेत् ।। १६

---

* *एतत् स्वस्तिक मासनम्*

आसनं गोमुखं विद्धि मुक्तासन मितश्शृणु ।
व्युत्क्रमेणैव गुल्फाभ्यां पीडयेत् सीविनीद्वयम् ।। १७

मुक्तासन मिदं विद्धि यज्ञ मुक्तासनं शृणु ।
मुष्कोपरि क्षिपेत्सव्यं गुल्फं तदितरं तथा ।। १८

तदूर्ध्वं विन्यसेदेतत् यज्ञमुक्तासनाह्वयम् ।
मुष्कस्याधः क्षिपेत् गुल्फौ सीविन्यो रुभयोरपि ।। १९

पादौ निवेश्य हस्ताभ्या मेतत् सिंहासनं भवेत् ।
भद्रासनं विजानीहि एतदेव चतुर्मुख! ।। २०

प्राणायामः

आसनैरपि योगांगैः यमैश्च नियमै स्तथा ।
सुसंयतो विशेषेण प्राणायामो विधीयते ।। २१

शरीरमानम्

षण्णवत्यंगुळा यामं देहमान शरीरिणाम् ।
शरीरा दधिकः प्राणः आयतो द्वादशांगुळैः ।। २२

देहस्थ मनिलं देह समुत्थेनैव वह्निना ।
न्यूनं समं वा योगेन कुर्वन् ब्रह्मवदिष्यते ।। २३

अग्निस्थानम्

अग्निस्थानं देहमध्ये महारजत सन्निभम् ।
आस्ते त्रिकोणं द्विविधां चतुरश्रं चतुष्पदाम् ।। २४

वृत्ताकारं विहंगाना मष्टास्रं स्वेदजन्मनाम् ।
षडश्रं सर्वजंतूना मग्नेराकृति रब्जज! ।। २५

देहमध्यम्

अग्निर्वैश्वानराख्योऽयं प्राणापानौ पचत्यपि ।
अपानाद्यंगुळा दूर्ध्वं अधो मेढ्रस्य तावतः ।। २६

देहमध्यं चतुष्पाणां सर्वेषा मेव जन्मनाम् ।
कंठस्थाने मनुष्याणां देहमध्यं नवांगुळम् ।। २७

चतुरंगुळ मुत्सेधा तावतैवायतं विदुः ।
अंधीकृति स्तिरश्चां च द्विपदां च चतुष्पदाम् ।। २८

नाभिः

तुंडमध्यं तदिष्टं वै तन्मध्या नाभिरुच्यते ।
द्वादशारं तत्र चक्रं विद्धि मासानराण्यपि ।। २९

मूर्तय स्तेषु विष्ण्वाद्याः द्वादश द्वादशस्वपि ।
तत्र तिष्ठन्नहं चक्रं मायया भ्रामयामि तत् ।। ३०

अरेषु भ्रमते जीवः सर्वदा कमलासन! ।
प्राणेन सहितो जीवः चरत्यत्र विना न हि ।। ३१

कुंडलिस्थानम्

ऊर्ध्वं कुंडलिका स्थानं नाभे स्तिर्य गधोर्ध्वतः ।
अष्टप्रकृति रूपा सा चाष्टधा कुंडलीकृता ।। ३२

वायोरपि च संचारो जलाना मासनं तथा ।
परितः कंदपार्श्वे तु निरुध्येव सदा स्थिता ।। ३३

समावेश्य मुखेनैव ब्रह्मरंध्रबिले यथा ।
मरुता योगकालेषु साग्निना प्रतिबोधिता ।। ३४

स्फुरिताना दयाकाशे नागरूपा महोज्ज्वला ।

सुषुम्ना

वायुर्वाति मुखेनैव ततो याति सुषुम्नया ।। ३५

कंदमध्ये स्थितानाडी सुषुम्नेति प्रकीर्तिता ।
पद्मसूत्र समा भाति रुजुरूर्ध्व प्रवर्तिनी ।। ३६

ब्रह्मणो विवरं यावत् विद्युदाभासनाळका ।
वैष्णवी ब्रह्मनाड्येषा निर्वाण प्राप्तिपद्धतिः ।। ३७

इळादिनाड्यः

इळा च पिङ्गळा चोभे तस्या स्सव्येतरे स्थिते ।
इडा समुत्थिता कन्दात् वामनासापुटावधि ।। ३८

अन्या समुत्थिता तस्मात् अन्यनासापुटावधि ।
गंधिनी हस्तिजीवेति द्वेचान्ये नाडिके ततः ।। ३९

पुरतः पृष्ठतस्तस्या वामेतर दृशौ प्रति ।
पूषा यशस्विनी त्यन्ये तस्मात्कंदा त्समुत्थिते ।। ४०

सव्येतर श्रुत्यवधि वायुमूल मलंबुसा ।
अधोगता कुहू नाडी मेढ्रावधि च याति सा ।। ४१

पादांगुष्ठावधिः कंदात् यथा धाता च कैशिनी ।
दशप्रधान भूतास्ता नाड्यस्ताः कंदसंभवाः ।। ४२

तन्मूला बहवः स्थूला बह्व्य स्सूक्ष्माश्च नाडिकाः ।
द्विसप्तति सहस्राणि स्थूला स्सूक्ष्माश्च नाडिकाः ।। ४३

संख्यातुं नैव शक्यंते स्थूलमूलाः पृथग्विधाः ।
यथाश्वत्थादि पत्रेषु स्थूला स्सूक्ष्मास्तथा विधाः ।। ४४

प्राणादिवायवः

प्राणोपान स्समान श्चाप्युदानो व्यान एव च ।
नागकूर्मौ च कृकरः देवदत्त धनंजयौ ।।

चरंति दशनाडीषु दशप्राणादि वायवः ।
तेषु प्रधानाः पंचैव प्राणाद्याः कमलासन! ।। ४६

प्राणादिस्थानम्

तेषु प्राणो भवेच्छ्रेष्ठः जीवात्मानं बिभर्ति यत् ।
आस्यनासिकयो र्मध्यं हृदयं नाभिमंडलम् ।। ४७

पादांगुष्ठ मिति प्राणस्थानानि कमलासन ।
अपानश्चरति ब्रह्मन्! गुदमेढ्रोरुजानुषु ।। ४८

समान स्सर्वगात्रेषु सर्वव्यापी व्यवस्थितः ।
उदान स्सर्वसंधिस्थः पादयो र्हस्तयोरपि ।। ४९

व्यान श्श्रोत्रोरुकट्यां च गुल्फस्कंध गळेषु च ।
नागादिवायवः पंच त्वगस्थ्यादिषु संस्थिताः ।। ५०

प्राणादिचेष्टा

तुंदस्थं जल मन्नं च रसानपि समीकृतम् ।
तुंद मध्यगतः प्राणः तानि कुर्यात् पृथक् पृथक् ।। ५१

इत्यादि चेष्टनः प्राणः करोति वपुषः स्थितम् ।
अपानवायुः कुरुते मूत्रादीनां विसर्जनम् ।। ५२

प्राणापानादि चेष्टादि क्रियते व्यानवायुना ।
उदंचते शरीरस्थं उदानेन नभस्वता ।। ५३

पोषणादि शरीरस्य समानः कुरुते सदा ।
उद्गारादि क्रिया नागः कूर्मोक्ष्यादि निमीलनम् ।। ५४

कृकरस्तु क्षुधः कर्ता दत्ता निद्रादि कर्मकृत् ।
मृतगात्रस्य शोभादीन् करोति स धनंजयः ।। ५५

नाडीशुद्धिः

नाडीमरून् मरुस्थान चेष्टा ज्ञात्वाब्जसंभव! ।
शुद्दौ यतेत नाडीनां पद्धत्या वक्ष्यमाणया ।। ५६

त्रैवर्णिक स्ववर्णोक्तै स्स्वाश्रमानु गुणै स्तथा ।
शोधयंति तदाचारै र्वासुदेवार्चने रताः ।। ५७

विविक्तं देश मासाद्य जनसंघ विवर्जितम् ।
योगांग द्रव्य सहित श्शुभे दारुमयासने ।। ५८

मृगत्वक् कुशकाशाद्यैः कल्पिते वा यथारुचि ।
ताळमात्रोन्नते ब्रह्मन्! तथा ताळद्वयायते ।। ५९

स्वस्तिकाद्यासनं वश्य मासीनः प्राङ्मुख स्स्वयम् ।
ऋजुकायश्च नासाग्र न्यस्तनेत्र श्चतुर्मुख! ।। ६०

दंतै र्दंतान् असंस्पृश्य जिह्वां तालुनि विन्यसेत् ।
शृतबाहुद्वयो भूत्वा किंचित् कुंचित मस्तकः ।। ६१

प्रदृश्ययोगमुद्रां च प्राणायाम मथाचरेत् ।

प्राणायामः रेचकादिः

रेचकं पूरणं वायोः रोधनं कुंभकं ततः ।। ६२

वातनं रोधनं वायोः प्राणायाम स्सउच्यते ।
दक्षिणेनैव हस्तेन पीडये न्नासिकापुटम् ।। ६३

शनै श्शनैरथ बहिः क्षिपेत् पिंगळयाऽनिलम् ।
द्वात्रिंशन्मात्रया कुक्षौ पूरये दित्यथाऽनिलम् ।। ६४

भूय ष्षोडश मात्राभि श्चतुष्षष्ट्या तु मात्रया ।
संपूर्ण कुम्भवत् देहं कुंभयन् मातरिश्वना ।। ६५

हृदयांबुजम्

पूरये न्नाडय स्सर्वाः पूर्यंते मातरिश्वना ।
हृदयांभोरुहं चापि विकसंत्यब्जसंभव! ।। ६६

एवं कृते सति ब्रह्मन्! चरंति दश वायवः ।
पूरणेन तथा कुंभी करणा दुन्मुखं स्थितम् ।। ६७

गळरूपं विरूधंस्तु तदधोमुख मंबुजम् ।
नाळं ताळमितं तस्य दळाष्टक समन्वितम् ।। ६८

कदळीपुष्प संकाशं चंद्रकांत समप्रभम् ।

प्राणायामफलानि

संध्ययो र्मध्यरात्रे च प्राणायामांस्तु षोडश ।। ६९

एकाह मात्रं कुर्वाण स्सर्वपापा त्प्रमुच्यते ।
किमन्यैर्बहुभिः प्रोक्तैः प्राणायाम परायणाः ।। ७०

निर्धूय सर्वपापानि वत्सरत्रय पूरणात् ।
पश्यंति मामपि ब्रह्मन्! हृदयांभोरुहे स्थितम् ।। ७१

संवत्सर त्रया दूर्ध्वं प्राणायाम परो नरः ।
योग सिद्धो भवेद्योगी वायुजि द्विजितेन्द्रियः ।। ७२

अल्पाशी स्वल्प निद्रश्च तेजस्वी बलवान् भवेत् ।
अपमृत्यु मतिक्रम्य दीर्घमायु रवाप्नुयात् ।। ७३

अधमादयः

प्रस्वेदजननं यस्य प्राणायामेषु सोधमः ।
कम्पनं वपुषो यस्य प्राणायामे स मध्यमः।। ७४

उत्थानं वपुषो यस्य स उत्तम उदाहृतः ।
अधम व्याधि पापानां नाश स्स्यात् मध्यमे पुनः ।। ७५

पापरोग महाव्याधि नाश स्स्यात् उत्तमे पुनः ।
अल्पविष्णोऽल्पमूत्र श्च लघुदेही मिताशनः ।। ७६

वश्येंद्रियः पटुमतिः कालत्रय विदुत्तमः।

वायुधारणम्

रेचकं पूरणं मुक्त्वा कुम्भीकरण मेव च ।। ७७

करोति त्रिषु लोकेषु नैव तस्यास्ति दुर्लभम् ।
नाभिकंदे च नासाग्रे पादांगुष्ठे च यल्लवात् ।। ७८

धारय न्मनसा प्राणान् सर्वकालेषु सर्वदा ।
सर्वरोग विनिर्मुक्तो जीवे द्योगी गतक्लमः ।। ७९

धारणफलम्

कुक्षिरोग विनाशस्स्यात् नाभिकंदेऽसुधारणात् ।
नासाग्रे धारणाद्दीर्घ मायुर्वै देहलाघवम् ।। ८०

पादांगुष्ठेन वै धृत्वा वायुं कमलसंभव! ।
वायु माकृष्य जिह्वाग्रे पिबन्नश्रमदाहभाक् ।। ८१

ब्राह्मे मुहूर्ते संप्राप्ते वायु माकृष्य जिह्वया ।
पिबत स्त्रिषु मासेषु वाक् सिद्धिर्भवति ध्रुवम् ।। ८२

अभ्यस्यतस्तु षण्मासान् महारोग विनाशनम् ।
यत्र यत्र ध्रुवो वायुः अंगे रोगादिदूषितः।। ८३

धारणादेव मरुतः तत्त दारोग्य मश्नुते ।
मनसो धारणादेव श्वसनो धारितो भवेत् ।। ८४

मनस्थापनाहेतुः

मनस स्थ्सापनाहेतुः उच्यते कमलासन! ।
करणानि समाहृत्य विषयेभ्य स्समाहितः ।। ८५

अपाना दूर्ध्व माकृष्य वक्त्रेणोपरि धारयेत् ।
बध्नन्कराभ्यां श्रोत्रादि करणानि यथाक्रमम् ।। ८६

युंजानस्य यथोक्तेन वर्त्मना सवशं मनः ।
मनः पथश्च वै वायुः स्ववशे स्थाप्यते सदा ।। ८७

नासिका पुटयोः प्राणः पर्यायेण प्रवर्तते ।
तिस्रश्च नाडिकाः प्राणाः तास्ताश्चापि चरंत्यमी ।। ८८

शिखिनी विवरे याम्ये प्राणः प्राणभृतां सताम् ।
तदंतश्च पुनःकालं सौम्ये चरति संततम् ।। ८९

इत्थं क्रमेण चरता वायुना वायुजि न्नरः ।
अहश्च रात्रिं पक्षौ च मासर्तून् वत्सरादिकम् ।। ९०

अंतर्मुखो विजानीयात् कालभेद समाहितः।
अंगुष्ठादि स्वावयव स्फुरणात् दर्शनैरपि ।। ९१

अनिष्टदर्शनम्

अनिष्टै र्जीवितस्यापि जानीयात् क्षयमात्मनः ।
ज्ञात्वा यतेत कैवल्य प्राप्तये योगवित्तमः ।। ९२

पादांगुष्ठे करांगुष्ठे स्फुरणं यस्य नश्यति ।
तस्य संवत्सरा दूर्ध्वं जीवितस्य क्षयो भवेत् ।। ९३

मणिबंधे तथा गुल्फे स्फुरणं यस्य नश्यति ।
षण्मासावधि रेतस्य जीवितस्य स्थितिर्भवेत् ।। ९४

कूर्परे स्फुरणं यस्य परा त्रैमासिकी स्थितिः ।
कुक्षौमेहन पार्श्वे च स्फुरणाद्युपलंभतः ।। ९५

माऽसोवधि र्जीवितोऽस्य तदूर्ध्वं श्वेतदर्शने ।
अश्रुते जठरे घोरे दिनानि दशजीवितम् ।। ९६

ज्योतिःखद्योत वद्यस्य तदर्धं तस्य जीवितम् ।
जिह्वाग्रे दर्शने त्रीणि दिनानि स्थितिरात्मनः ।। ९७

ज्वालाया दर्शने मृत्यु र्द्विदिनेनैव संशयः ।
एवमादी न्यनिष्टानि दृष्ट्वायुः क्षयकारणम् ।। ९८

निःश्रेयसा य युंजीत जपध्यान परायणः ।

प्रत्याहारः

मनसात्मन्यनुष्ठानं यदिदं नित्यकर्मणाम् ।। ९९

प्रत्याहार स्सविज्ञेयो योगांगत्वेन सेवितः ।
यद्वाष्टादश भेदेषु मर्मस्थानेषु धारणम् ।। १००

स्थानात् स्थानं समाकृष्य सा प्रत्याहृति रिष्यते ।

मर्मस्थानानि

पादांगुष्ठं तथा गुल्फं जंघामध्यं तथैव च ।। १०१

मध्यमूर्वोश्च मूलं च पायु र्हृदय मेव च ।
मेहनं देहमध्यं च नाभिं च गळकूबरम् ।। १०२

तालुमूलं च मज्जं च घ्राण श्चाक्ष्णो श्च मंडलम् ।
भ्रुवोर्मध्ये ललाटस्य मूर्धा चापि तथाऽपरम् ।। १०३

मूलं च कर्णयो र्मूलं मर्माण्येतानि पद्मज! ।

पञ्चभूतस्थानानि

पंचभूत मये देहे भूते ष्वेतेषु पंचसु ।। १०४

मनसो धारणं यत्त द्युक्तस्य च यमादिभिः ।
धारणा सा च संसारसागरोत्तारकारणम् ।। १०५

आजानुपादपर्यंतं पृथिवीस्थान मिष्यते ।
पीतलाश्चतुरश्रा च वसुधा वज्रलांछिता ।। १०६

स्मर्तव्या पंचघटिका तत्राऽरोप्य प्रभंजनम् ।
तस्योपर्यूरु मूलांतं वारिस्थानं चतुर्मुख! ।। १०७

अर्धचंद्र समाकारं श्वेतमंबुज लांछितम् ।
स्मर्तव्य मंगश्वसन मारोप्य दशनाडिका ।। १०८

आनाभि देहमध्यांतं अग्नेस्थ्सान मुदाहृतम् ।
तत्र सिंधूरवर्णोग्निः त्रिकोण सदृश स्तथा ।। १०९

स्मर्तव्या नाडिका प्राणं धृत्वा दश च पंच च ।
नाभे रुपरि नासांतं वायुस्थानं स तत्र च ।। ११०

वेदिकाकार वद्रिक्तो बलवान् भूतमारुतः ।
स्मर्तव्यः कुम्भके नैव प्राण मारोप्य मारुतम् ।। १११

घटिकाविंशतिं तस्मात् प्राणात् ब्रह्मबिलावधि ।
व्योमस्थानं नभ स्तत्र भिन्नांजन समप्रभम् ।। ११२

ध्येयं मारुत मासेव्यं कुम्भके नैव यल्लवात् ।
विश्वंभरांशजं देहं चतुर्बाहुं किरीटिनम् ।। ११३

पञ्चभूतांशः

अनिरुद्धं पृथिव्यंशे यजेत भवमुक्तये ।
अंबशे पूजयेत् योगी नारायण मुदग्रधीः ।। ११४

प्रद्युम्नमग्नौ वाय्वंशे संकर्षण मतःपरम् ।
व्योमांशे परमात्मानं वासुदेवं समर्चयेत् ।। ११५

अचिरा देव तत् प्राप्तिः युंजानस्य न संशयः।

समाधिः

बध्वा योगासनं पूर्वं हृद्देशे रचितांजलिः ।। ११६

न्यस्त नासाग्रनयनो जिह्वां विन्यस्य तालुनि ।
दन्तै र्दन्तानसंस्पृश्य ऋजुकाय अनन्यधीः ।। ११७

सं हरे दिंद्रियग्रामं ततो बुद्ध्या विशुद्धया ।
चिंतनं वासुदेवस्य परस्य परमात्मनः ।। ११८

स्वरूप व्याप्तरूपस्य स्वहृदंभोरुहासने ।
यत्र ध्यानं प्रशंसंति कैवल्यफलदं सदा ।। ११९

यावन्मात्रं वासुदेवं चिंतयेत् कुंभकेन यः ।
सप्तजन्मकृतं पापं तस्य नश्यति योगिनः ।। १२०

नाभिकंदात् समारभ्य यावत् हृदयगोचरम् ।
जाग्रद्वतिं विजानीयात् कण्ठस्थ स्वप्नवर्जितम् ।। १२१

सुषुप्तिं तालु मध्यस्थं तुर्यं भ्रूमध्य संस्थितम् ।
तुर्यातीतं परं ब्रह्म ब्रह्मरंध्रे तु लक्षयेत् ।। १२२

जाग्रत् स्थलं समारभ्य यावत् ब्रह्म बिलांतरम् ।

भगवद्ध्यानम्

सदोदयन्तु तुर्यं स्यात् तुर्यान्ते विष्णुरुच्यते ।। १२३

ध्यायेच्चैव सदायुक्तो व्योम्निचात्यंत निर्मले ।
सूर्यकोटिद्युतिधरं नित्योदित मधोक्षजम् ।। १२४

हृदयाम्भोरुहासीनं ध्याये द्वा विश्वरूपिणम् ।
अनेकाकार रचितं अनेक वदनान्वितम् ।। १२५

अनेक भक्तसंयुक्त मनेकायुध मंडितम् ।
नानावर्णधरं देवं शांतमुग्र मुदाहृतम् ।। १२६

अनेक नयनाकीर्णं सूर्यकोटि समप्रभम् ।
ध्यायतो योगिन स्सर्वं मनोज्ञानं विनश्यति ।। १२७

दृप्तमूर्तीक मध्यस्थं चैतन्यं ज्योतिरव्ययम् ।
कदंबगोळकाकारं तृतीया न्मंडला त्परम् ।। १२८

अनंतमानंदमयं चिन्मयं भास्वरं विभुम् ।
निवासदीपसदृश मकृत्रिम मणिप्रभम् ।। १२९

ध्यायतो योगिनस्तस्य मुक्तिः करतले स्थिता।
विश्वरूपस्य देवस्यरूपं यत्किंचि देव हि ।। १३०

स्थवीय्य सूक्ष्ममन्यद्वा पश्यन् हृदय पंकजे ।
ध्यायतो योगिनो यस्य साक्षादेव प्रकाशते ।। १३१

अणिमादिफलं चैव सकलं काः कथापरम् ।
जीवात्मनः परस्यापि यद्येक मुभयोरपि ।। १३२

समाधि स्स तु विज्ञेयः सर्वार्थानां प्रसाधकः ।
अहमेव परंब्रह्म तदिदं ध्यानमास्थितः ।। १३३

स्थाणुभूतां दृढं शश्वत् विषयान् नावबुध्यते ।
यथा ब्रह्माजलंवारां प्रविष्टं निश्चलां विधिम् ।। १३४

चलस्वभावं त्यजति तथा जीवः प्रलीयते ।
परमात्मनि वैकुंठे समाधि स्तस्य योगिनः ।। १३५

अचिरात् परमे तत्त्वे ह्यभिलाषा प्रवर्तते ।
तदुपायं प्रवक्ष्यामि श्रूयतां कमलासन! ।। १३६

द्वादशाक्षर मारभ्य परमात्म धिया हरिम् ।
आसूच्य भूमौ लिखिते चक्रपद्मे सुलक्षणे ।। १३७

तस्योपरि सुविस्तीर्णे समासीनः कुशासने ।
बध्वा पद्मासनं योगी सितेपक्षे तथोत्तरे ।। १३८

अयने श्वसनं पूर्वं धारयित्वा यथाक्रमम् ।
देहमध्ये स्थितं वह्निं दीपयित्वा समुज्ज्वलम् ।। १३९

हृत्पुंडरीकमध्यस्थं स्मरन् ब्रह्म सनातनम् ।
विद्युत् सहस्रसंकाशं युगांतानल सन्निभम् ।। १४०

तन्मयं च स्ववैतव्यं कृत्वा तद्वह्नि रश्मिभिः ।
भूतदेहं दहेत् कृत्स्नं धृत्वा मंत्र स्वरूपधृत्।। १४१

विमुक्तमिव पक्षीनां आसीनं चिंतयेत् शनैः ।
शनैः परिणतंमन्त्रं तनुतेजोमयीं सदा ।। १४२

चिन्मयीं सर्वगां शब्दस्वरूपां भावयन्नपि ।
शनैश्शनैरस्थिरां च विनपाय्य ततस्स्वयम् ।। १४३

ब्रह्म संपद्यते योगी न भूयस्संसरेदिह ।
इत्येवं योगसारोऽयं कथितः कमलासन! ।। १४४

नित्यक्रियातत्पराणां संसारविमुखात्मनाम् ।
मद्भक्तानां दीक्षितानां वाच्योय मुपसीदताम् ।। १४५

इदं भवहरं पुण्यं योगं सर्वार्थसिद्धिदम् ।
योऽधीते गुर्वनुज्ञात स्सयाति परमांगतिम् ।। १४६

मंत्रयोगः

योगांतरमितो वक्ष्ये तत् शृणुष्वाब्जसंभव! ।
ऐहिकामुष्मिकं सर्वं मंत्रयोगो ददाति हि ।। १४७

मंत्रस्यार्थः

मननात् प्राणिन स्त्राति यतो मंत्र उदीर्यते ।
उपास्यते ततो मंत्रं योगिभिः फलकांक्षिभिः ।। १४८

सामान्यतो मंत्राभ्यासे

यदृच्छया श्रुतो मंत्र श्छलेनाऽथ बलेन वा ।
पत्रेऽक्षितो वा व्यर्थ स्यात् प्रत्युतानर्थकृत् स्मृतः ।। १५०

सर्वे मन्त्रा स्सर्वफला गुरुवक्त्रात् यदि श्रुताः।
तस्माद् गुरुमुखादेव मन्त्रो ग्राह्यो मनीषिभिः।।

गुरुकुलवासः

कुर्यात् गुरुकुले वासं वत्सरान् द्वादशाथऽवा ।
नव षड्वा समांस्त्रीन्वा मासान् द्वादशवाऽथ षट् ।। १५१

उषित्वा वरिवस्याभि स्संपाद्य करुणां ततः ।
लभेत स्वेप्सितं मंत्रं बलान्नैव कदाचन ।। १५२

विष्ण्वर्चनादि

विष्ण्वर्चनादि सिध्यर्थं विष्णुसायुज्य सिद्धये ।
इहैव फलसिध्यर्थं मंत्राभ्यासं समाचरेत् ।। १५३

मंत्रग्रहणकालः

देशकालादि नियममरिमित्रादि शोधनम् ।
पञ्चसंस्कारदीक्षायां मोक्षार्थी न विचारयेत् ।। १५४

विष्ण्वर्चनादि दीक्षायां स्वयंव्यक्तस्थलादिषु ।
अयनं मास ऋक्षाणि तिथि वारादिकं तथा ।। १५५

दीक्षा

अरिमित्रादिकं तद्वत् अर्चको न विचारयेत् ।
मंत्राणा मुपदेशोऽयं देशिकस्य मुखांबुजात् ।। १५६

उपदेष्टव्यः

अभियातस्य दीक्षेति तया शिष्यपवित्रता ।
प्रणतायैव शिष्याय स्ववर्णाश्रमधर्मिणे ।। १५७

सक्तचित्ताय सततं विहितेष्वेव कर्मसु ।
वेदवेदांगयोगानां सारासारविदे पुनः ।। १५८

बहुश्रुताय शीलाय सततं वृद्धसेविने ।
मंत्रा स्समुपदेष्टव्याः नान्याय चतुरानन! ।। १५९

मंत्रस्वीकारकाः

मंत्रस्वीकारकालोऽद्य वक्ष्यते श्रुणुतन्मनाः ।
अर्केंद्वोरु परागे च चैत्रे वा मार्गशीर्षके ।। १६०

एकादश्यां शुक्लपक्षे मंत्रदीक्षा प्रशस्यते ।
तत्र वारादिदोषाणि देशिको न विलोकयेत् ।। १६१

इतो वक्ष्ये विशेषेण मंत्रारंभदिनं विधे! ।
चैत्रमासे भवे द्दुःखं वैशाखे रत्नसंपदः ।। १६२

साधकस्य मृतिर्ज्येष्ठ आषाढे बंधुनाशनम् ।
उत्तमा श्रावणे बुद्धि र्भाद्रपद्यां प्रजाव्ययः ।। १६३

सुखमाश्वयुजे मासि कार्तिके ज्ञानसंपदः ।
शुभं भवेन्मार्गशीर्षे पुष्ये ज्ञानविनाशनम् ।। १६४

माघे मेधाभिवृद्धिः स्यात् फाल्गुने सर्वसंपदः ।
उत्तरात्रितयं ब्रह्मा रेवती पुष्य वासवाः ।। १६५

वायु मित्र पितृ त्वाष्ट्र नैऋत्यदिति शंकराः ।
इंद्र विष्णिवदु हस्ता श्च दीक्षायां शुभदा विधे! ।। १६६

चतुर्दश्यष्टमी पर्व भौमवारा न शोभनाः ।
चरस्थिरोभयाश्श्रेष्टनिंद्यमध्याः क्रमात् स्मृताः ।। १६७

दीक्षाकाले ग्रहास्सर्वे रंध्रस्थाने विनाशदाः ।
मंत्रारंभे सदा वर्ज्यं पितृमासचतुष्टयम् ।। १६८

अन्यांस्तु शुभदान्मासान् आमनंति मनीषिणः ।
जन्मत्रयं च संक्रांति सौम्यवाराश्च शोभनाः ।। १६९

आनुगुण्यम्

समभूमौ समासीनः प्राङ्मुखो धरणीतले ।
लिखेत् तिस्रोर्ध्वगा रेखाः तिर्यक् रेखाश्च तावतीः ।। १७०

एवं कृते तु चत्वारि कोष्ठानि कमलासन! ।
ऐशानीं दिशमारभ्य प्रादक्षिण्य क्रमेण वै ।। १७१

अकारादि क्षकारांतं कोष्ठेष्वेषु समर्पयेत् ।
नामाद्यक्षर वर्णोऽयं यस्मिन् कोष्ठेव लोक्यते ।। १७२

तत्सिद्धिमिति जानीहि प्रादक्षिण्यादनंतरं ।
साध्य मित्युच्यते ब्रह्मन् ! सुसिद्धं तदनंतरम् ।। १७३

अरिसंज्ञं तदन्यत्तु फलान्येषां ब्रवीमि ते ।
मंत्राद्यक्षर वर्णोऽयं यस्मिन् कोष्ठे निवेशितः ।। १७४

स साधकस्य फलदो वक्ष्यमाणेन वर्त्मना ।
यथोक्तेन जपेनैव सिद्धे सिद्धा मनुर्भवेत् ।। १७५

द्विगुणात् साध्यते साध्ये क्वचित् सिध्यति वा न वा! ।
सुसिद्धेर्धजपादेव सिद्धो मंत्रः प्रसीदति ।। १७६

वर्तते यद्यरौवर्णौ न सिध्यति कदाचन ।
पुत्रदारात्मबंधूनां मारणाय प्रवर्तते ।। १७७

तस्माद्विलोक्य सिद्धादीन् पश्चान्मंत्राणि साधयेत् ।

परीक्षाहीनमंत्राणि

चतुर्णां मूलमंत्राणां नानुगुण्यपरीक्षणम् ।। १७८

प्रणवोऽष्टाक्षरोमंत्रः द्वादशाक्षर एव च ।
तथैव विष्णुगायत्री मूलमंत्रा इमे स्मृताः ।। १७९

मन्त्रमात्रदीक्षा

मंत्रमात्रैक दीक्षाया विधिरत्र प्रवक्ष्यते ।
सुपरीक्षित कर्माणि स्नातं शुद्धांबर श्शुचिम् ।। १८०

पूर्वोक्ततिथि नक्षत्रे पुण्यकाले शुचिस्थले ।
यतीनां वैष्णवो वह्निः इतरेषां स्वगृह्यवत् ।। १८१

कृत्वा चाग्नि मुखं सर्वं वह्नावावाह्य मामपि ।
नैवेद्यांतं तथा हुत्वा मूलमंत्रेण होमयेत् ।। १८२

अष्टोत्तरशतं प्रोक्तं मूलेन समिधाहुतीः ।
चरुणा षोडश प्रोक्तं पुंसूक्तेन चतुर्मुख! ।। १८३

आज्येन मूलमंत्रेण पुनरष्टोत्तरं शतम् ।
तत स्विष्टकृतं हुत्वा प्रायश्चित्ताहुती स्तथा ।। १८४

अंते मंत्रोपदेश स्स्यात् काले पूर्वावलोकिते ।
अग्निस्थं कुंभमुद्वास्य शिष्यं कुंभाम्बुभि स्ततः ।। १८५

अभिषिच्य तत स्सम्यक् न्यासध्यान पुरस्सरम् ।
मंत्र स्समुपदेष्टव्यः यथायोग्यं चतुर्मुख! ।। १८६

पंचसंस्कार दीक्षा

प्रसंगा दत्रवक्ष्यामि पंचसंस्कार संज्ञिताम् ।
दीक्षां मत्प्रीतिजननीं पूजायोग्यो ययाद्विजः ।। १८७

स्वयंव्यक्ते तथा सैद्धे चार्षे वा मानुषे तथा ।
ये पूजयितु मिच्छंति ये च संति मुमुक्षवः ।। १८८

तेषामेतां विना दीक्षां गतिरन्या न विद्यते ।
तापः पुंड्र स्तथा नाम मन्त्रो यागश्च पंचमः ।। १८९

पंचसंस्कारदीक्षैषा देवदेवप्रियावहा ।
पंचसंस्कारदीक्षावान् महाभागवत स्स्मृतः ।। १९०

महाभागवतै रेव पूज्यो देवालयादिषु ।
देवतायतने रम्ये गृहे वा गुरुशिष्ययोः।। १९१

मठे वा शोभनदिने पंचसंस्कारमाचरेत् ।
तदर्धमृत्विजश्चाष्टौ चतुरश्शक्त्यभावतः ।। १९२

ऋत्विग्वरणम्

वृत्वा पूर्वदिने रात्रौ अंकुरार्पणमाचरेत् ।
षोडशस्तंभयुक्तायां प्रपायां वेदिकोपरि ।। १९३

व्रीहिभि स्तंडुलै श्चापि तिलैः पीठं प्रकल्पयेत् ।
दळाष्टकयुतं पद्मं तिलोपरि लिखेत् गुरुः ।। १९४

हैमं वा राजतं ताम्रं कलशं मृत्तिकामयम् ।
सूत्रवेष्टनसंयुक्तं मृण्मयं चेत् चतुर्मुख! ।। १९५

कूर्चापिधानं विन्यस्य गंधांबुपरिपूरितम् ।
आमं कर्पूरचूर्णं च क्षिपेत् तत्र विशेषतः ।। १९६

पर्याप्ततोरणार्चेऽथ वेदघोषे प्रवर्तिते ।
सङ्कीर्णे वाद्यघोषे च कुंभे रत्नानि निक्षिपेत् ।। १९७

भगवत् प्रतिमां कांचित् कुंभे विन्यस्य पद्मज! ।
शरावेन पिधायाथ योगपीठं प्रकल्पयेत् ।। १९८

ततो देवं समावाह्य नैवेद्यांतं समर्चयेत् ।
ततोऽष्टाक्षरमंत्रस्य सहस्रं जपमाचरेत् ।। १९९

ऋत्विजो घोषयेयुश्च वेदानंगपुरोगमान् ।
ततः कुंभपुरोभागे कुंडे वा स्थंडिलेऽथ वा ।। २००

स्वगृह्योक्त विधानेन पंचरात्रक्रमेण वा ।
सम्यगग्निं प्रतिष्ठाप्य तत्रावाह्य जगत्प्रभुम् ।। २०१

नैवेद्यांतं समभ्यर्च्य समिद्भि र्मूलमंत्रतः ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।। २०२

हुत्वा पुरुषसूक्तेन चरुभि ष्षोडशाहुतीः ।
आज्याहुतिं ततः कुर्यात् आदद्यात् समिधाहुतीः ।। २०३

हुत्वा स्विष्टकृतं पश्चात् प्रायश्चित्ताहुतिं ततः ।
ततः पूर्णाहुतिं हुत्वा अनुज्ञाप्य द्विजानपि ।। २०४

ततः कलशमभ्यर्च्य शिष्यं तेनाभिषेचयेत् ।
पौरुषेणैव सूक्तेन कलशेनाभिषेचनम् ।। २०५

तं शिष्यं शुद्धवस्त्राद्यैः अलंकृत्य ततः परम् ।
अग्निकुंड समीपेतं उदङ्मुख मुपाविशेत् ।। २०६

बद्धांजलि स्ततशिष्यो दंडवत् प्रणमेत् क्षितौ ।
प्रार्थयेत गुरुं शिष्यः गाथया वक्ष्यमाणया ।। २०७

विष्णुसायुज्य सिध्यर्धं नित्यकर्मादिसिद्धये ।
विष्ण्वर्चनासु दीक्षां च पंचसंस्कारमार्गतः ।। २०८

दत्वानुज्ञां रक्ष रक्ष विष्णुप्रीत्यै च मां ततः ।
प्रार्थयंतममुं शिष्यं होमकुंडसमीपतः ।। २०९

कुंडस्य दक्षिणे पार्श्वे उदङ्मुख मुपाविशेत् ।
चक्रं शंखं तथा सम्यक् पूजय न्मंत्रविद्गुरुः ।। २१०

नैवेद्यांतं समभ्यर्च्य होमाग्नौ तापयेत् पृथक् ।
तप्तं दृष्ट्वाऽथ शिष्यस्य भुजमूले च दक्षिणे ।। २११

चक्रं तदितरे शंखं विन्यस्य स्वस्वमंत्रतः ।
पश्चात् प्रक्षाळ्य तौ ब्रह्मन्! पूजास्थाने निवेशयेत् ।। २१२

पूर्वोक्तविधिना कुर्यात् पुंड्राणां धारणं ततः ।
दास्यनामापि शिष्यस्य दद्यात् विष्णो र्महात्मनः ।। २१३

चतुर्णां मूलमंत्राणां अन्येषामपि पद्मज! ।
न्यास ध्यानादि सहितं उपदेश स्ततःपरम् ।। २१४

श्रीमूर्तिदानं शिष्याय यागविद्या समन्वितम् ।
एते हि पंचसंस्काराः कथिता स्संग्रहेण ते ।। २१५

कुर्वीत प्रति संस्कारं संकल्पं देशिकोत्तमः ।

धर्मोपदेशः

धर्मोपदेशं कुर्वीत तत श्शिष्याय देशिकः ।। २१६

मंत्रः परस्य नाख्येयः नाक्षमालां प्रदर्शयेत् ।
मुद्रां सिद्धिं न कथयेत् गुरुं सम्यक् प्रकाशयेत् ।। २१७

गुरोर्नलंघये दाज्ञां शयनं चास्य नाक्रमेत् ।
न दूषयेद्वाङ्मनोभ्यां तत्प्रियं सर्वदा चरेत् ।। २१८

गुरुवद्गुरुदारेषु वर्तितव्य मसन्निधौ ।
आचार्य मच्युतं शास्त्रं त्रयं सम्मानये त्सदा ।। २१९

नैव स्पृशे न्नास्तिकादीन् न वसेत् तै स्सह क्वचित् ।
गुरुदेवाग्निविप्रेषु चरणौ न प्रसारयेत् ।। २२०

वासुदेवमयं ब्रह्मन्! जगत्सर्वं विचिंतयेत् ।
अभ्यर्च्य वासुदेवं तं आत्मपोषण माचरेत् ।। २२१

जपं स्तोत्रं प्रणामं च संध्यास्वेव समाचरेत् ।
संध्ययो रुभयो र्नित्यं अग्न्युपास्तिं समाचरेत् ।। २२२

भगवद्ध्यान कैंकर्यं भक्तप्रणति माचरेत् ।
पुत्रदारादि विमुखः कामक्रोधौ विवर्जयेत् ।। २२३

समस्सन् सर्वभूतेषु संसारविमुखो भवेत् ।
शनै श्शनैरिंद्रियाणि विषयेभ्यो निवर्तयेत् ।। २२४

स्वसूत्रोक्त विधानेन पंचरात्रोदितेन वा ।
निषेकादि क्रियाः कुर्यात् भगवद्ध्यानमास्थितः ।। २२५

संकीर्तयेत् सदा ब्रह्मन्! वासुदेवं सनातनम् ।
संसारविमुखै स्सार्धं वेदाध्ययन माचरेत् ।। २२६

एवं निबोधये द्धर्मान् शिष्याय गुरुसत्तमः ।
शांतिहोमं ततो हुत्वा पूर्णाहुति मतःपरम् ।। २२७

अग्निं च विसृजेत् शिष्यः गुरवे दक्षिणामपि ।
वस्त्राणि च यथातोषं दत्वानुज्ञापुरस्सरम् ।। २२८

ऋत्विग्भ्योपि तथा दत्वा तत स्स्वनिलयं व्रजेत् ।
द्विजानां शूद्रजातीनां विधिरेष चतुर्मुख! ।। २२९

क्षत्रियादीनां

अन्येषां क्षत्रियादीनां कलशस्थापनं विना ।

मंत्रभेदाः

मंत्रभेदानितो वक्ष्ये तत्पुर श्चरणादि च ।। २३०

तत्सिद्धिंच विशेषेण श्रुणुष्व कमलासन! ।

वर्णाः

वर्ण स्वर विभेदेन द्विविधा वर्णजातयः ।। २३१

अचःस्वरा हलोवर्णाः यत्रास्ते भारती स्वयम् ।
अकाराद्या ष्षोडशैव स्वरा अच उदाहताः ।। २३२

ककारादि क्षकारांतं पंचत्रिंशद्धलोमताः ।

वर्गपंचकाः

काद्याश्चाद्याश्च टाद्याश्च ताद्याः पाद्याः पृथक् पृथक् ।। २३३

पंचपंचैववर्गाः स्युः आद्या दश चतुर्मुख! ।
(षोडशस्वरा इत्यपिक्वचित्पाठः)
हल्सु स्वरसमेतासु प्रत्यर्णं षोडशाक्षरा।। २३४

आहत्य रुद्रोत्तरषट् शतमक्षरमातृका।
अनुस्वारो विसर्गश्च द्वावेतावुपरि स्थितौ ।। २३५

नतिस्वाहा वौषडिति हुंफट् भ्यां मस्तकं विदुः ।
मातृकाख्य सरस्वत्या ऋषिर्ब्रह्मा उदाहृतः ।। २३६

छंदोविराट् तथा देवी साक्षात्सा भारती मता ।
मंत्रस्थवर्णा बीजानि शक्तय स्ताः स्वरा मताः ।। २३७

अकारादि क्षकारांतवर्णा मंत्र श्चतुर्मुख! ।
वर्गाष्षट्च षडंगानि सर्वसिद्धिप्रदो मनुः ।। २३८

रक्तांबुधौ कोकनदे श्वेतांबुदचय प्रभा।
कोदंड मैक्षवं शंखं रत्नानि कुसुमान्यपि ।। २३९

दधाना पुस्तकं व्याख्यां करै र्जपपटं तथा ।
सर्वसिद्धिप्रदा देवी सदा मे वाचि नृत्यतु ।। २४०

अयुतं जपसंख्या स्यात्सहस्रं तर्पणं मतम् ।
तावानेव भवेद्धोम स्ततो देवी प्रसीदति ।। २४१

प्रणवमनुः

प्रणवस्य पुरश्चर्यामितो वक्ष्येऽवधारय ।
स्वरेष्वादिं तृतीयं च तथा तत्र त्रयोदशम् ।। २४२

अनुस्वारश्च तैस्सर्वै र्जायते प्रणवो मनुः ।
प्रणवस्य ऋषिर्ब्रह्मा देवी गायत्र मुच्यते ।। २४३

देवता परमात्मास्य चांगानां प्रणवो मनुः ।
हृन्मध्येष्टदळे पद्मे कर्णिकायां परं महः ।। २४४

अजेय मर्कवह्नींदु सहस्त्रै रपि चिंतयेत् ।
लक्षत्रयं जपेत्त्रिंशत् सहस्रं तर्पणं मतम् ।। २४५

तावद्भिरेव होमोऽस्य ततस्सर्वार्थदो मनुः ।

हंसमनुः

अथ हंसमनुं वक्ष्ये भुक्तिमुक्ति प्रदायकम् ।। २४६

यवर्गे चाष्टमोवर्ण स्तद्वर्गे सप्तमः पुनः ।
प्रणवश्च भवेन्मन्त्रो हंसैकाक्षर संज्ञकः ।। २४७

हंसैकाक्षरमंत्रस्य ब्रह्मा ऋषिरुदाहृतः ।
छंदश्च देवी गायत्री देवतास्य हयाननः ।। २४८

यवर्गे चाष्टमं बीजं तद्वर्गे सप्तमं पुनः ।
प्रणवश्च भवेच्छक्ति प्रतीका हंसमंत्रतः ।। २४९

स्वरदीर्घै ष्षडप्यस्य वक्ष्ये ध्यान मित श्शृणु ।
हयग्रीवमहं वंदे स्फटिकाचल सन्निभम् ।। २५०

चंद्रमंडल मध्यस्थं सरस्वत्या समन्वितम् ।
व्याख्यां च पुस्तकं शंखचक्रे च दधतं करैः ।। २५१

मेघगंभीरया वाचा व्याख्यांतं निखिलागमान् ।
ब्रह्मशङ्करवागीशभारतीव्यास सेवितम् ।। २५२

प्लावयंतं जगत्सर्वं स्वदेहोत्थामृतांशुभिः ।
एवं ध्वात्वा जपेन्मंत्रं लक्षत्रय मतंद्रितः ।। २५३

त्रिंशत्सहस्रं जुहुयात् तावदेवांबुतर्पणम् ।
जपतर्पणहोमांते स्वयं सिध्यति मंत्रराट् ।। २५४

सिद्धे हंसमनौ वाणी वाचि नृत्यति सर्वदा ।
अनेन मंत्रराजेन नासाध्यं विद्यते भुवि ।। २५५

सप्तार्णः

प्रणवं च नतिं चापि चतुर्थीं भगवत्पदे ।
उद्धृत्य सप्तलक्षेण जपहोमाग्नितर्पणैः ।। २५६

मंत्रसिद्धिर्भवे द्ब्रह्मन्! प्रतिष्ठा न्याससिद्धिदा ।

अष्टाक्षरः

अष्टाक्षराख्य मंत्रस्य श्रृणूद्धारं चतुर्मुख! ।। २५७

तारं नतिं समुद्धृत्य नारायण पदस्य तु ।
चतुर्थी मुद्धरे देषमंत्र अष्टाक्षरस्स्मृतः ।। २५८

स्वरेषु प्रथमो बीजं शक्तिः स्या त्तदनंतरम् ।
अंगन्यासः करन्यासो वर्णैरेव विधीयते ।। २५९

अष्टाक्षरस्य मंत्रस्य ऋषिर्नारायणो मतः ।
छंदश्च देवीगायत्री देवो नारायणः स्मृतः ।। २६०

न्यासविधिः

अस्त्रमंत्रेण करयो स्तलं पृष्ठं च शोधयेत् ।
प्रणवादीन् अष्टवर्णान् करांगुळिषु विन्यसेत् ।। २६१

अंगुळीनां तु सर्वासां तारमाद्यंत पर्वणोः ।
मंत्राक्षराणां विन्यासो मध्यमे पर्वणि स्मृतः ।। २६२

अक्षराणि सबिंदूनि प्रागग्र प्रणवानि च ।
एकैकमक्षरं प्रोक्तं एकैकांगुळिषु पृथक् ।। २६३

याम्यतर्जनिमारभ्य तत्कनिष्ठावधि क्रमात् ।
वामतर्जनिमारभ्य तत्कनिष्ठांत मप्यथ ।। २६४

न्यस्त मंत्राक्षरे विद्धि स्थितिन्यासं चतुर्मुख! ।
याम्यतर्जनिमारभ्य तत्कनिष्ठांगुळावधि ।। २६५

याम्येतर कनिष्ठादि तत्तर्जन्यं तमाचरेत् ।
सृष्टिन्यासो भवेदेष स्संहृतिन्यास उच्यते ।। २६६

आरभ्य वामतर्जन्यां याम्यतर्जन्यवध्यपि ।
विन्यस्ते संहृतिन्यासो दक्षिणांगुलिपर्वसु ।। २६७

तदंगुष्ठेन विन्यासः दक्षिणेतरपर्वसु ।
वामांगुष्ठेन विन्यासः कर्तव्य स्सर्वकर्मसु ।। २६८

पूर्वस्याश्रमिण स्सृष्टिं वानप्रस्थ गृहस्थयोः ।
स्थितिन्यासो यतीनां तु संहृतिन्यास उच्यते ।। २६९

वासुदेवादिबिंबेषु न करन्यसनं मतम् ।

व्यापकन्यासः

ततस्तु दक्षिणे हस्ते पद्मं चक्रं स्मरेत् ततः ।। २७०

शंखं गदा तथा वामे तेज स्तु करयो स्तयोः ।
ताभ्यामुभाभ्यां तेजोभ्यां देहं व्याप्तं विभावयेत् ।। २७१

अङ्गन्यासः

कुर्वीत व्यापकन्यास मंगन्यास मतश्शृणु ।
दक्षिणांगुळिभिः कुर्यात् अंगन्यासं यथाक्रमम् ।। २७२

प्रथमं प्रणवं मूर्ध्नि न्यसेन्मध्यमया ततः ।
तर्जनीमध्यमाभ्यां तु नेत्रयो स्तदनंतरम् ।। २७३

अंगुष्ठानामिकाभ्यां च मुखे मंत्राक्षरं न्यसेत् ।
सांगुष्ठयैव तर्जन्या हृदये न्यसनं मनोः ।। २७४

न्यासः कनिष्ठांगुष्ठाभ्यां नाभिमध्ये ततः परम् ।
व्यंगुष्ठाभि रंगुळीभिः गुह्यदेशे न्यसेत् ततः।। २७५

समस्ताभि रंगुळीभिः जानुनो र्न्यासमाचरेत्।
अङ्गुळीभि स्ताभिरेव पादयोर्न्यसनं ततः ।। २७६

प्रणवाद्यष्टवर्णानां न्यास स्सृष्टावयंक्रमः ।
नाभिदेशं समारभ्य हृदयांतं कृते सति ।। २७७

स्थितिन्यासः पादमुखं चरणांतं तु संहृतिः ।
मूलमंत्राक्षरं देहे विन्यस्यैवं विधानतः ।। २७८

हृदयाद्यंगमंत्राणां न्यासं कुर्यादनंतरम् ।
हृदयाद्यंतमंत्राणि क्रुद्धोल्कादीनि पद्मज! ।। २७९

अंगुष्ठादि कनिष्ठांत मुभयो र्हस्तयो र्न्यसेत् ।
नेत्रमंत्रं नखाग्रेषु विन्यस्य तदनंतरम् ।। २८०

हृदयादिषडंगेषु मंत्रन्यासं समाचरेत् ।
क्रुद्धोल्का हृदयाह्वाना महोल्का शीर्षसंज्ञिता ।। २८१

वीरोल्का तु शिखामंत्रः द्युल्का कवचसंज्ञिता ।
तेजोल्का नेत्रमंत्रस्स्यात् सहस्रोल्काऽस्त्र संज्ञितः ।। २८२

नति र्हृदयमंत्रे च स्वाहाकारं शिरो मनौ ।
वषट्कारं शिखामंत्रे हुंकार मपि वर्मणि ।। २८३

वौषट्कारं नेत्रमंत्रे विद्ध्यस्त्रेऽन्ते नियोजयेत् ।
सर्वत्र प्रणवः पूर्वे तत्तन्नाम चतुर्थियुक् ।। २८४

नत्याद्यंते नियुक्तं चेत् अंगमंत्र श्चतुर्मुख! ।
केवलं हृदयादीनि उल्काभी रहितानि चेत् ।। २८५

जपध्यानेषु योज्यानि सोल्कानि हरिपूजने ।
मंत्राक्षराणां दाहादि प्रणवेनैव पूर्ववत् ।। २८६

कृत्वाक्षराणि चाभ्यर्च्य ध्यायेन्मां वक्ष्यमाणतः ।
नीलांबुदचय प्रख्यं चतुर्बाहुं किरीटिनम् ।। २८७

श्रीवत्स कौस्तुभाकल्पं वनमालाविराजितम् ।
चक्रशंखगदापद्मं कुंडलाळक मंडितम् ।। २८८

श्रिया भूम्या लसत्पार्श्वं शेषभोगे सुखासनम् ।
चिंतयंतं सदा शर्म जगतां हृदि चिंतयेत् ।। २८९

अष्टलक्षं जपेन्मंत्रं तर्पये त्तद्दशांशतः ।
तत्तुल्यं जुहुयादग्नौ तत स्सिद्ध्यति मंत्रराट् ।। २९०

शांतिपुष्ट्यभिचाराणि प्रतिष्ठोत्सवकर्म च ।
कुर्यादनेन मंत्रेण नासाध्यं तस्य विद्यते ।। २९१

द्वादशाक्षरी

वासुदेव ब्रह्मविद्यां श्रुणुष्व द्वादशाक्षरीम् ।
सप्तवर्णान् समुद्धृत्य पूर्वोक्तान् कमलासन! ।। २९२

वासुदेव चतुर्थ्यंतं मन्त्रोऽयं द्वादशाक्षरः ।
द्वादशाक्षरमंत्रस्य वासुदेवो ऋषिस्स्वयम् ।। २९३

छन्दश्च देवीगायत्त्री वासुदेवश्च देवता ।
बीजशक्ती मूलमंत्र प्रोक्ते कमलसंभव! ।। २९४

अंगानि प्रणवेनैव न्यस्ये द्ध्यानमित श्शृणु ।
हृत्पद्मकर्णिकामध्ये चतुर्बाहुमलंकृतम् ।। २९५

शुद्धस्फटिक संकाशं अग्नींदुरवितेजसम् ।
किरीटहारकटक कांचीनूपुर कुंडलम् ।। २९६

शंखचक्रगदा पद्म लसत् हस्त चतुष्टयम् ।
मृदूर्ध्वपुंड्रतिलकं मेघे सौदामिनी यथा ।। २९७

श्रीभूमिभ्यां सुखासीनं शेषभोगे विचिंतयेत् ।
जपो द्वादशलक्षस्स्यात् तद्दशांशेन तर्पयेत् ।। २९८

तत्समं जुहुयादग्नौ मंत्रसिद्धि स्ततो भवेत् ।
शांत्यादि सर्वकर्माणि साधयेत् साधकोमतः ।। २९९

विष्णुगायत्री

श्रुणुष्व विष्णुगायत्रीं मंत्ररत्नं चतुर्मुख! ।
नारायण चतुर्थीं च विद्महेति पदं ततः ।। ३००

वासुदेव चतुर्थीं च धीमहीति ततः परम् ।
तन्नोविष्णुः पदं पश्चात् उद्धरेत प्रचोदयात् ।। ३०१

इत्युद्धारे कृते मंत्रो विष्णुगात्रि संज्ञितः ।
ऋषिर्ब्रह्मा मनोरस्य छंदो गायत्र मुच्यते ।। ३०२

देवता विष्णुरेतस्य वकारो बीजमुच्यते ।
शक्तिर्यारिक्षरो यस्य अंगानि प्रणवो मनुः ।। ३०३

शंखचक्रगदापाणिं गरुडारूढमच्युतम् ।
सौम्यं चतुर्भुजं देवं स्फटिकाद्रि समप्रभम् ।। ३०४

ध्यात्वा जपे च्चतुर्विंशत् लक्षत स्तद्दशांशतः ।
तर्पणं तत्समो होमः ततस्सिद्धो महामनुः ।। ३०५

सर्वमंत्रफलं दद्यात् साधकस्य न संशयः ।
नास्ति नास्ति समो मन्त्रो विष्णुगायत्रि सम्मितः ।। ३०६

सुदर्शनषडक्षरम्

तत स्सौदर्शनं मंत्रं गुह्याद्गुह्यतरं शृणु ।
यवर्गसप्तमादिं च तद्वर्गेप्यष्टमादिमम् ।। ३०७

तद्वर्ग सप्तद्वितयं तद्वर्गाद्वितयं ततः ।
तद्वर्ग द्वितयादिं च तद्वर्गाष्टम पंचमम् ।। ३०८

बिंदुं फडंत मुद्धृत्य सुदर्शनषडक्षरः ।
छंदश्च देवी गायत्री देवता च सुदर्शनम् ।। ३०९

रेफो बीजं ततस्स्वाहा शक्तिः कमलसंभव! ।
वक्ष्ये षडंगमंत्राणि हृदयादीनि वै क्रमात् ।। ३१०

आचक्राय विचक्राय सुचक्राय ततः परम् ।
ज्वालाचक्राय त्रैलोक्यचक्राय तदनंतरम् ।। ३११

असुरांतकचक्राय प्रणवादि चतुर्मुख!।
हृदयादि नमोंतादि षडंगं न्यासमाचरेत् ।। ३१२

ध्यायेत् सुदर्शनं देवं सहस्रदळपंकजे ।
कर्णिकायां चक्रधरं द्विभुजं वृत्तलोचनम् ।। ३१३

दंष्ट्राकराळवदनं भृकुटीकुटिलेक्षणम् ।
महोदरं महाकायं जपाकुसमसन्निभम् ।। ३१४

करंडमकुटोपेतं रक्तांबर विभूषितम् ।
धारयंतं शिखारत्नं चक्रं मेघसमप्रभम् ।। ३१५

नाभिनेमिसमायुक्तं ज्वालामण्डलदुस्सहम् ।
ज्वलत्षडरसंयुक्तं ध्यायेत् प्रक्षीण कल्मषः ।। ३१६

एवं ध्यात्वा जपेन्मन्त्रं लक्षषट्कं यथाविधि ।
तर्पये त्तद्दशांशेन तत्समं जुहुयादपि ।। ३१७

ततस्सिद्धो भवेन्मंत्रः सर्वं तेनैव साधयेत् ।
साधकः पावयेल्लोकान् मन्त्रेणानेन पद्मज! ।। ३१८

भूतप्रेत पिशाचानां संकटं विनिवारयेत् ।

नृसिंह मनुः

नृसिंहमंत्रं वक्ष्यामि तद्गुह्यमवधारय ।। ३१९

नास्त्यस्य सदृशो मंत्रः सर्वकार्यार्थ साधने ।
उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखम् ।। ३२०

नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ।
विराड्ऋषिरनुष्टुप्च देवता नरकेसरी ।। ३२१

मंत्रादिवर्णो बीजं स्यात् शक्तिरंत्याक्षर स्स्मृतः ।
चतुर्भिश्च चतुर्भिश्च अष्टभिश्च त्रिभिः परम् ।। ३२२

पंचभिश्चाष्टभि र्वर्णैः अंगन्यासं समाचरेत् ।
स्फटिकाचलसंकाशं ध्यायेत् मंत्रोक्त वर्त्मना ।। ३२३

मंत्रस्य लक्षजापस्स्या दयुतं होमतर्पणे ।
मुक्तिदो मंत्रराजोऽयं मुक्तिदश्चापि मंत्रिणे ।। ३२४

वश्यादि सर्वकर्माणि कुरुते साधकस्स्वयं ।

गरुडमंत्रः

मंत्रं तु वैनतेयस्य शृणुष्व कमलासन! ।। ३२५

यवर्गांत्यतृतीयं च पवर्गप्रथमादिमम् ।
तारं स्वाहांत मुद्धृत्य साधयेत् साधको मनुम् ।। ३२६

ऋषिस्तु काश्यप श्छंदः पंक्ति र्देवस्तु पक्षिराट् ।
मन्त्रादिवर्णो बीजं स्यात् शक्ति स्स्वाहाकृति र्भवेत् ।। ३२७

क्षामित्यादि षडंगानि कथितान्यब्जसंभव! ।
आजानुतस्सुवर्णाभमानाभि तुहिनप्रभम् ।। ३२८

कुंकुमारुणमाकंठमाकेशांतं सितप्रभम् ।
अनंतादि महानागैः अष्टभि र्भूषितं खगम् ।। ३२९

ध्यायेत् चतुर्षु संध्यासु वाहनेषूत्तमं हरेः ।
पंचलक्षं जपेन्मंत्रं दशांशे होमतर्पणे ।। ३३०

मंत्रराजस्तत स्सिद्धो विषं नाशयते क्षणात् ।
सर्वविद्याप्रदो मन्त्रः साधकस्य न संशयः ।। ३३१

श्री मंत्रः

लक्ष्मीमंत्रमितो वक्ष्ये शृणुष्वांबुजसंभव! ।
यवर्गे पंचमं पूर्वं तद्वर्गेयद्वितीयकम् ।। ३३२

स्वरे चतुर्थं बिंदुं चोद्धृत्य बीजं श्रियो भवेत् ।
शृणु पंचाक्षरं लक्ष्म्याः साधकस्य विभूतिदम् ।। ३३३

यवर्गपंचमं पूर्वं तद्वर्गेय द्वितीयकम् ।
स्वरे चतुर्थं बिंदुं च यवर्गे पंचमं पुनः ।। ३३४

द्वितीयं च यवर्गस्य तृतीयं च ततस्स्वरे ।
द्वादशाख्यं यवर्गादौ नतिमप्युद्धरेत्ततः ।। ३३५

मंकणोस्य ऋषिः ब्रह्मन्! पंक्तिश्छंद उदाहृतम् ।
देवतास्य स्वयं लक्ष्मीः बीजमंत्रः पुरोदितः ।। ३३६

श्रामित्यादि षडंगानि मंत्रस्यास्यांबुजासन ! ।
दिव्यामृतोदधौ रत्नद्वीपे कल्पद्रुमाश्रितम् ।। ३३७

पद्मोदरसमासीनां स्वर्णाभां पद्मगंधिनीम् ।
उभयोर्हस्तयोः पद्मं इतराभ्यां वराभयम् ।। ३३८

दधतीं अनवद्यांगीं सर्वभूषापरिष्कृताम् ।
ध्यात्वा जपेत् पंचलक्षं दशांशे होम तर्पणे ।। ३३९

ततो लक्ष्मीप्रसादेन साधको भूतिमाप्नुयात् ।

भूमिमंत्रः

भूमिमंत्र मितो वक्ष्ये शृण्वेतत् कमलासन ! ।। ३४०

पवर्गतुल्य षष्ठं च बिंदुंचोद्धृत्य लक्षयेत् ।
भूम्याश्चतुर्थी च नतिं भूमिपंचाक्षरो महान् ।। ३४१

ऋषिः कण्वोऽस्य मंत्रस्य छंदः पंक्तिश्च देवता।
महीबीजमितो वक्ष्ये यवर्गाष्टममुद्धरेत् ।। ३४२

तद्वितीयेऽपि तुर्यं च बिंदु मप्युद्धरे त्ततः ।
बीजमंत्रो भवेन्मह्याः तेनांगन्यासमाचरेत् ।। ३४३

रक्तवर्णा भवेत्पृथ्वी सर्वमन्यत् श्रियो यथा ।
शास्त्ययं पृथिवीं सर्वां य स्साधयति तन्मनुम् ।। ३४४

आदित्यमंत्रः

आदित्यमंत्रं वक्ष्यामि तद्गुह्यमतिदुर्लभम् ।
कवर्गतुर्य मुद्धृत्य सप्तमं च स्वरे ततः ।। ३४५

टवर्गपंचमं पश्चात् स्वरत्रितयमेव च ।
विसर्गं च यवर्गस्य सप्तमे षष्ठमंततः ।। ३४६

द्वीतीये तु यवर्गस्य तृतीयं तत्र वै पुनः ।
स्वरे द्वितीय मुद्धृत्य तवर्गेऽथ तृतीयके ।। ३४७

तृतीयं च तवर्गादिं यवर्गादिमतःपरम् ।
विसर्गे चोद्धृते ब्रह्मन् ! आदित्याष्टाक्षरो मनुः ।। ३४८

ब्रह्ममंत्रः

प्रणवं पूर्वमुद्धृत्य तवर्गाद्यादिमुद्धरेत् ।
तवर्गादि यवर्गस्य सप्तमे प्रथमं विधे ! ।। ३४९

समुद्धर तवर्गादिं ब्रह्ममंत्रोऽय मुच्यते ।

शिवमंत्रः

प्रणवं च नतिंचाथ चतुर्थीं च शिवस्य च ।। ३५०

उद्धृते शिवमन्त्रोऽयं सर्वज्ञानाकरो महान् ।

मूर्तिमंत्रः

मत्स्यादि दशमूर्तीनां अन्यासां योषितामपि ।। ३५१

चंडादि परिवाराणां सर्वेषां कमलासन ! ।
मंत्रोद्धारविधिं वक्ष्ये शृणुष्व कमलासन ! ।। ३५२

प्रणवं पूर्व मुद्धृत्य चतुर्थ्या नामचोद्धरेत् ।
अन्ते नति मयंमंत्रः मूर्त्यादीनां फलप्रदः ।। ३५३

तत्त्वमंत्रः

पृथिवीमुखतत्त्वानां संहारोत्पादने तथा ।
मंत्राक्षरः पुरा प्रोक्त स्सबिंदु र्यदि सोऽक्षरः ।। ३५४

तत्त्व मंत्रा श्चतुर्वक्त्र! फलदा मंत्रयोगिनाम् ।

आयुधपूजामंत्रः

पूजोपकरणानां च आयुधानां चतुर्मुख!।। ३५५

धूपादि सर्वमुद्रणां उद्धारोमूर्तिमंत्रवत् ।

जपसंख्या

द्वात्रिंशदक्षराद्धीनं कुर्यात् अक्षरलक्षकम् ।। ३५६

दशांशं जुहुया दग्नौ तत्समंचांबुतर्पणम् ।
सर्वेषामपि मंत्राणां पूर्णाहुतिदिने द्विजान् ।। ३५७

श्रीविष्णुभक्ति भरितान् भोजयेत् द्वादशावरान् ।

कृतादिषु जपः

कृते यथोक्तं कुर्वीत त्रेतायां द्विगुणं भवेत् ।। ३५८

द्वापरे त्रिगुणं सर्वं कलौ कुर्यात् चतुर्गुणम् ।
द्वात्रिंशदक्षरे चोर्ध्वं लक्षसंख्य मुदीरितम् ।। ३५९

एवं मंत्रं गुरुमुखात् अभ्यस्य तदनुज्ञया ।

जपस्थानम्

देवालये नदीतीरे शैले सागररोधसि ।। ३६०

मुनीना माश्रमे पुण्ये वने पुष्करिणीजले ।
न्यग्रोधाश्वत्थयोर्मूले गवांगोष्ठेऽथ वा जपेत् ।। ३६१

कुटीरेऽपि सहायस्सन् पलाशकुशपुष्कले ।
तुलसीपुष्पकंदानि यत्र शुद्धोदकं बहु ।। ३६२

जपकालः

उषःकाले समुत्थाय पूर्वां संध्यां समाप्य च ।
उपस्थाय ततः कुर्यात् जपं माध्याह्निकावधि ।। ३६३

स्नात्वा माध्याह्निकं कृत्वा इज्ययाभ्यर्च्य मां पुनः ।
आसायं च जपेन्मंत्रं सायं स्नानं ततश्चरेत् ।। ३६४

उपास्य पश्चिमां संध्यां अभ्यर्च्य पुरुषं पुनः।
आप्रभातं जपं कुर्यात् तुर्य स्नायी यदि स्वयम् ।। ३६५

स्नात्वोपास्य ततः कुर्यात् आप्रभातं पुनर्जपम् ।
नैवेद्यांतं समभ्यर्च्य जपं कुर्यात् ततःपरम् ।। ३६६

नित्यं त्रिषवणस्नानं तुर्यस्नानात् फलाधिकम् ।

मंत्रप्रयोजनम्

मंत्रेण स्थाप्यते देवो मंत्रेणैव विसृज्यते ।। ३६७

मंत्राधीन स्ततो देवः तस्मात् मंत्रपरो भवेत् ।
पवित्रपाणिराचांतो ब्रुस्यां वा दर्भसंस्तरे ।। ३६८

दिग्व्रतम्

कृष्णचर्मणि वाऽसीनः प्राङ्मुखोवाप्युदङ्मुखः ।
पश्चान्मुखो वा कुर्वीत नैव याम्यमुखः क्वचित् ।। ३६९

शिखी वा जटिलो मुंडी कर्पटाजिनसंवृतः ।
चीरवस्त्रधरो यद्वा शंखचक्रादिलांछितः ।। ३७०

ऊर्ध्वपुंड्रतनु श्शुद्ध अक्षमालां दधद्गळे ।
एकांतां भुवमाश्रित्य मौनी जप मथाचरेत् ।। ३७१

प्रतिलोमादिभिर्नीचै र्नभाषेत जपन्नरः ।

व्यर्थजप लक्षणम्

व्याहरेदपि कार्यार्थं विप्रै र्नान्यैः कदाचन ।। ३७२

अविधाय शिखाबंध मकृत्वा निष्कृतिं पुरा ।
पवित्रं यज्ञसूत्रं वा न दधानः करे गळे ।। ३७३

अकच्छोवाऽथ वा नग्न अवकुंठितमस्तकः ।
गच्छन् शयानः प्रलपन् जपान्नफल मश्नुते ।। ३७४

भोजनादिः

अभुंजानो वायुभक्षः किंचिन्नीराशनोऽथ वा ।
पर्णाशनः फलाशो वा शाकमूलाशनोऽथ वा ।। ३७५

नोचेद्यवोष्णिकाहारः दुग्धाहारो घृताशनः ।
भिक्षयित्वाऽथ भुंजीत साधको लवणं विना ।। ३७६

वानप्रस्थो गृहस्थो वा स्वयं वा भार्ययाऽथ वा ।
पक्वमन्नं च हरये निवेद्य बलिमाचरेत् ।। ३७७

भोजयित्वाऽतिथीन् वृद्धान् भार्यापुत्र शिशूनपि ।
भुंजीत शेषमन्नादि पश्चात् स्वय मकुत्सयन् ।। ३७८

अभ्यंगं वर्जयेद्यावत् पूर्णाहुति चतुर्मुख! ।
प्रत्यहं तर्पयेदग्नौ जुहुयात् समिधादिभिः ।। ३७९

स्वाहेति जुहुयादग्नौ तर्पयामीति तर्पयेत् ।
नम इत्यर्चयेत् सम्यक् यथा कामं जपं चरेत् ।। ३८०

मंत्रलिंगानि

पुमादिलिंगं वक्ष्यामि शृणुष्व कमलासन!।
नमोंतमंत्रा नञ्लिंगा स्स्वाहांतास्तु स्त्रियोमताः ।। ३८१

इतरान्विद्धि पुंलिंगान् तत्फलं वक्ष्यतेऽधुना।
उच्चाटने वशीकारे विद्वेषे क्षुद्रकर्मसु ।। ३८२

स्त्रियः प्रशस्ता अन्यत्र पुल्लिंगा एव पूजिताः ।
सर्वत्र खलु युज्यंते पुरुषार्धचतुष्टये ।। ३८३

न्यासे नमोन्ता स्स्वाहांता जपपूजाऽहुतिष्वपि ।
पुल्लिंगेष्वपि दिङ्मात्रे फलान्यपि च वक्ष्यते ।। ३८४

पर्यंतामारणाद्यर्थे शस्ता भूताद्युपद्रवे ।
हुंकारांताः प्रशस्यंते वौषडंतास्तु ते पुनः ।। ३८५

आप्यायने नियुज्यंते धर्मकामार्थभुक्तिषु ।
चतुर्थ्यंताः प्रशस्यंते ओमंता स्सर्वसिद्धिदाः ।। ३८६

एकस्मिन् साधिते सर्वफलम्

एकस्मिन् साधिते मंत्रे जपैर्होमैश्च तर्पणैः ।
साधकस्य स सर्वार्थं प्रसूते नात्र संशयः ।। ३८७

प्रत्यहं जुहुयादग्नौ तर्पयेच्च जपेदपि ।

जपविधिः

जपस्स्यादक्षमालायां करपर्वणि वा भवेत् ।। ३८८

चंदनागरुकर्पूर केसरीक्षोदवारिभिः ।
तर्पये दंजलिजलैः न्यासध्यानपुरस्सरम् ।। ३८९

अग्निकार्यविधिः

अग्निकार्यमितो वक्ष्ये पुरश्चर्याविधानतः ।
षोडशस्तंभसंयुक्तां अग्निकुंडसमन्विताम् ।। ३९०

धूमनिर्गमनोपेतां यागशालां प्रकल्पयेत् ।
वृत्तं वा चतुरश्रं वा मेखलात्रय संयुतम् ।। ३९१

कुंडलक्षणम्

योनियुक्तं प्रपामध्ये कुंडमेकं प्रकल्पयेत् ।
हस्तमात्र समुत्सेथं हस्त मात्रावटं तथा ।। ३९२

हस्तमात्र समायाम विस्तारं तद्यथा भवेत् ।
आरण्य मर्ककांतोत्थं यद्वाग्निं लौकिकं स्वयम् ।। ३९३

आहृत्य विधिवत्कुंडे निक्षिप्याभ्यर्च्य वै पुनः ।
आवाह्य तत्र देवेशं होमांतं सन्निधिं पुनः ।। ३९४

प्रार्थयेत तमभ्यर्च्य होमं कुर्यात् दिनेदिने ।
आहोमकालपर्यंतं रक्षेदग्नि मतंद्रितः ।। ३९५

न हरेत् परिधीन् दर्भान् उपस्तीर्णानुपक्रमे ।
मंत्रदेवर्क्षवारेषु तिथिमासेषु साधकः ।। ३९६

जपकाल विशेषः

एकादश्यां पौर्णमास्यां ग्रहणे सोमसूर्ययोः ।
विशेषयजनं कुर्यात् जपहोमाग्नि तर्पणैः।। ३९७

कर्मांतं योषितां संगं तैलाभ्यंगं च वर्जयेत् ।
निग्राहानुग्रहौ तद्वत् वर्जयेन्मंत्रसाधकः ।। ३९८

मोक्षपुरश्चर्या

गोमूत्रयावकाहारः ब्रह्मचर्यव्रते स्थितः ।
पूर्वोक्तं देशमासाद्य जपेल्लक्ष मतंद्रितः ।। ३९९

तर्पणेनापि होमेव देहांते मुक्तिमान् भवेत् ।
उपासते सयन्मंत्रं तस्मिन् देवे प्रलीयते ।। ४००

येन येन तु मंत्रेण प्राणायामपरो नरः ।
देहावसाने तस्यस्यात् तत्र योगोक्तवर्त्मना ।। ४०१

सिद्धिप्रत्ययः

वक्ष्यामि साधकस्याग्रे जातानभ्युदयावहान् ।
व्योम्नि देवगणान्नेमिघोषं दुन्दुभि निःस्वनम् ।। ४०२

सिद्धैस्संभाषणं चापि विमानस्यावलोकनम् ।
भूतप्रेत पिशाचादि दर्शनं भूतले तथा ।। ४०३

होमकाले च सप्तार्चि स्त्रिशिखः परिदृश्यते ।
शुद्धस्फटिकसङ्काशो दक्षिणावर्तसंयुतः ।। ४०४

दिव्यगंधोपलंभश्च छत्रबिंबध्वजादिकम् ।
शंखदुंदुभिवीणादि वेदघोषश्रुतिं पुनः ।। ४०५

पूर्णाहुतिविधौ सिद्धलिंगान्येतानि लक्षयेत् ।
साधक स्तानि लिंगानि कथये न्न गुरुं विना ।। ४०६

अंते वैष्णवविप्रेन्द्रान् भोजयेत् द्वादशावरान् ।

मुक्तिसिध्यादि विशेषाः

लक्षजापेन मुक्तिस्स्यात् सिद्धिरक्षरलक्षतः ।। ४०७

अर्थकोट्या तु देवेन सदाभाषेत साधकः ।
त्रिपादकोट्याः देवाद्याः किंकरा नात्रसंशयः ।। ४०८

कोटिजापेन देवेश स्वयमेव भवेद्ध्रुवम् ।
इतोऽधिकेन जापेन फलवत्ता न विद्यते ।। ४०९

अणिमादिः

उपासते सदा चैवं अणिमाद्यष्टसिद्धयः ।
अणिमा महिमा चैव गरिमा लघिमा तथा ।। ४१०

प्राप्तिः प्राकाम्यमीशत्वं वशित्वंचाष्टभूतयः ।

धनाकर्षणम्

चंदनं कुंकुमं कुष्ठं रोचनालक्तकं तथा।। ४११

घनसारं मृगमदं पिष्ट्वा तत् क्षोदवारिणा ।
धनदं विलिखेत् भूमौ सप्तरात्रं जितेंद्रियः ।। ४१२

ध्यात्वा मंत्रेश्वरं देवं तदंते मंत्रवित्तमः ।
साक्षात् करोति धनदं स तस्मै धनमक्षयम् ।। ४१३

प्रयच्छति धनाध्यक्षैः आनीतं स्वाज्ञयाक्षणात् ।
विविक्तं देश मासाद्य बहिर्ग्रामात् अनन्यधीः ।। ४१४

सप्तरात्रं निशीधेषु जपो होम पुरस्सरम् ।

स्त्री वश्यम्

पद्मरागरुचं ध्यायेत् स्त्रीवश्यमपि संस्मरेत् ।। ४१५

कामयंते ततस्सर्वाः चिंतिताः कमलासन! ।
फलैः पुष्पैश्च लाजैश्च सप्तरात्रं दिने दिने ।। ४१६

सहस्रं जुहुयादग्नौ चिंतितां कन्यकां लभेत् ।
लक्षितापादयोः पांसून् रक्तचंदनमिश्रितान् ।। ४१७

विधाय पुरुषाकारं स्त्रीरूपं वा यथेप्सितम् ।
कृत्वा प्रतिकृतिं तस्य न्यस्यात्मानं स्मरेत् हरिम् ।। ४१८

ताडयेन्मूल मनुना रक्तैस्तु यववारिजैः ।
प्रत्यहं मंत्रजापस्स्यात् अष्टोत्तर सहस्रकम् ।। ४१९

वश्यानारी पुमा न्वापि सप्ताहांते जपात् भवेत् ।
तिलतंडुल दूर्वाणां आहुत्यैव यथाक्रमम् ।। ४२०

ब्राह्मणक्षत्रियविशां वश्यो मंत्रप्रभावतः ।
ध्यात्वा करतले चंद्रं तन्मध्ये विष्ठितं हरिम् ।। ४२१

सुखासीनं पुंडरीक कर्णिकायां सितप्रभम् ।
ध्यायन् करतलस्पर्शात् सर्ववश्यं क्षणा द्भवेत् ।। ४२२

गुळिकाविधिः

गुळिका मद्य वक्ष्यामि सर्वकर्म प्रसाधनम् ।
भूर्जपत्रे लिखे च्चक्रं अष्टारं रोचनादिकैः ।। ४२३

चंदनद्वयकाश्मीर शशिकस्तूरिकान्वितैः ।
हेमसूच्या लिखेदेवं गंधद्रव्यै स्तथाऽपरैः ।। ४२४

नाभिनेमियुतं चक्रं अष्टारं ज्वालयान्वितम् ।
अष्टस्वरेषु विलिखेत् अक्षराण्यष्ट पद्मज! ।। ४२५

प्रादक्षिण्येन विस्पष्टं ह्रींकारं मध्यमे पदे ।
साध्यनामादि तत्रैव सोंकारं तदनंतरम् ।। ४२६

ह्रींकारं नाभिवलये दिक्ष्वष्टासु समर्पयेत् ।
ह्रींकारं नेमिवलये वशीकरण मक्षरम् ।। ४२७

तथैवाशासु सर्वासु वशंकुरु पदान्वितम् ।
तस्मिन्नावाह्य देवेशं इष्ट्वा मंत्रं जपेत्ततः ।। ४२८

अष्टोत्तरसहस्रं तु जुहुयात्तावदाहुतीः ।
गुळिकां बिभृत स्तस्य सर्वं वश्यं न संशयः ।। ४२९

आकर्षणविधिः

आकर्षणविधिं वक्ष्ये तं ब्रह्मन्! अवधारय ।
भूर्जपत्रे लिखे च्चैवं अष्टारं पूर्ववर्त्मना ।। ४३०

गंधद्रव्यैर्लिखे न्मंत्रं हेमसूच्या विचक्षणः ।
वेष्टयेत् रक्तसूत्रेण तत्खंड मभिमंत्रितम् ।। ४३१

शिखिचंचुपुटे न्यस्तं भावयित्वा जपेत्ततः ।
तन्मंत्रं संयुतं मंत्रं कृच्छ्र माकर्षयेति च ।। ४३२

इत्थं सहस्रं सप्ताहं जपेत् प्रतिदिनं सुधीः ।
आत्मानं गरुडारूढं सायुधाष्टभुजं हरिम् ।। ४३३

बंधूक पुष्पसंकाशं भावयित्वा जितेंद्रियः ।
वामोत्संगे हरे र्देवीर निषक्तां कामविह्वलाम् ।। ४३४

पाशांकुशधरां लक्ष्मीं ध्यात्वा च तदनंतरम् ।
नृपं बध्वा गळे पाशैः ताडयित्वा कषादिभिः ।। ४३५

आयुधैः पृष्ठतो मंत्रं आकर्षय पदान्वितम् ।
जप्त्वायुतं सप्तदिनं योजनानां शते स्थितम् ।। ४३६

अपि भूपं नयत्याशु साधको मंत्रतेजसा ।
धनेन महतायुक्त स्स्वयमेवागतो नृपः ।। ४३७

वश्यो भवति कृत्वैवं विप्रादीनपि चानयेत् ।
योषिदाकर्षणेचापि मंत्रं कृत्वैव मंत्रवित् ।। ४३८

पंचबाणेषुभि र्विद्धां सर्वांगेषु स्त्रियं स्मरेत् ।
पाशबद्धां तथैवान्यैः आयुधैरपि ताडिताम् ।। ४३९

क्षिप्रमेवाऽनयेन्नारीं सप्ताहाच्छर वेगवत् ।
दूरस्थितामपि तथा राज्ञो वा महिषीं प्रियाम् ।। ४४०

सा समायाति कामार्ता मदविह्वललासा ।
समृद्धार्थात्मना वापि धनै र्वापि यथेप्सितैः ।। ४४१

साधकं तोषयत्येषा मंत्रजापाद्यधोदितात् ।
मृतनारी कपाले च रोचनाद्येन वस्तुना ।। ४४२

पूर्ववच्छक्रमालिख्य तन्मध्येभीष्टयोषितः ।
लिखित्वा नामधेयं तत् कपालं ज्वलने पुनः ।। ४४३

तापयित्वा जपेन्मंत्रं सप्ताहं पूर्व संख्यया।
ततस्सिध्यति नारी सा दूरस्थापि यथेप्सिता ।। ४४

यक्षसाधनम्

यक्षाणामपि यक्षीणां साधनं शृणु वक्ष्यते ।
वटवृक्षे कुटीं कृत्वा तत्र चक्राब्जमंडले ।। ४४५

आराध्य देवं जुहुयात् बिल्ववृक्ष समिच्छतैः ।
दशभिः प्रत्यहंमंत्री सप्तमाहेपरीप्सिते ।। ४४६

पूर्वमेव वटे यक्षीं यक्षं वा कुंकुमादिभिः ।
लिखित्वा कर्म तत्सर्वं कुर्यादभिमुख स्स्वयम् ।। ४४७

सप्तमेऽह्नि वटे रात्रौ कंपते भीतवत् स्थितः ।
गुग्गुळुं घृतमिश्रं च धूपयेत् मन्त्रवित्तमः ।। ४४८

वटाभिमुखमुत्थाय यक्षीं वा यक्षमेव वा ।
तावंतं वाऽथ याचेत अभीष्टफल मुत्तमम् ।। ४४९

मातृत्वाच्च पितृत्वाच्च भ्रातृत्वा च्च यथायथा ।
पितृत्वथ भार्यात्वं ईप्सितं सर्वमाप्नुयात् ।। ४५०

साधकस्यैव पित्रादि र्भूत्वा सर्वं समाचरेत् ।
प्रयच्छंति यथायोगं यक्षी यक्षश्च मंत्रिणे ।। ४५१

माताचेत् मातृवद्रक्षेत् पिताचेत् पितृवत्तथा ।
एवं भ्रात्रादयोप्यन्ये यथा तत्त्राणतत्पराः ।। ४५२

विद्याधर वशीकरणम्

विद्याधर वशीकार विधानं शृणु पद्मज! ।
अशोकवृक्षमूलोर्व्यां कुर्यात् पूजादि पूर्ववत् ।। ४५३

विद्याधरेण यच्छक्यं कर्तुमस्यापि तद्भवेत् ।
अन्येषां देवयोनीनां एवं कुर्यात् यथाविधि ।। ४५४

ते ते सर्वं प्रयच्छन्ति मंत्रतुष्टा यथाविधि ।

पाताळसाधनम्

पाताळद्वारनिकटे कारयेद्योगमंदिरम् ।। ४५५

चतुर्द्वारसमायुक्तं मध्ये कुंडोपलक्षितम् ।
समीपे क्षीरवृक्षस्य जपेदक्षरलक्षकम् ।। ४५६

प्रत्येकमयुतं होम स्तिलादीनां पृथक् पृथक् ।
अनन्यधी र्मिताहारः कर्मांते नागकन्यकाः ।। ४५७

आगत्य मंत्रिणं सर्वा यांत्यानीय स्वमालयम् ।
तत्रस्थै र्विविधैर्भोगै स्तोषयंति न संशयः ।। ४५८

खड्गसाधनम्

देहजं लोहितं मंत्री श्मशानांगारमिश्रितम् ।
पेषयित्वा लिखेत् खड्गं चतुस्ताल समायतम् ।। ४५९

श्मशानदेशे तन्मूलं स्पृष्ट्वा मंत्रं जपेत्सुधीः ।
निशीथे निर्जने तावत् या च ज्वालां विमुंचति ।। ४६०

ज्वालाभिरस्य शोभन्ते दिशो दश चतुर्मुख! ।
नानाविधानि भूतानि दृश्यते परितस्तदा ।। ४६१

अभीतो निश्चलः खड्गं स्पृष्ट्वा मन्त्रं जपेत् पुनः ।
स्फुरंतं पाणिना खड्गं गृहीत्वा मुष्टिनादृढम् ।। ४६२

मंत्रं जपन्नभो याया द्यत्र विद्याधरादयः ।
विद्यामहिम्ना तेषां स राजा भवति मंत्रवित् ।। ४६३

यक्षराक्षस भूतानां जेता मर्त्येषु किं पुनः ।
खड्गहस्त स्सदा मंत्रं जपन् याति त्रिविष्टपम् ।। ४६४

तत्रापि भोगमतुलं लभते चाप्सरोगणैः ।

शुक्तिविद्या

शंखशक्त्युदरे मंत्रं लिखेत् गोरोचनादिभिः ।। ४६५

शून्यागारे श्मशाने वा निशीथे जपमाचरेत् ।
जपेन्मंत्रवरं स्पृष्ट्वा यावज्ज्वालां विमुंचति ।। ४६६

उत्थाय कन्यका काचित् शुक्तिमध्या च्चतुर्मुख! ।
अक्षमालां च गुळिकां पादुकां तिकलं तथा ।। ४६७

अंजनं चौषधिरसं कपालं मंत्रगौरवात् ।
ददाति तिलकं धृत्वा नरनारीमृगादयः ।। ४६८

स्मृतिमात्रा द्वशं यांति दत्तया चाक्षमालया ।
जप्ता मंत्राश्च सिध्यंति पुरश्चरणवर्जिताः ।। ४६९

गुळिकां वदने बिभ्रन्मंत्री सर्वत्र संचरेत् ।
अंजनं नेत्रयो र्लिपन् अदृश्यो भवति ध्रुवम् ।। ४७०

आरुह्य पादुकां पद्भ्यां अग्नौ चरति वारिषु ।
एषा दूरं गमयते शीघ्रं विषयमब्जज! ।। ४७१

भुक्त्वौषधं गतव्याधिः विचिकित्सो न संशयः ।
रसायनेन संलिप्ते पाषाणादौ भवेत् ध्रुवम् ।। ४७२

हिरण्यं भुक्तिमात्रेण तेजस्वी बलवान् भवेत् ।
कपालेऽश्म विनिक्षिप्य निक्षिपेच्छत्रुमूर्धनि ।। ४७३

अकस्मान्मरणं याति सान्ववाय सुहज्जनः ।

इंद्रजालविद्या

धरण्यां विलिखेन्मायां कृष्णवर्णां चतुर्भुजाम् ।। ४७४

सर्वाकल्पयुतां सौम्यां सर्वावयवसुंदरीम् ।
अयुतं नियुतं वापि मंत्र मष्टाक्षरादिकम् ।। ४७५

पूजयित्वा जपेन्मंत्रं सिद्धा सा तदनंतरम् ।
धरण्यामंबरे वाऽपि चतुरंगबलं महत् ।। ४७६

दर्शयत्याशु जगतां त्रैलोक्यमपि वा जगत् ।
यथेष्टं मंत्रिणे मंत्रगौरवात् कमलासन! ।। ४७७

अपमृत्युजयः

अश्वत्थं मंदवारेषु स्पृष्ट्वा दक्षिणपाणिना ।
जपतो नापमृत्युस्स्यात् यथोक्तेनैव संख्यया।। ४७८

आरोग्यं

प्रत्यहं प्रातुरुत्थाय संध्याकर्म समाप्य च ।
आदित्यं तु जपे न्मंत्रं तस्मादारोग्यमाप्नुयात् ।। ४७९

वाक्सिद्धिः

इतो वाक्सिद्धि माख्यास्ये यथावदवधारय ।
खंडयित्वा वचां सम्यक् मधुपात्रे विनिक्षिपेत् ।। ४८०

यद्वा घृते क्षिपेत् ब्राह्मीं स्पृष्ट्वा लक्षं जपे न्मनुम् ।
चंद्रमंडल मध्यस्थं श्वेतवर्णं हरिं स्मरेत् ।। ४८१

मुहूर्ते शोभने प्राप्ते वचा भक्षण माचरेत् ।
मूकादयः प्रवाचस्युः नात्र कार्या विचारणा ।। ४८२

अञ्जसिद्धिः

चंद्रमंडलमध्यस्थं श्वेतपंकजविष्टरे ।
द्विभुजं बालवपुषं बालाभरणभूषितम्।। ४८३

बिभ्राणं पायसं पात्रे दक्षिणेनैव पाणिना ।
इतरेणैव हस्तेन दध्यन्नकबळं तथा ।। ४८४

ध्यात्वाऽन्नेन भवेत् होमो मंत्री बह्वन्नमश्नुते ।

पुत्रलाभः

हिरण्यनिर्मितं बिंबं पूजयित्वा जगत्पतेः ।। ४८५

चक्राब्जमंडले कुंभं समाराध्य यथाविधि ।
हुत्वाग्नौ पायसेनैव होमान्ते स्थापितै र्घटैः ।। ४८६

अभिषिच्य स्त्रियं सम्यक् पाययित्वा तदंबु च ।
ततः पुत्रान् समीक्षेत तस्यास्तु मनसेप्सितान् ।। ४८७

विषहरणम्

विषदष्टमवस्थाप्य ध्यात्वेशं गरुडोपरि ।
देवविद्यां समुच्चार्य तीक्षातुंडेन ताडयेत् ।। ४८८

एवं ध्यात्वा विषं सर्वं अपोह्योत्थापयेन्मृतम् ।
भुक्तं विषेण संस्पृष्टं अन्नबीजशिलाथ वा ।। ४८९

जरयेत् विद्यया सर्वं यथार्हं कमलासन! ।

वृष्टिलाभः

ग्रामात् बहिस्तु शालायां जपेद्धोमपुरस्सरम् ।। ४९०

चक्राब्जमंडले देवमर्चयेदपि पद्मज! ।
सप्ताहमाज्यसिक्ताभि स्समिदि्भर्होममाचरेत् ।। ४९१

वैतसीभिः प्रतिदिनं नियुतायुत संख्यया ।
वृष्टि र्भवति तद्राष्ट्रे तद्देशे वा दिनत्रये ।। ४९२

अतिवृष्टिशमनम्

इक्षुसारावसिक्ताभिः मरीचिभि रतंद्रितः ।
सर्षपै स्सार्षपयुतै र्होमः पूर्वोक्तवर्त्मना ।। ४९३

अतिवृष्टि प्रशमनं भवेत्तत्र न संशयः ।

मंत्रादिदेवदर्शनम्

दिदृक्षुर्मंत्र देवस्य षण्मासमनिशं जपेत् ।। ४९४

व्रती त्रिषवण स्नायी प्रत्यक्षं देवमीक्षते ।

संग्रामविजयः

लभेत च वरान् सर्वान् तस्मात् कमलसंभव! ।। ४९५

संग्रामविजयन्नाम प्रयोगं शृणु सादरम् ।
तोमरेषु कृपाणेषु शक्त्यां बाणायुधेषु च ।। ४९६

वाजिहस्तिललाटेषु ध्वजवस्त्रांचले तथा ।
चक्रमंडलमालिख्य पूजयित्वा यथाविधि ।। ४९७

हुत्वा च समरं गच्छन् शत्रुसैन्यानि नाशयन् ।
संग्रामे विजयं प्राप्य गृहं याति यथापुरम् ।। ४९८

भूतादि ग्रहनिवारणम्

भूतग्रहपिशाचादि निवारणविधिं शृणु ।
समिदि्भर्जुहुया दग्नौ किंशुकोत्थै श्शतत्रयम् ।। ४९९

त्रिसहस्रं भवेत् जापः तर्पणं तु शतत्रयम् ।
भूतादि ग्रहग्रस्तानां शिखाबंधनमाचरेत् ।। ५००

गुग्गुळूत्थेन धूपेन धूपयेत् तदनंतरम् ।
ताडयेन्मंत्रजप्तेन दंडेन लतयाऽपि वा ।। ५०१

ततो ब्रूयात् पिशाचादि मुंचामीत्यसकृद्ध्रुवम् ।
कारयित्वाध शपथं शिखाबंधं विमोचयेत् ।। ५०२

स्थापितैः कलशैरेव स्नापये द्ग्रहपीडितम् ।

गुळिकाप्रभावम्

बंधयेत् गुळिकां पश्चात् ग्रहदोषाद्विमुच्यते ।। ५०३

गुळिकाधारणा न्नारी दुर्भगा सुभगा भवेत् ।
बध्वा च गर्भिणी सद्य स्सु प्रसूस्स्यादपप्रसूः ।। ५०४

अनृतुस्स्या दृतुमती विमुखा सुमुखा भवेत् ।
विरहे संगता भर्त्रा भवेदचिरकालतः ।। ५०५

स्त्रियस्सूः पुंप्रसूति स्स्यात् अस्तना स्तन मंडिता ।
कुमारयक्षीपीडादौ बालानां च यथोदितैः ।। ५०६

विधिभि र्मुच्यते दुःखात् लभते चायुरुत्तमम् ।

सर्वोपयोगि गुळिकाविधिः

भूर्जपत्रे लिखेच्चक्रं नाभिनेमि समन्वितम् ।। ५०७

षडरं तत्र विलिखेत् सौदर्शन षडक्षरम् ।
पूर्वादिषु समालिख्य मंत्रराजमरांतरे ।। ५०८

नाभिमध्ये साध्यनाम प्रणवेन समन्वितम् ।
वेष्टयेत् प्रणवेनैव साध्यनाम चतुर्मुख! ।। ५०९

हेमसूच्या लिखेद्यंत्रं द्रव्यै श्चंदनमिश्रितैः ।
चंदनद्वयकाश्मीर रोचनागरु संज्ञितैः ।। ५१०

मुख्यद्रव्यै र्लिखेच्चक्रं गुळिकां कारयेत्ततः ।
धान्यराशिषु संस्थाप्य कुंभस्थापन माचरेत् ।। ५११

कारयेत्साध्यकर्मार्थं जपहोमादि पूर्ववत् ।
अभिषिच्य ततः कुम्भैः गुळिकामपि बंधयेत् ।। ५१२

ततो विमोचये दग्निं पूर्वोक्तां सिद्धिमाप्नुयात् ।

कालमृत्युजयः

कालमृत्यु जयोपायो वक्ष्यते शृणु पद्मज! ।। ५१३

पूर्वोक्तवर्त्मना कुंभान् गुळिकामपि पूजयेत् ।
रक्षेन्मासद्वयं वह्निं कुंभांश्च गुळिकामपि ।। ५१४

कुर्यात्तावत् जपं होमं ब्राह्मणान्तोषयेदपि ।
यजमानः क्षत्रियश्चेत् तुलारोहण माचरेत् ।। ५१५

कलशै स्स्नपनं पश्चात् गुळिकाबंधनं ततः ।
पूर्णाहुतिं ततः कृत्वा कुर्यादग्नि विसर्जनम् ।। ५१६

अन्नाद्यै स्तोषयेत् विप्रान् कालमृत्युं निवारयेत् ।

मृत्युदानम्

अपमृत्युजयार्थाय मृत्युदानमित श्शृणु ।। ५१७

सहस्र निष्कस्वर्णेन कारयेत् प्रतिमां शुभाम् ।
द्विभुजां पुरुषाकारां भ्रुकुटी कुटिलेक्षणाम् ।। ५१८

कोललोहितव न्नेत्रे मृत्युप्रतिकृते स्मृते ।
दंष्ट्राकराळवदनं मृत्योरित्य वधारय ।। ५१९

सव्यहस्ते भवे द्यष्टिः पाशमन्यत्र विन्यसेत् ।
पंचगव्येन संक्षाळ्य पंचोपनिषदादिभिः ।। ५२०

संस्नाप्य धान्यराशौ तं स्थापयेत् तदनंतरम् ।
संहारोत्पादने कृत्वा समावाह्य स्वनामभिः ।। ५२१

समिच्चरुघृतै र्होमं अग्निकुंडे समाचरेत् ।
प्रोक्षयित्वा यथान्यायं तं दद्यात् पंचरात्रिणे ।। ५२२

अपमृत्युभयं तस्य न कदाचित् भविष्यति ।

रसातलप्रवेशः

बिल्वदारु समासाद्य कुसुंभरजसा सुधीः ।। ५२३

षडरं पूर्ववच्चक्रं साध्यनामादि निर्लिखेत् ।
पाताळादि यथोद्देशं पन्नगासुरमंडितम् ।। ५२४

परितोपि विलिख्याथ कुंडे चाधाय पावकम् ।
नरमांसेन जुहुयात् द्वादशाहं जपादिभिः ।। ५२५

ततो नागादय स्सर्व उपस्थास्यंति मंत्रिणम् ।
पद्धतिं दर्शयंत्यस्य रक्षंत्येनं न संशयः ।। ५२६

स्तंभनम्

शिलातले लिखेच्चक्रं षडरं सषडक्षरम् ।
अरांतरे मंत्रराजं तन्नाभौ साध्यनाम च ।। ५२७

स्थंडिले स्थापयित्वैतत् आसीनो जपमाचरेत् ।
स्तंभयेति पदं चोक्त्वा जुहुयात् अर्कखंडिकाम् ।। ५२८

विवाहगर्भवादादौ कथायां स्तंभनं भवेत् ।
स्तंभनांतर माख्यास्ये शृणु तत्कमलासन ! ।। ५२९

द्वेष्यपाद रजोमूत्रमलै रंगार गोमये ।
संयोज्य बिल्वकाष्ठे तु द्वेष्यस्य प्रतिमां लिखेत् ।। ५३०

प्रेतवस्त्रे लिखेद्वापि शंखकील मनंतरम् ।
चतुरंगुळ मात्रं तु प्रतिमांगानि ताडयेत् ।। ५३१

कीलेन तेन मंत्रेण नित्यं मंत्रजपस्स्मृतः ।
धनादिहानि र्द्वेष्यस्य भविष्यति न संशयः ।। ५३२

ताडनं यत्र यत्रांगे तत्र तत्र व्यधा भवेत् ।

उच्चाटनम्

उच्चाटनमितो वक्ष्ये यथाव त्कमलासन ! ।। ५३३

श्मशानांगारचूर्णेन निंबधुत्तूर संभवैः ।
रसैरक्षद्रुकाष्ठे वा द्विहस्त प्रेतवाससाम् ।। ५३४

पूर्वव च्चक्रमालिख्य तत्र मंत्राक्षराण्यपि ।
साध्यनाम लिखेदंतः प्रागादिषु लिखेदचाम् ।। ५३५

आदिं बिंदुं तृतीयं च पुनर्बिंदु यथाक्रमम् ।
तदारूढं रिपुं ध्यायेत् कुंडेचापाकृतौ ततः ।। ५३६

समिद्भि र्निंबवृक्षस्य यद्वा विषमहीरुहः ।
जुहुया दनले भीतः अमृतंपेषये द्रिपुम् ।। ५३७

चैत्यवृक्षे च बध्नीयात् ध्वजांतं कमलासन ! ।
अंहोभि रेकविंशद्भिः भार्यापुत्रादिभि स्सह ।। ५३८

रिपुः पलायते सत्य मितो विद्वेषणं शृणु ।

विद्वेषणम्

अक्षकाष्ठेन कुर्वीत स्निग्धयोः प्रतिमां द्विषोः ।। ५३९

अन्योन्याभिमुखं कृत्वा तयोर्मंत्रं लिखेदपि ।
विद्वेषय पदोपेतं नामधेयं चतुर्मुख! ।। ५४०

जपेन्मंत्रं ततो मंत्री कुंडे होमं समाचरेत् ।
मृत्युवर्धन वृक्षोत्थः समिद्भि र्होमकर्म च।। ५४१

अष्टोत्तरसहस्रेण हवनेन परस्परम् ।
स्निग्धयो र्जायते द्वंद्वं काकोलूकादि सम्मितम् ।। ५४२

एवं दशदिने याते पयसा स्नापये त्तयोः ।
भूयः प्रीतौ भवेतां तौ जानीहि कमलासन! ।। ५४३

मारणम्

मारणं वक्ष्यते कर्म तच्छृणुष्वातिदारुणम् ।
मध्यकुण्ड समायुक्तां होमशालां प्रकल्पयेत् ।। ५४४

अर्कवृक्षस्य फलकां हस्तद्वय समायताम् ।
तावता विस्तृतां ब्रह्मन्! घनत श्चतुरंगुळाम् ।। ५४५

गृहीत्वा विलिखेत् तस्मिन् दक्षिणाशामुखो गुरुः ।
शत्रो र्वपुर्यथारूपं प्रतिकूलादिनादिषु ।। ५४६

कृष्णपक्षे विशेषेण प्रकुर्यान्मारण क्रियाम् ।
प्राचीभागेथ कुण्डस्य षडश्रं चक्रमालिखेत् ।। ५४७

कृष्ण सूत्रै रलंकृत्य तस्मिंश्चक्रे प्रतिष्ठिते ।
कृष्णगन्धांबु पुष्पाद्यैः पूजयित्वा ततः परम् ।। ५४८

श्मशान शत्रुनिलय वल्मीकेभ्यो मृदं हरेत् ।
शत्रुपादमृदं चापि धुत्तूर दळसारतः ।। ५४९

पेषयेत् खरमूत्रेण कारयेत् प्रतिमां रिपोः ।
प्राणप्रतिष्ठामंत्रेण कुर्यात्प्राण प्रतिष्ठितम् ।। ५५०

पादेनाक्रम्य हृदयं सहस्रं जपमाचरेत् ।
विषयस्य प्रभारूढे शत्रूणां नेत्रयो र्हृदि ।। ५५१

करयोः पादयोर्गुह्ये श्रोत्रयो र्घ्राणरंध्रयोः ।
मर्मस्थानेषु चान्येषु वेधां कुर्याद्विचक्षणः ।। ५५२

यानि चांगानि विद्धानि तानि हीनानि पद्मज! ।
श्मशानाग्निं ततः कुण्डे निधाय तदनंतरम् ।। ५५३

दक्षिणाग्रान् प्रतीच्यग्रान् दर्भांश्च परिधीनपि ।
कृत्वा कृत्वाऽत्मनो रक्षां वेदघोषे प्रवर्तिते ।। ५५४

ब्राह्मणेभ्यो धनं दत्वा ततो होमं समारभेत् ।
अक्षकाष्टस्स्रुक् स्रुवाभ्यां कृष्णानिक्षतजोऽक्षितैः ।। ५५५

यद्वा राजिलरक्तात्तैः सर्षपैश्च मरीचिभिः ।
औषधै र्व्याधि जनकैः समिद्भि श्चाक्षवृक्षकैः ।। ५५६

मंत्रांते मारये त्युक्त्वा सहस्रं प्रतिवासरम् ।
शत्रु नामापि संयोज्य जुहुया द्दक्षिणामुखः ।। ५५७

कृत्वा दर्शनकालांतं वासरानेकविंशतिः ।
वेदिष्ठां फलकां नित्यं होमधूमेन धूपयेत् ।। ५५८

अगरुं गुग्गुळंचापि धूपार्ध मनले दहेत् ।
सप्त स्वहस्स्वतीतेषु ज्वरितस्स्यात् रिपु ध्रुवम् ।। ५५९

व्याधिपीडा भवे त्तस्य विविधा कमलासन! ।
द्विपस्ताह स्स्वतीतेषु कृत्वा काचि न्महानिशि ।। ५६०

कुंडमध्या त्समुत्थाय अट्टहासं विमुंचती ।
प्राणिभि र्दुर्निरीक्षा सा कुंडा दुत्थाय दृश्यते ।। ५६१

अभीतवत् स्वयं तिष्ठेत् साधकः कमलासन! ।
ब्रूते किंकरवाणीति तत स्तां च नदेद्गुरुः ।। ५६२

सपत्नं मारयेत्युच्चैः गुरुर्ब्रूया त्ततःपरम् ।
हत्वा गुरुं पुनर्ब्रह्मन्! कृत्वा पुन रुपैष्यति ।। ५६३

द्वाविंशेऽहनि संप्राप्ते ऋत्विग्भि स्सह मंत्रवित् ।
हुतपूर्णाहुति र्लक्षं मंत्रराजं स्वयं जपेत् ।। ५६४

तत स्सुदर्शनं मंत्रं नारसिंहाह्वयं मनुम् ।
अपराजित मंत्रं च जप्त्वा पापा द्विमुच्यते ।। ५६५

एकविंशे दिने रात्रौ कुर्यात् पूर्णाहुतिं गुरुः ।
एवं रिपून् गुरुर्जित्वा गत्वास्याद्गत किल्बिषः ।। ५६६

शांतिकर्म

रुग्णानां शांतिकर्माद्य वक्ष्ये श्रुणु चतुर्मुख! ।
षोडशस्तंभ संयुक्तं वेदिकुंड परिष्कृतम् ।। ५६७

यागमंडप माकल्प्य चतुस्तोरण संयुतम् ।
तिल व्रीहि यवै र्वेद्यां धान्यपीठीं प्रकल्पयेत् ।। ५६८

कलशांश्च सप्तदश स्थापये द्गंधवारिभिः ।
मध्ये यजेत मंत्रेशं परित ष्षोडशस्वपि ।। ५६९

स्नपनोक्त विधानेन कुंभपूजा चतुर्मुख! ।
चक्राब्जमंडले देवं अर्चयित्वाऽनले ततः ।। ५७०

समिदन्न घृतै र्होमः सप्तरात्रं चतुर्मुख! ।
कलशेषु जपं कुर्यात् प्रत्येकं शतसंख्यया ।। ५७१

कुर्वीत भोजनं रात्रौ यावत् कर्मावसानिकम् ।
प्रत्यहं जुहुयात् ब्रहन्! सहस्रं परमावधि ।। ५७२

शांतिं प्रयच्छ महती मित्यंतं मंत्र ईरितः ।
जपस्त्वयुत संख्याभिः प्रत्यहं कमलासन! ।। ५७३

भूर्जपत्रे लिखे च्छक्रं गुळिका मपि कारयेत् ।
अभ्यर्च्य सप्तरात्रंतां कर्मान्ते कलशांबुभिः ।। ५७४

स्नापयित्वा ततो रुग्णं गुळिकां बंधये त्ततः ।
ततः पूर्णहुतिं कृत्वा वीतिहोत्रं विसर्जयेत् ।। ५७५

रोगादिशांति र्भवति कर्मणाऽनेन पद्मज! ।

पुष्टियजनम्

पौष्टिकंकर्मवक्ष्यामि सर्वेषां पुष्टिदायकम् ।। ५७६

पूर्ववत् गुळिकां कृत्वा रक्तसूत्रेण वेष्टयेत् ।
चक्राब्जकुंभ यजनं पूर्ववत् कमलासन! ।। ५७७

विद्रुमाभं स्मरेद्देवं होमयेत् समिदादिभिः ।
पुष्टिं प्रयच्छे त्यन्तंस्यात् मन्त्रजाप श्चतुर्मुख! ।। ५७८

कृत्वाभिषेकं कर्मान्ते गुलिकाबन्धनं चरेत्।
पूर्णाहुति स्सप्तमेऽह्नि तदन्तेऽग्नि विसर्जनम्।। ५७९

एवं कृते कर्मजाले दीर्घ मायु र्विवर्धनम्।
कर्मणोऽनुगुणं कुण्डं वक्ष्यामि कमलासन! ।। ५८०

कर्मणां कुण्डानि

पौष्टिके पंकजं कुण्डं शान्त्यां वृत्तं समाचरेत्।
अष्टाश्रे वा त्रिकोणे वा मारणं कर्म शस्यते।। ५८१

उच्चाटनं चापकुण्डे यक्षकन्यादि साधनम्।
पञ्चाश्रेऽथ षडश्रेतु स्तंभनं कर्म कारयेत्।। ५८२

सप्ताश्रे मोहनं विद्धि विद्वेषस्तु नवाश्रके।
पश्वादीनां वशीकारं दशाश्रे कर्म कारयेत्।। ५८३

एकादशाश्रे ब्रह्मादीन् वशीकुर्या दतंद्रितः।
द्वादशाश्रे तु वैकुण्ठं द्रष्टुकाम स्समारभेत्।। ५८४

कर्मणां होमः

यज्ञ वृक्षोद्भवैः शान्तिः सौभाग्यं कुसुमै र्भवेत्।
धूपद्रव्यै स्सदारोग्यं पुष्टिर्धध्ना पयश्शुचिः।। ५८५

अन्नेन विविधा न्कामान् आज्येनायुष्मतीः प्रजाः।
श्वेतपद्मैस्तु जुहुयात् इच्छन् ब्रह्मश्रियं नरः।। ५८६

लक्ष्मीपुष्पैस्तु जुहुयात् लक्ष्मीकामोऽथवारुणैः।
पद्मै र्बिल्वसमिद्भिर्वा ज्ञानकामस्तु सर्पिषा।। ५८७

कन्याकामः कालपुष्पैः गोकामो गोमयैः पुनः।
आयुष्काम स्तु दूर्वाभिः भूमिकाम स्तु मृत्स्नया।। ५८८

यवै रिन्द्रियकामस्तु तिलै स्सर्वजनप्रियः।
ब्रह्मवर्चसकामस्तु ब्रह्मवृक्ष समुद्भवैः।। ५८९

यवैश्च वेणुभिश्चैव नीवारै श्शालिभि स्तथा।
सर्वे कामाश्च सिध्यंति होतुर्बीजै र्यथोदितैः।। ५९०

लाजहोमेन सिध्यन्ति सर्वे कामा नसंशयः।
अन्नेनान्नादिकामस्तु पुत्रकामस्तु पायसैः।। ५९१

निम्बपुष्पै र्हिरण्यार्थी सर्वे सिद्ध्यन्ति सर्पिषा।

होमद्रव्यप्रमाणानि

होमे सर्पिर्मधुक्षीर धारास्युः चतुरङ्गुळाः।। ५९२

शुक्तिर्दद्ध्याहुतिग्रासं पायसा द्याहुतिर्भवेत्।
भक्ष्याहुति स्तदर्धं स्यात् फलैः पुष्पै रखंडितैः।। ५९३

निष्पाव बीजमानातु धूप द्रव्याहुतिर्भवेत्।
तिल व्रीहि यवाद्यैस्तु मुष्ट्यर्धार्धाहुति र्भवेत्।। ५९४

अष्टाङ्गुला तदर्धा वा समिद्दूर्वा षडङ्गुला।
मृद्वीकाक्ष प्रमाणात्तु गोमयाहुतिरिष्यते।। ५९५

पूर्णाहुतिः

पूर्णाहुति र्घृतस्य स्यात् कुडुबेन चतुर्मुख! ।
न्यूनाधिक प्रमाणां तु हव्यकव्याहुतिं कृताम् ।। ५९६

भुंजंति दानवा दैत्या न फलाय च कल्पते ।
कुक्कुटांड प्रमाणं तु चरोः पिंडं घृताप्लुतम् ।। ५९७

निक्षिप्य च स्रुचो गर्ते अपिधाय स्रुवेण च ।
ससमि द्दर्भकुसुमं जुहुया न्मूलविद्यया ।। ५९८

एवं योगविभाग स्ते कथितः कमलासन! ।

परकाय प्रवेशः

परकाय प्रवेशाख्यं योगिभिः क्रियते ऽनिशम् ।। ५९९

सप्रकार मिहाख्यास्ये शृणुष्व कमलासन! ।
परपिंडं नवं दृष्ट्वा यौवने वय संस्थितम् ।। ६००

ऊर्ध्ववक्त्रं दीर्घपाद मेकांते शाययेच्छवम् ।
तत्पादपार्श्वे शायीत बध्वा योगासनं ततः ।। ६०१

एकाग्रमानसः कुर्यात् योगाभ्यासं प्रसन्नधीः ।
नाभिचक्रं अरक्षेत्रे भ्रमंतं जीवमात्मनः ।। ६०२

पिंगळेनेडया यद्वा निर्गमय्य बहिस्ततः ।
नासिकापुटमार्गेण खगवत् गगनं नयेत् ।। ६०३

साकं सदशभिः प्राणैः क्रोशं योजन मुत्तरम् ।
गत्वा गत्वा निवर्तंते योजनान्यपि योगिनः ।। ६०४

नासिकापुट मार्गेण नाभिचक्रं प्रवेशयेत् ।
एवं नित्यं समभ्यस्य योगी योगं जितेंद्रियः ।। ६०५

स्वदेहा त्तं निर्गमय्य नासिकापुट पद्यया ।
शवस्य नासिकारंध्र वर्त्मनांतः प्रविश्य च ।। ६०६

नाभिचक्रं प्रविश्याथ नाडी संचारमाचरेत् ।
तत्रापि पातमालोक्य तदन्यत्र प्रवेशयेत् ।। ६०७

यथासुखं चरेद्योगी सुंदरे वपुषि स्थितः ।
योगी निपातयन् गात्रं वासुदेवं यथाप्नुयात्।। ६०८

शरीरनिपातः

तम्मार्गमद्य वक्ष्यामि शृणु ष्वैकाग्रमानसः ।
ब्रह्मचर्ये धृतमतिः कुशशायी जितेंद्रियः ।। ६०९

मुमुक्षुर्मंत्र राजं तं जपेल्लक्ष मतंद्रितः ।
हृदये कर्णिकामध्ये ध्यायेत् योगोक्तवर्त्मना ।। ६१०

शुद्धस्फटिकसंकाशं चतुर्बाहुं किरीटिनम् ।
अंगुष्ठमात्रं पुरुषं ज्योतिर्मंडलमध्यगम् ।। ६११

ध्यायन्नर्घ्यादिभि र्भोगै रंतर्यागं समाचरेत्।
योगाभ्यासबले नैव गुणोत्कर्षः प्रजायते ।। ६१२

चंद्रार्काग्निमयं बीजं अर्कमंडल सन्निभम् ।
ततस्सूक्ष्मतरं बिंबं राजमुद्ग समप्रभम् ।। ६१३

तं सर्वमंत्रा आक्रम्य स्थिता विद्या विचक्षणाः ।
ततस्तु राजिकाबीज प्रमाणं चिंतयेत् क्रमात् ।। ६१४

उत्पादक मधास्याभिः यस्यांते नाद आश्रुतेः ।
तं तनीयस मत्यन्तं अश्ववाल समप्रभम् ।। ६१५

ब्रह्मनाडी मनेनाशु पश्यति ध्यानसेवनात्।
ततोंग रोममंत्रं तु बीजवाल समप्रभम् ।। ६१६

ध्याये न्नियम मास्थाय ब्रह्मनाडी प्रकाशकम् ।
एवं ध्यायन्निमं पिंडं परिपक्वं परित्यजेत् ।। ६१७

परिज्ञाय पुरा पिंडं पाकलक्षण मुत्तमम् ।
निरुद्ध संधिमात्रं च कृत्वा देवं समीरितम् ।। ६१८

मुक्त्वा तत् ब्रह्मरंध्रेण उत्क्रांति करणेन च ।
ध्यात्वा परित्यजे द्देहं नित्याभ्यासरतो यदि ।। ६१९

परजीवयोर्नभेदः

तत् ब्रह्म परमभ्येति वासुदेवाख्य मव्ययम् ।
तिले तैलं घृते सर्पिः क्षीरे क्षीरं जले जलम् ।। ६२०

तद्वन्नभेदो गृह्येत जीवात्म परमात्मनोः ।
तप्तलोहे यथातोयं क्षणेनैव प्रलीय्यते ।। ६२१

अग्निदग्धानि बीजानि न रोहंति यथापुनः।
तद्वन्नजायते भूयो जीवात्मा कमलासन! ।। ६२२

युक्तस्वप्नावबोधस्य योगयुक्तस्य सर्वदा ।
निवर्तते तदा शब्दः प्रसृतो दुंदुभिस्वनः ।। ६२३

देहवातलक्षणम्

स्पर्शं न शीतं नात्युष्णं विजानाति त्वगिंद्रियम् ।
भ्रुवो र्मध्ये यथाज्योतिः द्वादशांते व्यवस्थितम् ।। ६२४

प्रत्यस्तमेति वै शीघ्रं न चोदयति वै पुनः ।
न जानाति समाधिस्थो हार्द्रमब्जं यदाचरेत् ।। ६२५

परिशुष्यति गात्रस्थं शोणितं श्लेष्मलक्षणम् ।
न वेत्ति पार्थिवं गंधं सबाह्याभ्यंतरे यदा ।। ६२६

पिंडस्तदा प्रबोद्धव्यः कालेनैवाचिरेण तु ।
पृथिव्यां संस्थितं चैवं धारणायां समाहितः ।। ६२७

नवेत्ति शब्दं प्रागुक्तं पंचमात् पंचमे क्षणे ।
स्थितस्समेधा बाह्ये तु शीतोष्णे च न विंदति ।। ६२८

स्थिते दिने चतुष्कोण पिंडस्तत् कलितेक्षणैः ।
रूपध्यानं समासाद्य पूर्वोक्त विधिना यदि ।। ६२९

नाभ्येति हृदयाकाशे बहि र्वाज्योतिषांपतिः ।
पिंडपातोह्यवस्थंस्यात् ज्ञात्वाऽरिष्टैः पुरोदितैः ।। ६३०

तृतीय्येऽह्निचतुर्वक्त्र! सर्वमेतत् तदाक्षणे।
समाधिर्यदि वायव्ये योगी सम्यक् प्रवर्तते ।। ६३१

न वेत्ति परमान्नादं तृषितः परिकंपते ।
दिनद्वयेन पिंडस्य पातोस्य द्वितयक्षणे ।। ६३२

स्थिते गगनभावे तु प्रागुक्त विधिना यदि ।
नवेत्ति विधिनागंधं तद्बाह्ये तु शुभाशुभम् ।। ६३३

तत्रैवैकदिने वाऽथ लक्षणे प्रथमेक्षणे ।
ध्यात्वैव विधिना सम्यक् योगी ध्यानैकमानसः ।। ६३४

मयिसन्नर्पितमना व्याहरन् मंत्रमुत्तमम् ।

वैकुंठलक्षणम्

स्वयमुत्क्रमते पिंडाद्याया द्योगनिकेतनम् ।। ६३५

दिव्यलोके च वैकुंठे मय्येव परिलिय्यते ।
शेषासने सुखासीनं वैकुंठे मणिमंडपे ।। ६३६

अष्टबाहुं विशालाक्षं अष्टायुधधरं हरिम् ।
श्रीभूमिसहितं देवं सर्वाभरण भूषितम् ।। ६३७

चतुर्भुजं वा वामेन हस्तेनालिंग्य पद्मजाम्।
अष्टौवारास्त्रियस्तस्य वालव्यजनपाणयः ।। ६३८

तिष्ठंति परितः पश्चात् शंखाद्यायुधधारिणः ।
सेवंते पुरुषास्तस्मात् बहिस्तिष्ठंति मूर्तयः ।। ६३९

चतुर्विंशति संख्याया स्ततो मीनादिमूर्तयः ।
पक्षींद्रविष्वक्सेनाभ्यां कुमुदादि गणै स्तथा ।। ६४०

महाभागवतास्तत्र द्वादशाक्ष रचिंतकाः ।
सेवंते मंडपे नित्यं पुनरावर्तिवर्जिताः ।। ६४१

इहयत् कर्मकुर्वाणाः विष्णो रायतनात्मकम् ।
मुच्यंते योगमास्थाय पुरुषाः परमंपदम् ।। ६४२

प्राप्यापि तत्तत्कुर्वाणाः सेवंते पुरुषोत्तमम् ।

पुररक्षा

पुररक्षा विधिं वक्ष्ये तच्छृणुष्व यथातथम् ।। ६४३

ग्रामादि नगरक्षोभ शांतये कर्मशस्यते ।
ग्रामादि मध्यमे देशे वेदिकुंड समन्विताम् ।। ६४४

प्रपां कृत्वा वेदिकायां कुंभस्थापन माचरेत् ।
आवाह्य पूजनं कुर्यात् दिनान्येकोनविंशति ।। ६४५

पलाशसमिधाहोमो यंत्रं सौदर्शनं ततः ।
स्थापयेत् पूजयेच्चापि गुरु श्शास्त्रविधानतः ।। ६४६

दिक्ष्वष्टास्वपि तं यंत्रं स्थापयित्वा विधानतः ।
कुंभतोयेन सर्वत्र प्रोक्षयेत् नगरादिषु ।। ६४७

पूर्णाहुतिं ततः कृत्वा कुर्यादग्निविसर्जनम् ।
ग्रामादेरभिवृद्धिस्स्यात् सत्यमुक्तं चतुर्मुख! ।। ६४८

नामत्रय मंत्रः

नामत्रयमहामंत्र मितो वक्ष्ये शृणुष्व ह ।
अच्युतश्चाप्यनंतश्च गोविंद इति ते त्रयः ।। ६४९

तेष्वादौ प्रणवोद्धारः चतुर्थीं त्रिषुचोद्धरेत् ।
नतिं त्रिष्वपि चोद्धृत्य नामत्रयमनुं जपेत् ।। ६५०

नामत्रयाख्य मंत्रस्य मुनिर्व्यास उदीरितः ।
छंदस्तु देवीगायत्री देवता गरुडध्वजः ।। ६५१

आद्यन्तौ बीजशक्त्याख्यौ यथेष्टं विनियुज्यते ।
मंत्रत्रयै ष्षडंगानि ध्यानमद्य ब्रवीमि ते ।। ६५२

अच्युतानंतगोविंद रूपिणं विभुमव्ययम् ।
भजेऽहं वासुदेवं तं श्री भू नीळा समन्वितम् ।। ६५३

किरीटादि विभूषांगं ब्रह्मरुद्रादि सेवितम् ।
शंखचक्रगदाखड्ग शार्ङ्ग बाणधरं सदा ।। ६५४

इति ध्यात्वा जपेन्मंत्रं साधकोऽ क्षरलक्षकम् ।
स पुनाति जगत्सर्वं नात्र कार्या विचारणा ।। ६५५

साधयत्यखिलं कर्म सत्यमुक्तं चतुर्मुख! ।

अग्निप्राकार मंत्रः

अग्निप्राकार मंत्रं ते उपदेक्ष्यामि तच्छृणु ।। ६५६

छंदसामादि मुद्धृत्य यवर्ग द्वितयं ततः ।
अचां द्वितीयं बिंदुं च नतिं च तत उद्धरेत् ।। ६५७

पवर्गादि मचामादिं यवर्ग द्वितयं ततः ।
अचां द्वितीयं तदनु यवर्ग प्रधमादिमम् ।। ६५८

कालानलात्मशब्दस्य चतुर्थीमपि चोद्धरेत् ।
नतिमंते समुद्धृत्य मंत्रजापः पुरोदितः ।। ६५९

मुद्राविधिः

मुद्राविधि मिहाख्यास्ये याभि स्तुष्टो भवाम्यहम् ।
एकादश महामुद्राः देवमंत्रप्रसाधकाः ।। ६६०

शंखमुद्रा चक्रमुद्रा चाग्निप्राकारमुद्रिका ।
पद्माख्या सुरभिर्मुद्रा मुद्रेऽन्ये धूपदीपयोः ।। ६६१

योगमुद्रा ग्रासमुद्रा महती ग्रासमुद्रिका ।
अंजलिः परमा मुद्रा सर्वदेवप्रसादिनी ।। ६६२

एकादश महामुद्राः वर्णयैताः पृथक्पृथक् ।

शंखमुद्रा

निबद्ध्य दक्षिणांगुष्ठं वामहस्तस्य मुष्टिना ।। ६६३

दक्षिणांगुळिभि स्सम्यक् वाममुष्टिं निपीडयेत् ।
तर्जन्यां दक्षिणस्याथ वामांगुष्ठेन योजयेत् ।। ६६४

शंखमुद्रेय मुदिता चक्रमुद्रा मितश्शृणु ।

चक्रमुद्रा

मणिबंधा वुभौ कुर्यात्तिर्य क्संभ्रांत चक्रवत् ।। ६६५

कनिष्ठिकां दक्षिणस्य वामांगुष्ठे निवेशयेत् ।
तथैव दक्षिणांगुष्ठे वामहस्त कनिष्ठिकाम् ।। ६६६

करद्वयांगुळीः कुर्या द्विरळाः कमलासन! ।
आयुधेश्वर मुद्रैषा चक्राख्या सिद्धिदायिनी ।। ६६७

अग्निप्राकारमुद्रा

विहाय तर्जनीं सम्यक् अंगुष्ठेन करांगुळीः ।
निबध्य भ्रामये त्सम्यक् अग्निप्राकार संज्ञिका।। ६६८

पद्ममुद्रा

पद्ममुद्रा मितो वक्ष्ये तच्छृणुष्व चतुर्मुख! ।
मणिबंधौ तु संयोज्य करजांस्तु प्रसारयेत् ।। ६६९

अंगुष्ठावंतरावेश्य तर्जन्या तर्जनीं ततः ।
कनिष्ठिकांगुळीमन्य कनिष्ठांगुळिना सह ।। ६७०

उभौ च कूर्परौ सम्यक् योजयेत् पद्म मुद्रिका ।

सुरभिमुद्रा

अंगुष्ठे द्वे कनिष्ठे द्वे तथास्या त्तर्जनीद्वये ।। ६७१

मध्यमां दक्षिणकरेऽनामिकां च तथेतरम् ।
श्लिष्ट्वा प्रसारये द्ब्रह्मन्! करयो रुभयोरपि ।। ६७२

ज्ञेया सुरभिमुद्रा सा यागद्रव्य विशोधिनी ।

धूपमुद्रा

प्रत्यंगुळि कनिष्ठादि ह्युपर्युपरि संहरेत् ।। ६७३

अंगुष्ठेन स्पृशे द्ब्रह्मन् ! तर्जन्यग्रं ततः परम् ।
धूपोत्थ धूपव द्धस्तौ प्रभातुल्यौ प्रसारयेत् ।। ६७४

धूपाभिधाना मुद्रैषा दीपमुद्रा मितश्शृणु ।

दीपमुद्रा

अग्निप्राकार मुद्रावत् निबध्य चतुरंगुळीः ।। ६७५

विसृज्य तर्जनीमग्रे दीपस्य खलु दर्शयेत् ।
कथिता दीपमुद्रैषा योगमुद्रामितश्शृणु ।। ६७६

योगमुद्रा

नाभे रधस्था द्विन्यस्य सव्यं करतलं पुनः ।
उत्तान मितरं तत् विन्यसेत् करमीदृशम् ।। ६७७

इयं तु योगमुद्रास्यात् मुद्रां ग्रासाह्वया शृणु ।

व्यासमुद्रा

अनामिका मध्यमयोः अंगुष्ठांगुळसंगतिः ।। ६७८

आहुतिर्ग्रासमुद्रा स्यात् होमे प्राणाहुतौ मता ।

महती व्यासमुद्रा

सर्वेषा मंगुळाग्राणां एकत्र खलु संगतिः ।। ६७९

महती ग्रासमुद्रैषा परमान्न निवेदने ।
भोजने च प्रयोक्तव्यां मुद्रामन्यामितः शृणु ।। ६८०

अञ्जलिः

अंगुष्ठाद्यंगुळी स्सर्वाः संस्पृशे दितरै स्तथा ।
अन्योन्यमणिबन्धौ च मुद्रैषाञ्जलि संज्ञिका ।। ६८१

सर्वेषामपि मूर्तीनां दर्शनीया विशेषतः ।
ईषद्विकसितांगुल्य देवावाहन माचरेत् ।। ६८२

मुद्राविकारः

अञ्जलिस्त्वेकहस्तेन परवक्त्राभिमुख्यतः ।
एषा स्वातन्त्र्यमुद्रा स्यात् अभयाख्या च सा भवेत् ।। ६८३

ध्यानमुद्रापि सा ब्रह्मन्! प्रार्थना वक्ष्यतेऽधुना ।

प्रार्थना मुद्रा

मणिबन्धस्य संयोग स्त्वञ्जल्यां यत्र हीयते ।। ६८४

सा ज्ञेया प्रार्थना मुद्रा तया सान्निध्य याचनम् ।
जलाञ्जलि श्चार्घ्यदानं जलेनात्माभिषेचनम् ।। ६८५

सर्वं प्रार्थनया कुर्यात् धारादानं विशेषतः ।
अङ्गुष्ठतर्जनीयोगो ज्ञानमुद्रा प्रकीर्तिता ।। ६८६

न्यासमुद्रापि सैव स्यात् न त्वं नान्यं तया चरेत् ।
मुद्रा विकारा बहवः किं बहूक्त्या चतुर्मुख! ।। ६८७

सर्वमञ्जलिना कुर्यात् या हि सर्वप्रियावहा ।
योगाध्याय मिमं यस्तु शृणोति पठते च यः ।। ६८८

सोऽपि मत्पदमन्वेति सत्यमुक्तं चतुर्मुख! ।। ६८९

इति श्रीपाञ्चरात्रे श्रीविष्णुतिलके ब्रह्मोपदेशे
योगाध्यायोनाम चतुर्थोऽध्यायः

अथ पुण्याहादि विधिर्नाम
पंचमोऽध्यायः

पुण्याहविधिः

पुण्याहादि विधिं वक्ष्ये शृण्वेनं पद्मसंभव! ।
प्रक्षाळ्य पाणीपादौ च उत्तर्यं वेष्टयेत् कटौ ।। १

मृदु द्वादशमृत् पुण्ड्रः पवित्रं करयोर्धरन् ।
त्रिराचम्योपवीत्येव प्राणायाम मथाचरेत् ।। २

वस्त्रधारणम्

प्रसंगादत्र वक्ष्यामि वस्त्रादीनां विधिं क्रमात् ।
सव्यं कटिं समारभ्य प्रादक्षिण्येन वेष्टयेत् ।। ३

पुरतस्त्या च्चतुष्कच्छः पृष्ठतश्चैक कच्छवान् ।
दैवे पैत्रे तथा ब्राह्मे पंचकच्छो भवेन्नरः ।। ४

अभ्यंगे मैथुने क्षौरे विण्मूत्राणां विसर्जने ।
चतुष्कच्छो भवेद्ब्रह्मन्! इतो नग्न उदीरितः ।। ५

उत्तरीयम्

प्रेतकर्मण्येकवासा स्सोत्तरीयः परत्र चेत् ।
अभ्यंगे च तथा क्षौरे नोत्तरीयं प्रशस्यते ।। ६

देवार्चनायां योगे च जपे स्वाध्याय कर्मणि ।
उत्तरीयं द्विजैर्धार्य मुपवीत वदब्जज! ।। ७

उत्सर्जने मलादीनां मैथुने दंतधावने।
उत्तर्यं मस्तके धार्यं शय्यायां शयने तथा ।। ८

प्रदक्षिणादिष्वन्यत्र कटावुत्तर्यधारणम् ।

ऊर्ध्वपुंड्रः

मृतस्य शवदाहांतं नोर्ध्वपुंड्रं मतं मम ।। ९

आसपिंड्यंतु दाहादि न हरिद्रामताब्जज! ।
इतः परत्र पुंड्राणि सहरिद्राणि धारयेत् ।। १०

पवित्रम्

दैव मानुषयज्ञेषु पवित्रे करयोर्मते ।
पंचकालविधौ धार्यं दक्षिणेऽनामिकातले ।। ११

विण्मूत्रोत्सर्जने धार्य मुत्तर्यांते चतुर्मुख! ।
क्षाळने पादकरयो र्गंडूषे दंतधावने ।। १२

सव्येतरे कर्णमूले पवित्रं धारये न्नरः ।
अभ्यंगे मैथुने क्षौरे पवित्रं तु विसर्जयेत् ।। १३

एकमेव पवित्रं स्यात् पैतृके प्रेतकर्मणि ।

आचमनम्

देवयज्ञेषु सर्वत्र कुर्या दाचमन त्रयम् ।। १४

आदावंते च कुर्वीत मधुपर्के सकृत्सकृत् ।
पूजायां ब्रह्मयज्ञादौ योगे श्राद्धे च मैथुने ।। १५

मौंजी यज्ञोपवीतादि धारणे भोजने तथा ।
आद्यंतयो र्द्विराचामेत् देवयज्ञादि पंचसु ।। १६

स्नाने संध्याजपे दंतधावने पुंड्रधारणे ।
प्रदक्षिणे प्रणामे च दाने स्वाध्याय कर्मणि ।। १७

आदौ कुर्यात् द्विराचामं सकृदंते चतुर्मुख! ।
अभ्यंगे वपनस्नाने मलमूत्र विसर्जने ।। १८

अंते कुर्यात् द्विराचामं आदौ नाचमनं स्मृतम् ।
फलतांबूल भक्ष्याणां भक्षणे कमलासन! ।। १९

आचामो नैव कर्तव्यो यज्ञसूत्र विधिं शृणु ।

यज्ञसूत्रम्

रज्जुत्रयो ब्रह्मचारी वानप्रस्थो गृही तथा ।। २०

षड्रज्जू कथितौ ब्रह्मंश्चतूरज्जुर्यति र्भवेत् ।
रज्जुत्रयो भवेत्सूतः नीरज्जुर्वा यति र्भवेत् ।। २१

नित्यकर्म च दैवं च मानुषं पांचकालिकम् ।
उपवीत्येव कुर्वीत पारेतं पैतृकं तथा ।। २२

प्राचीनावीति कुर्वीत मैथुने क्षौरकर्मणि ।
निवीती पृष्ठतोभ्यंगे निवीती कमलासन! ।। २३

धारयेत् दक्षिणे कर्णे यज्ञसूत्रं निवीतिवत् ।
मलमूत्र विसर्जेषु स्या दन्यत्रोपवीतवत् ।। २४

पुण्याहविधिः

वासुदेवाख्य पुण्याहं वाचये द्देव सन्निधौ ।
मानुषं यदि पुण्याहं मंदिरं शून्यतां व्रजेत् ।। २५

तद्वासुदेवपुण्याहं शृणु वक्ष्ये चतुर्मुख! ।
देवायतन मासाद्य यद्वा यागमहीं गुरुः ।। २६

गोमयालेपिते देशे ब्रुस्यादावासने स्वयम् ।
यागसंभार सहितः प्राङ्मुखोदङ्मुखोऽथ वा।। २७

आसीन स्स्वस्तिके पद्मे प्राणायाम त्रयं चरेत् ।
पूर्वोक्त वर्त्मना ब्रह्मन्! भूतशुद्धिं समाचरेत् ।। २८

तत स्संकल्प्य पुण्याहं तिलव्रीहि यवात्मके ।
चतुर्दळात्मकं पद्मं विलिखे द्विश्वविद्यया ।। २९

पंचोपनिषदः

प्रसंगादत्र वक्ष्यामि पंचोपनिषदो विधे! ।
ओंकारमुद्धरे त्पूर्वं यवर्गे षष्टमं मनुम् ।। ३०

अचां चतुर्दशतमं बिंदुं च तत उद्धरेत् ।
नतिं परं चतुर्थीं च परमेष्ठ्यात्मनामनि ।। ३१

चतुर्थीं च नतिं चाथ उद्धरेत् प्रथमो मनुः ।
प्रणवं पूर्वमुद्धृत्य यवर्गादि द्वितीयकम् ।। ३२

बिन्दुं नतिं समुद्धृत्य चतुर्थीं च परस्य च ।
पुरुषात्म चतुर्थीं च नत्यन्तं सम्यक् उद्धरेत् ।। ३३

एष द्वितीयो मंत्रस्स्यात् पुरुषाख्य श्चतुर्मुख! ।
ततः प्रणव मुद्धृत्य यवर्गस्य द्वितीयकम् ।। ३४

अचां द्वितीयं बिंदुं च नतिं परचतुर्थिकम् ।
विश्वात्मनश्चतुर्थीं च नतिं विश्वाह्वयो मनुः ।। ३५

आदौ स्यात् प्रणवोद्धारो यवर्गार्ण तृतीयकम् ।
अचां द्वितीयं बिंदुं च नतिं परचतुर्थिकम् ।। ३६

सर्वात्मन श्चतुर्थीं च नत्यंतं सम्यगुद्धरेत् ।
सर्वमंत्राह्वय श्चैषः पंचमोऽयं मनुर्विधे! ।। ३७

प्रणवं पूर्व मुद्धृत्य यवर्गे तुर्यमक्षरम्।
स्वर द्वितीयं बिंदुं च नतिं परचतुर्थिकम् ।। ३८

निवृत्त्यात्म चतुर्थीं च नतौ चापि समुद्धृते ।
निवृत्तिसंज्ञो मंत्रोऽयं तुरीयः कमलासन! ।। ३९

पंचोपनिषदो मंत्राः महापातकनाशनाः ।
उपासंतेऽनिशं भक्त्या पंचरात्रपरायणाः ।। ४०

कर्णिकायां कुंभमेकं शुद्धपुष्कर पूरितम् ।
कूर्चापिधान पत्राढ्यं तंतुवेष्टनवेष्टितम् ।। ४१

प्रागग्रा स्तीर्णदर्भेषु न्यसेत् पुरुषविद्यया ।
प्रागग्रा नुदगग्रांश्च प्रागादिषु च त्रिष्वपि ।। ४२

परिस्तीर्य कुशान्पश्चात् अर्घ्यादि परिकल्पयेत् ।
योगपीठं तु संकल्प्य कलशाधो महीतले ।। ४३

तत स्सुदर्शनं देवं कलशे हृदयांबुजात् ।
सौदर्शन षडर्णेन आगच्च पदशोभिना ।। ४४

आवाह्य मुद्रां संदृश्य भोगै रर्घ्यादिभि र्यजेत् ।
निवेद्य च ततो मंत्रं द्वादशाक्षर संज्ञितम् ।। ४५

जप्त्वा पवित्रमंत्रं च ऋत्विज स्त्रिपदा मनुम् ।
ब्रूयुः पुण्याहशब्दांतं प्रणवादि तदा गुरुः ।। ४६

सौदर्शनषडर्णं तु जपेदष्टोत्तरं शतम् ।
ततस्तु वासुदेवादि चत्वारो भगवन्मयाः ।। ४७

तन्नामकीर्तनं कुर्यात् प्रणवादि चतुर्मुख! ।
प्रकृतिं ब्रह्म चात्मानं जपेत्पश्यन्निव स्वयम् ।। ४८

प्रणवं पूर्वमुद्धृत्य चतुर्विधपदस्य च ।
सर्वज्ञ सर्वेश्वरयोः सर्वदर्शिपदस्य च ।। ४९

समृद्धिपद मस्याथ वशिनः प्रथमामपि ।
स्वात्मशब्दद्वितीयां चाराधयत् प्रथमामथ ।। ५०

अन्यूनादे रनंतस्य प्रथमोद्धार माचरेत् ।
पीतशब्दं दुरिभय क्रोधस्य प्रथमा मपि ।। ५१

निर्दोष प्रथमां पश्चात् निरवधिष्ठ पदस्यच ।
प्रथमां भगवच्छब्द प्रथमां च समुद्धरेत् ।। ५२

दीर्घायुरस्त्विति ततो मन्त्र मेनं जपेत् सुधीः ।
शिवं पानीय मस्त्विति उद्धृत्य तदनंतरम् ।। ५३

शिवं पानीय मित्युक्त्वा भगवद्वासुदेवयोः ।
प्रथमां च समुद्धृत्य करोत्विति ततो जपेत् ।। ५४

अक्षतै रक्षतंचास्तु चाक्षतं पुनरुद्धरेत् ।
अरोगं कुशलं चेति भगवद्वासुदेवयोः ।। ५५

करोत्विति समुद्धृत्य ततस्सुमनसोऽपि च ।
सौमनस्यमिति प्रोक्त्वा चोद्धरे दस्त्विति क्रियाम् ।। ५६

उद्धरे त्सुमन ष्षष्ठीं भगवद्वासुदेवयोः ।
प्रथमां तत उद्धृत्य करोत्विति ततः परम् ।। ५७

मूर्तीनां वक्ष्यमाणानां प्रथमं तारपूर्विकाम् ।
उद्धरे देषगति रित्यपि मूर्तिपदात्पुरा ।। ५८

भगवत्प्रथमोद्धार स्तयो र्मध्ये चतुर्मुख! ।
वासुदेवादि चत्वार इमे मंत्रेश्वरा विधे! ।। ५९

ततः प्रणव मुद्धृत्य भगवत्प्रथमां ततः ।
मूर्तीनां वक्ष्यमाणानां प्रथमां च समुद्धरेत् ।। ६०

वर्धता मिति चोद्धारो मंत्रांते कमलासन! ।
वासुदेवादि चत्वारः पुरुष स्सत्य एव च ।। ६१

अच्युतश्चाप्यनंतश्च मूर्तयोऽष्टा विहेरिताः ।
एतेषां मंत्रजापश्च पश्चात्तदवधारय ।। ६२

पूर्ववन्मूर्ति शब्दांत मुद्धृत्य तदनंतरम् ।
प्रीयता मिति चोद्धार स्त्वष्टानां च जपं चरेत् ।। ६३

मूर्तिमंत्रांत मुद्धृत्य पूर्ववत्कमलासन! ।
शान्ति रस्त्विति चोद्धृत्य मंत्रजापः पुरा यथा ।। ६४

ओं पूर्वा स्सकलागाधाः वक्ष्यमाणा जपे त्सुधीः ।
ओं पवित्रं भगवानस्तु वासुदेवः परात्परम् ।। ६५

तथा सङ्कर्षणो देवः पवित्रं परमो महान् ।
प्रद्युम्नोऽस्तु पवित्रं वै साक्षी विश्वस्य साम्प्रतम् ।। ६६

पवित्र मनिरुद्धोऽस्तु विश्वत्राता जगत्पतिः ।
शुद्धये वासुदेवोऽस्तु लांगली शुद्धये तथा ।। ६७

प्रद्युम्न श्शुद्धये चास्तु अनिरुद्धोऽस्तु शुद्धये ।
पुरुष श्शुद्धये चास्तु सत्यश्चास्तु विशुद्धये ।। ६८

अच्युत श्शुद्धये चास्तु अनन्त श्चास्तु शुद्धये ।
शुद्धयेचास्तु गोविंदः शुद्धयेऽस्तु त्रिविक्रमः ।। ६९

शुद्धयेऽस्तु सदा देवः केशवः क्लेशसूदनः ।
नारायणोऽस्तु विश्वेश श्शुद्धये सर्वकर्मसु ।। ७०

माधव श्शुद्धये चास्तु सर्वलोक हिते रतः ।
शुद्धयेचास्तु गोविंदः परमात्मा सनातनः ।। ७१

शुद्धयेस्तु महाविष्णु श्शुद्धये मधुसूदनः ।
त्रिविक्रमो महामाय श्शुद्धये वामनस्तथा ।। ७२

श्रीधर श्शुद्धये चास्तु हृषीकेशोऽस्तु शुद्धये ।
शुद्धये पद्मनाभोऽस्तु तथा दामोदरः प्रभुः ।। ७३

मीनात्मा शुद्धये चास्तु कूर्मात्मा चास्तु शुद्धये ।
शुद्धयेऽस्तु वराहात्मा नृसिंहात्मास्तु शुद्धये ।। ७४

शुद्धये वामनात्मास्तु रामात्माचास्तु शुद्धये ।
तथा दाशरथी राम श्शुद्धयेऽस्तु सदा हरिः ।। ७५

कृष्णोऽस्तु शुद्धयेशौरि र्बलरामोऽस्तु शुद्धये ।
शुद्धयेऽस्तु महामायः कल्की विष्णुस्सनातनः ।। ७६

शुद्धये पद्मनाभादि मूर्तयो विभवस्तथा ।
पद्मनाभो ध्रुवोऽनन्त श्शक्तीशो मधुसूदनः ।। ७७

विद्याधिदेवः कपिलो विश्वरूपो विहंगमः ।
क्रोडात्मा बडबा वक्त्रो धर्मो वागीश्वरस्तथा ।। ७८

एकार्णवान्तश्शायी च तथा कमठरूपधृत् ।
वराहोऽपि नृसिंहश्चाप्यमृताहरण प्रभुः ।। ७९

श्रीपति र्दिव्यदेहश्च कांतश्चामृतधारकः ।
राहुजि त्कालनेमिघ्नः पारिजातहरो महान् ।। ८०

लोकनाथोऽस्तु शांतात्म दत्तात्रेयो महाप्रभुः ।
न्यग्रोधशायी भगवान् एकशृंगतनु स्तथा ।। ८१

देवो वामनरूपोऽस्तु सर्वव्यापी त्रिविक्रमः ।
नरनारायणौ चैव हली कृष्ण स्तथैव च ।। ८२

ज्वलत्परशुभृद्रामो रामश्चान्यो धनुर्धरः ।
वेदविद्भगवान् कल्की पाताळशयनः प्रभुः ।। ८३

अष्टत्रिंशा इमेदेवाः शुद्धये लोकपावनाः ।
देव्य श्श्रियादय स्संतु शुद्धये विष्णुवल्लभाः ।। ८४

सर्वत्र रक्षणे संतु चक्राद्यायुधमूर्तयः ।
शुद्धये चास्त्वनंतात्मा सहस्रफणवान्बली ।। ८५

शुद्धये वैनतेयोऽस्तु पक्षिराजो महायशाः ।
शुद्धयेऽस्तु गणाध्यक्षो विष्वक्सेनः प्रतापवान् ।। ८६

द्वारपा स्संतु चंडाद्याः प्रभवांताश्च सर्वदा ।
इंद्राद्या श्शंकरांताश्च शुद्धये संतु लोकपाः ।। ८७

कुमुदाद्याश्च भूतेशा श्शुद्धये संतु सर्वदा ।
शुद्धये सनकाद्याश्च योगिनो ऋषय स्तथा ।। ८८

न्यूनाधिकानां सर्वेषां शुद्धये भगवान् प्रभुः ।
शंखचक्र गदा पद्म युक्त स्सर्वेश्वरेश्वरः ।। ८९

नारायण स्सुरेशानः कर्मणां पूरणाय च ।
परात्परस्य रूपस्य परस्य परमात्मनः ।। ९०

प्रतिमानां च दिव्यानां स्थितानां परिशुद्धये ।
प्रासाद गोपुरादीनां प्राकाराणां च शुद्धये ।। ९१

विभोः करिष्यमाणस्य यागस्थानस्य शुद्धये ।
यागोपकरणानां च शुद्धये यागकर्मणाम् ।। ९२

राज्ञो जनपदस्यापि विभोः क्षेत्र निवासिनः ।
वर्णानां ब्राह्मणादीनां तत्तदाश्रमवासिनाम् ।। ९३

वेदशास्त्रागमज्ञानां व्रतस्थानां शुभात्मनाम् ।
पंचकालविधिज्ञानां पांचरात्ररतात्मनाम् ।। ९४

आचार्य देशिकादीनां ऋत्विजां परिचारिणाम् ।
वैष्णवानां विशेषेण परत्र हित मिच्छताम् ।। ९५

पुत्रमित्र कळत्राणां दासादीनां गवामपि ।
स्वस्तिरस्तु शुभंचास्तु शांतिरस्तु पुनः पुनः ।। ९६

अविघ्नमनिशंचास्तु दीर्घमायुष्यमस्तु वै ।
समाहित मनश्चास्तु संपदश्चोत्तरोत्तरम् ।। ९७

वैष्णवा भगवद्भक्ता हत्समाहित तेजसः ।
एकांतिनो महात्मान स्सर्वे भागवतास्तथा ।। ९८

ओं भूस्स्वस्ति भुवस्स्वस्ति सुवस्स्वस्ति च वै महः ।
जनस्स्वस्ति तपस्स्वस्ति सत्यंस्वस्ति तपोमिति ।। ९९

एतत्पुण्याहमुद्दिष्टं विष्णोर्यागादिकर्मसु ।
एतन्मंत्रजलैरेव प्रोक्षणं शुद्धिरुच्यते ।। १००

सौदर्शनषडर्णेन कूर्चाश्वत्थदळै र्गुरुः ।
प्रोक्षये त्कुंभसलिलै र्यत्र यत्र गुरोर्मतिः ।। १०१

ततः कवाटमुद्घाट्य मंत्रन्यास पुरस्सरम् ।
स्नानासनांत मभ्यर्च्य पूर्वोद्दिष्टेन वर्त्मना ।। १०२

तैलाभ्यंगविधिं कृत्वा संस्नाप्य शुचिवारिभिः ।

पीठकल्पनम्

विशेष मत्र वक्ष्यामि योगपीठे प्रकल्पयेत् ।। १०३

हरिं विना श्रियादीनां ब्रह्मादीनां चतुर्मुख! ।
चंडादि परिवाराणां भक्तनां पीठकल्पनम् ।। १०४

आधारादि च भूम्यंतं धर्मादि च चतुष्टयम् ।
प्रकल्प्य पादरूपेण पीठं भद्रं प्रकल्पयेत् ।। १०५

पद्मासनं ततोभ्यर्च्य मूर्तिमंत्रेण पूजयेत् ।
एवं संस्नाप्य देवेशं विशेष स्नपनं चरेत् ।। १०६

वैशेषिकस्नपनम्

पंचपर्वसु संक्रांतौ द्वादश्यां श्रवणे तथा ।
व्यतीपाते च रोहिण्यां कर्तृजन्मक्रियादिषु ।। १०७

सोम सूर्योपरागेषु पुण्यकाले पुनर्वसौ ।
केवलं स्नपनं कुर्यात् चतुःस्थानार्चनान्वितम् ।। १०८

महोत्सवे प्रतिष्ठायां कर्मांगस्नपनं चरेत् ।
अंकुरार्पण कर्मापि रक्षाबंधन कर्म च ।। १०९

निशाख्यचूर्णैस्स्नपन सहितं सर्वमाचरेत् ।

त्रिविधं स्नपनम्

स्नपनं त्रिविधं श्रेष्ठ मध्यनिंद्य विभेदतः ।। ११०

वैशेषिकेषु कथितं नित्याख्यं स्नपनं विना ।
सप्तभि र्दशभिः कुम्भै स्स्नपनं श्रेष्ठमुच्यते ।। १११

नवभिः कलशैरेव मध्यमाख्यं चतुर्मुख! ।
पंचभिः कलशै र्यत्त ज्जघन्य मवधारय ।। ११२

पूर्वं पूर्वं प्रशस्तं स्यात् द्रव्याभावे परंपरम् ।
तदर्धं पूर्वदिवसे रात्रावंकुर माचरेत् ।। ११३

रक्षामपि तदा बध्वा प्रतिमा मधिवासयेत् ।
अंकुरार्पण कर्मादि सर्वं सद्योऽथवा चरेत् ।। ११४

स्नपनेऽधिवासः

स्नपनप्रतिमायां तु अधिवासः प्रशस्यते ।
तीर्थ प्रतिकृतौ यद्वा तदलाभे तथोत्सवे ।। ११५

कर्मार्चायां भवे द्यद्वा नोचेत् कूर्चेऽधिवासयेत् ।
रत्नलोह शिलावर्जं बिंबं यदि चतुर्मुख! ।। ११६

अधिवासो भवे त्कूर्चे यद्वास्यात् कांस्यदर्पणे ।

स्नपनमंडपम्

द्वारतोरण संयुक्तं मुक्तादामाद्यलंकृतम् ।। ११७

दर्भमालादि सहितं मंडपं कारयेत् पृथक् ।
स्नपनं कारये त्तत्र यद्वा पूर्वं विनिर्मिते ।। ११८

तन्मध्ये कल्पयेद्वेदि मुपानादि समन्विताम् ।
तदूर्ध्वं चतुरश्रं वा वृत्तं वलयकल्पनम् ।। ११९

तत्राधारमहीं कुर्यात् कुंभस्य चतुरानन! ।
मृण्मयादिषु बिंबेषु बहिर्वेदिं प्रकल्पयेत् ।। १२०

एकबेरे तु न बहि स्स्नानवेदि प्रकल्पनम् ।
तोरणादि न कर्तव्यं एकबेरे चतुर्मुख! ।। १२१

गृहार्चास्नपने तद्वत् स्नपनं कर्मशस्यते ।
गोमयेनानुलिप्यैनां रंगवल्यापि शोभयेत् ।। १२२

जलद्रोणीं तदीशाने दक्षिणे स्नानभाजनम् ।
देव स्नपनयोग्यानि द्रव्याण्यपि विनिक्षिपेत् ।। १२३

कलशास्पदसिद्ध्यर्थं वेद्यां सूत्राणि पातयेत् ।

सूत्रपातनम्

चंदनार्द्राणि सूत्राणि षट् प्रागग्राणि विन्यसेत् ।। १२४

उदगग्राणि तावंति पदानां पंचविंशतौ ।
मध्येन च पदान्यष्टौ दिक्षु शेषाणि मार्जयेत् ।। १२५

धान्यपीठम्

कुर्यात् प्रतिपदं धान्यपीठिकां विधिवर्त्मना ।
व्रीहीणा माढकं न्यस्य तण्डुलं तु तदर्धकम् ।। १२६

तिलमानं तदर्धं स्यात् व्रीहेरूर्ध्वं तु तंडुलम् ।
तिलं तदुपरि ब्रह्मन्! वस्त्रं स्यादंतरेऽन्तरे ।। १२७

पीठिकामेव माकल्प्य प्रतिवीधि ततः परम् ।
द्वौद्वौ कुशाग्रौ विन्यस्य कलशान् धान्यराशिषु ।। १२८

सौवर्णान् राजतांस्ताम्रा नलाभे मृण्मयानपि ।
छिद्रादिरहितान् शुद्धान् स्वनवंतः पृथक्पृथक् ।। १२९

द्रोणांबपूरणे योग्यान् क्षिपेत्सप्तदश स्वयम् ।
प्रक्षाळ्य मृण्मयान् कुंभान् तंतुभि र्वेष्टयेत् पृथक् ।। १३०

कलशाधिवासः

कलशा स्सदमेदिन्याः पश्चिमे धान्यराशिषु ।
पुण्याहप्रोक्षितान् कुंभान् न्यसेद्दर्भे ष्वधोमुखान् ।। १३१

तारेण तेषा मुपरि परमेष्ठ्यात्मविद्यया ।
त्रीन् दर्भान् विन्यसेद्ब्रह्मन्! प्राङ्मुखस्सन् गुरुस्स्वयम्।। १३२

प्रोक्षये दर्घ्यतोयेन कुंभान् पुरुषविद्यया ।
अक्षता न्विश्वमंत्रेण विकिरेत्तेषु देशिकः ।। १३३

निवृत्तिमंत्रेणोत्तानान् कृत्वा कुंभान् ततः परम् ।

अग्निकार्यम्

अग्निं संसाद्य विधिव दष्टोत्तरशताहुतीः ।। १३४

विष्णुगायत्रियाज्येन हुत्वा सम्पात माचरेत् ।
स्नपनार्हाणि वस्तूनि संपाताज्येन सेचयेत् ।। १३५

आराध्य मूर्तिमंत्रै स्तैः कुंभेष्वंबु प्रपूरयेत् ।
उद्धृत्य कलशान् सर्वान् सर्वमंत्रेण देशिकः ।। १३६

कलशास्पद मेदिन्यां धान्यराशिषु निक्षिपेत् ।
आमकर्पूरमलय सुगंधक्षोदमिश्रितैः ।। १३७

अंबुभिः पूरयेत् कुंभान् विद्यया वक्ष्यमाणया ।

कुंभपूरणम्

वासुदेवाख्यमंत्रेण ब्राह्मे कुंभं च पूरयेत् ।। १३८

ब्राह्मैंद्रे पौरुषोमंत्रः सत्य संज्ञस्तु दक्षिणे ।
अच्युतः पश्चिमे कुंभ अनंतस्स्यात्तदुत्तरे ।। १३९

ब्राह्माग्नेये केशवस्स्यात् नैऋत्यां दिशि पद्मज! ।
नारायणाह्वयो मंत्रो वायौ माधव ईरितः ।। १४०

गोविंदमंत्र मीशाने दिघ्घटेषु चतुर्ष्वपि ।
विष्णवादयस्ते चत्वार आग्नेयादि विदिक्ष्वपि ।। १४१

श्रीधराद्याश्च चत्वारो मंत्रेशा अंबुपूरणे ।
एषां मंत्रै र्मूर्ति संज्ञैः कुंभानापूर्य निक्षिपेत् ।। १४२

कुंभेष्वेतेषु सर्वत्र नवरत्नानि निक्षिपेत् ।
तथैव पंचलोहानि मूर्तीनां प्रतिमामपि ।। १४३

नवरत्नानि

प्रसंगादत्र वक्ष्यामि नवरत्नानि तच्छृणु ।
माणिक्य पद्मरागे द्वे नीलं वज्रं च मौक्तिकम् ।। १४४

पुष्यरागप्रवाळे वैडूर्यमरकतौ मणी।
आहत्य नवरत्नानि पंचलोहानि वै शृणु ।। १४५

पंचलोहानि

सुवर्णं रजतं ताम्रं त्रपुः कांस्यं चतुर्मुख!।
एतानि पंचलोहानि कथितानि ततश्शृणु ।। १४६

अलाभे सर्वरत्नानां वज्र मेकं विनिक्षिपेत् ।
लोहाना मप्यलाभे स्वर्णमेकं विनिक्षिपेत् ।। १४७

एवं द्रव्याणि निक्षिप्य धान्यपीठोपरि न्यसेत् ।
विष्णुगायत्रिमंत्रेण ततश्शृणु चतुर्मुख! ।। १४८

कूर्चम्

सप्तभिः पंचभि र्यद्वा दर्भैः कूर्चान्विनिर्मातान् ।
अवागग्रान्न्यसे त्तेषु कलशेषु महाघटे ।। १४९

चतुर्विंशतिभिर्दर्भैः कृतं कूर्चमवाक् शिरः ।
कंठदघ्नं विनिक्षिप्य न्यसे दश्वत्थ पल्लवान् ।। १५०

शरावैः कलशास्यानि छादये च्चक्रविद्यया।
युवासुवासा मंत्रेण वस्त्रवेष्टनं माचरेत् ।। १५१

मूर्तिपैस्साक मासाद्य देवमादाय देशिकः ।

पुण्याहम्

स्नानवेद्यां निवेश्याथ पुण्याहं वाचयेत्ततः ।। १५२

तोषयित्वा द्विजश्रेष्ठान् प्राणायाममथाचरेत् ।
द्वारतोरण कुंभानां ध्वजानां यजनं चरेत् ।। १५३

प्रवर्तिते तूर्यघोषे पूर्व संसाधितेऽनले ।
यावंतः कलशा ब्रह्मन्! मूलेन द्वादशाहुतीः ।। १५४

आज्येन नरसूक्तेन चरुणा षोडशाहुतीः ।
पात्रेसंपात मानीय कलशेषु सकृत्सकृत् ।। १५५

संसिच्य स्पर्शमंत्रेण योगपीठं प्रकल्पयेत् ।

स्नपनकलशेषु आवाहनम्-

आवाहये न्महाकुंभे द्वादशाक्षर विद्यया ।। १५६

मूर्तिमंत्रैश्च पूर्वोक्त वर्त्मनान्येषु देशिकः ।
आवाह्याभ्यर्च्य जप्त्वापि निवेद्य च विशेषतः ।। १५७

अभिषेकः

अभिषिक्ते तु देवेशे तैलशुद्धोदकावधि ।
विष्ण्वादिभि श्च कलशै रभिषेकः पुराष्टभिः ।। १५८

पुरुषाद्यै स्ततः कुर्यात् गोविंदांतै र्यथाक्रमम् ।
महाकुंभांबुभिः कुर्यादभिषेकं ततःपरम् ।। १५९

वेदान् पठत्सु ऋत्विक्षु देशिको मूलविद्यया ।
विद्यया द्वादशाक्षर्या कारये दभिषेचनम् ।। १६०

अभिषेकावसानेषु कूर्चग्रंथिं विसर्जयेत् ।
छित्वा तंतुं ततः कुंभतोयै स्तमभिषेचयेत् ।। १६१

प्रतिकुंभाभिषेकं स्यात् अंगसम्मार्जनादिकम् ।
उपस्नानं प्लोतवस्त्रं उत्तर्यादि विधारणम् ।। १६२

अर्घ्यादि धूपदीपांतं प्रतिकुंभं समाचरेत् ।
महाकुंभाभिषेकांते हरिद्रास्नपनं चरेत् ।। १६३

हरिद्रास्नपनम्

नित्यस्नपनवत् कुंभं एकं विन्यस्य पद्मज! ।
निशाचूर्णै स्समापूर्य श्रियं तत्र सभाजयेत् ।। १६४

निशातण्डुलयो श्चूर्णं निशाचूर्ण मुदीर्यते ।
कुंभमेनं समुद्धृत्य श्रीसूक्तेनाभिषेचयेत् ।। १६५

ततः प्रदक्षिणीकृत्य नत्वा स्तुत्वा गुरूत्तमः ।
सहस्रधारया यद्वा कुंभतोयेन पद्मज! ।। १६६

संस्नाप्य नरसूक्तेन शेषंकर्म पुरा यथा ।
आचामादि निवेद्यांत मनुष्ठाय ततःपरम् ।। १६७

अग्नावाराधयेद्देवं यागपूर्त्यै चतुर्मुख! ।

नवकलशस्नपनम्

मध्यमस्नपनं वच्मि यथावदवधारय ।। १६८

चंदनार्द्राणि सूत्राणि प्रागुदग्वदनानि च ।
चत्वारि चत्वार्यास्फाल्य नवकुंभास्पदा मही ।। १६९

वासुदेवं यजेन्मध्ये विष्वादीन् परितोऽष्टसु ।

पंचकलशस्नपनम्

पूर्ववत्सकलं कर्म जघन्य मवधारय ।। १७०

कुंभास्पदेषु नवसु आग्नेयादि चतुष्टयम् ।
सम्मार्ज्य शिष्टदेशेषु कुंभ स्थापन माचरेत् ।। १७१

वासुदेवं यजेत् ब्राह्मे प्रागादिषु चतुर्ष्वपि ।
विष्वादयश्च चत्वारः पूर्ववत् द्रव्यपूरणम् ।। १७२

पंचगव्यविधिः

पूरयेत् पंचगव्यै र्वा तत्प्रकार मिहोच्यते ।
पंचगव्यानि गृह्णीयात् मृत्प्रात्रे नूतने शुभे ।। १७३

कपिलायां जरायां वा पंचगव्यं प्रशस्यते ।
नार्तायां न च गर्भिण्या न वृद्धायाः कदाचन ।। १७४

नावत्साया उपादेयं धेनोर्मूत्रं शकृद्द्वयम् ।
भूमिष्ठं गोमयं ग्राह्यं सोष्णं क्रिम्याद्यदूषितम् ।। १७५

निष्नीड्य सम्यग्गृह्णीयात् गोमयस्य रसं पुनः ।
सद्यस्तप्तं घृतं शुद्धं अहोरात्रोषितं दधि ।। १७६

क्षीरं ग्राह्य मतप्तं च दशाहाज्जन्मनः परम् ।
दध्नो द्विगुणमाधारः तस्मात्तु द्विगुणं पयः ।। १७७

गोमूत्रं षड्गुणं प्रोक्तं शकृद्वारि चतुर्गुणम् ।
परमेष्ठी शकृन्मंत्रो गोमूत्रस्य तु पौरुषः ।। १७८

विश्वमन्त्रो भवे द्दध्नो निवृत्ति स्सर्पिषो भवेत् ।
पयस स्सर्वमंत्रस्स्यात् सर्वेषामष्टवर्णकम् ।। १७९

विष्णुगायत्रिया सर्वगव्यानि सहयोजयेत्।
द्रोणमानं पंचगव्यं न्यूनं चेदासुरं भवेत् ।। १८०

गृहार्चास्नपने नूनं प्रस्थेनैव प्रकल्पयेत् ।
एवं संयोज्य गव्यानि परमेष्ठ्यादिभिः क्रमात् ।। १८१

ब्राह्मादि सोमपर्यंत कुंभस्थापन माचरेत् ।
परमेष्ठी भवेद्ब्राह्मे पुरुषो मघवद्दिशि ।। १८२

याम्यकुंभे तु विश्वाख्यो निवृत्तिः पश्चिमे भवेत् ।
औत्तरे कलशं सर्वं देवतावाहनं तथा ।। १८३

जपं च तद्वत् कुर्वीत शेषं कर्म पुरा यथा ।

पंचगव्य प्रोक्षणम्

प्रोक्षणे पंचगव्यस्य प्रमाणाद्यवधारय ।। १८४

पंचगव्यानि गृह्णीयात् पूर्ववत् कमलासन! ।
गोमयेन समं मूत्रं मूत्रमानं घृतं भवेत् ।। १८५

घृतमानं दधि ब्रह्मन्! दधिमानं भवेत्पयः ।
करकेन यजेत् कुंभान् प्रोक्षणे सम्भवे यदि ।। १८६

संप्रोक्षण विधानेन कर्मजालं प्रशस्यते ।

पंचगव्य प्राशनम्

पंचगव्य प्राशने तु प्रमाण मवधारय ।। १८७

गोमयेन समं मूत्रं दधि तद्द्विगुणं भवेत् ।
सर्पिश्चतुर्गुणं तस्मात् पीयूषं षड्गुणं ततः ।। १८८

प्राशने पंचगव्यानां प्रमाणमिद मब्जज! ।
तंडुलादिषु धान्येषु चतस्रः प्रागुदक् स्मृताः ।। १८९

रेखास्तदा नवपदी कोणस्थानानि मार्जयेत् ।
ब्रह्मस्थाने पयो ब्रह्मन्! ऐंद्राद्यासु चतुसृषु ।। १९०

दधि सर्पि श्शकृन्मूत्रं परमेष्ठ्यादिभि र्यजेत् ।
योजयेत् विष्णुगायत्र्या पीत्वा पापाद्विमुच्यते ।। १९१

प्रसंगादुदितं ब्रह्मन्! अग्न्यर्चन मित श्शृणु ।
अर्चिते देवदेवेशे नैवेद्यांतं यथाविधि ।। १९२

अग्निकार्य विधिः

अग्न्यगारं गुरुः प्राप्य द्वारे चंडौ समर्चयेत् ।
अंतः प्रविश्य कुंडन्य पश्चिमे प्राङ्मुखो गुरुः ।। १९३

उपविश्यासने शुद्धे गोमयेनानुलेपयेत् ।
असुरांतकचक्राख्य विद्यया कुंडमब्जज! ।। १९४

कुंडध्यानम्

कुंडं पुरुषरूपेण ध्याये त्तद्वक्ष्यमाणतः ।
प्राच्यां शिरस्समाख्यातं बाहुयुग्म व्यवस्थितम् ।। १९५

ऐशान्याग्नेयकोणे तु जंघे वायव्य नैऋते ।
उदरं कुंड मित्युक्तं योनिर्योनि र्विधीयते ।। १९६

ध्यात्वा संकल्प्य होमाय पुण्याहमपि वाचयेत् ।
ओं भूर्भुवस्सुवरिति प्रोक्षणावोक्षणे तथा ।। १९७

अभ्युक्षणं च कृत्वाथ स्वात्मनो दक्षिणे भुवि ।
पुष्पाणि वामे चान्यानि होमद्रव्याणि निक्षेपेत् ।। १९८

स्वांगे मन्त्राक्षरा न्यस्य कुंडोत्तरमहीतले ।

पात्रासादनम्

संस्तीर्य दर्भान् प्रागग्रान् तेषु पात्राणि सादयेत् ।। १९९

आज्यपात्रं चरुस्थालीं प्रोक्षणीं च प्रणीत्यपि ।
समिधश्च न्यसे द्दर्भान् तंडुलान् परिधीनपि ।। २००

स्रुचं स्रुवं तथा दर्वीः व्यजनं मेक्षणं तथा ।
शुष्ककाष्ठं च घंटां च गंधद्रव्याणि चेतरत् ।। २०१

द्वंद्वशस्तेषु विन्यस्य मूलमंत्रेण देशिकः ।

कुंडसंस्कारः

कुंडमध्ये लिखे द्रेखा दक्षिणादुत्तरावधि ।। २०२

तिस्रः प्राग्वदनाभूय स्तावती रुदगायताः ।
लिखेत् प्रागादिपूर्वांतं शकलं तद्विसर्जयेत् ।। २०३

करद्वयं चतुर्वक्त्र! शुद्धतोयै र्विशोधयेत् ।
दर्भस्तंभद्वयेनाद्भिः कुंडेऽभ्युक्षणमाचरेत् ।। २०४

पर्यग्निकरणं कुर्यात् कुंडस्य कुशमुष्टिभिः ।
भद्रासनं कुंडमध्ये कल्पयेत् तदनंतरम् ।। २०५

कुंडमध्येध्यानविधिः

ध्याये त्तत्र स्वयं लक्ष्मीं सर्वालंकारभूषिताम् ।
सर्वावयव संपूर्णा मृतुस्नातां विचिंतयेत् ।। २०६

देवं नारायणं ध्यायेत् सर्वलक्षणलक्षितम् ।
चतुर्बाहुं विशालाक्षं कोमलं पीतवाससम् ।। २०७

शंखचक्रगदापद्मैः चतुर्भिः कृतलक्षणम् ।
पाणिपादतलांभोजं श्रीवत्सांकित वक्षसम् ।। २०८

कालमेघनिभं शांतं चंद्रबिंबनिभाननम् ।
हारकेयूरवलयं किरीटेनोपशोभितम् ।। २०९

ध्यात्वैवं तौ समभ्यर्च्य चिंतयेत्संगमं तयोः ।

अग्न्युत्पादनम्

तत्संगा दुत्थितं ध्याये दग्निं वैष्णवमब्जज! ।। २१०

अरणे रर्ककान्ताद्वा द्वादशाक्षर विद्यया।
मथिताग्निं श्रोत्रियाणां गृहाद्वाग्निं समाहरेत् ।। २११

ओं भूर्भुवस्सुवरिति सर्वेषां प्रोक्षणं चरेत् ।

अग्निप्रतिष्ठा

तं दिव्याग्निमथो ध्यात्वा चाग्निमंत्रं ततो जपेत् ।। २१२

आगच्छ पदसंयुक्तं चतुर्वारं जपेन्मनुम् ।
कुंडमध्ये निधायाग्निं आवाह्याभ्यर्च्य देशिकः ।। २१३

असुरांतकमंत्रेण चेन्धनानि विनिक्षिपेत् ।
वायुमंत्रेण कुंडाग्निं व्यजनेन प्रबोधयेत् ।। २१४

कुंडस्य परितस्सम्यगद्भिः परिसमूहयेत् ।

परिस्तरणम्

ग्रंथीकृताग्रानद्वंद्वान् प्रागुदग्वदनान् कुशान् ।। २१५

एकादशपरान्मंत्रै र्वासुदेवादिभिः क्रमात् ।
प्रागादिदिक्षु संस्तीर्य द्रव्याग्न्योरंतरे गुरुः ।। २१६

प्रणीतिपात्रं निक्षिप्य कारयेत् अंबुपूरितम् ।
अक्षतै स्तत्समभ्यर्च्य दर्भयुग्म विनिर्मितम् ।। २१७

प्रादेशमात्रं विन्यस्य कूर्चं तस्मिन् त्रिभिः कुशैः ।
पवित्रितै स्समाच्छाद्य प्रोक्षणीं स्वपुरस्तले ।। २१८

विन्यस्य तत्प्रणीतांबु कूर्चेन सह देशि कः ।
योजयेत् प्रोक्षणीपात्रे कूर्चेनोदङ्मुखेन च ।। २१९

अंगुष्ठानामिकाभ्यां च त्रिरुत्पूय तदंबुना ।
कूर्चेन प्रोक्षये त्पूर्वं सादितानि चतुर्मुख! ।। २२०

कूर्चेन संस्पृशे त्तत्तन्नामोच्चारण पूर्वकम् ।
उत्तानानि ततः कृत्वा प्रोक्षयेत् प्रोक्षणांबुना ।। २२१

प्रोक्षण्यद्भिः प्रणीतान्तु सत्यंत्वर्तेति मंत्रतः ।

प्रणीतावाहनम्

परिषिच्य प्रणीतांच शुद्धतोयैः प्रपूरयेत् ।। २२२

वासुदेवं समावाह्य प्रणीतायां समर्चयेत् ।
अग्नेरैशानदिग्भागे स्थापयेत् तां कुशासने ।। २२३

ब्रह्मावाहनम्

अग्नेर्दक्षिणतः कूर्चे दर्भद्वादश निर्मिते ।
चतुर्मुखं भुजद्वंद्वं साक्षमाला कमंडलुम् ।। २२४

हैमाभं शक्तिसहितं ब्रह्माणं तं विचिंतयेत् ।
ब्रह्ममंत्रेण तं तत्र समावाह्य समर्चयेत् ।। २२५

चरुपाकः

विष्णुगायत्रिया स्थालीं प्रक्षाळ्य खलु तंडुलम् ।
निक्षिप्याचक्रमंत्रेण विचक्राख्येन वारिभिः ।। २२६

संक्षाळ्याथ सुचक्रेण शोधयित्वाथ तंडुलान् ।
सूर्यचक्राख्यमंत्रेण चुल्यामारोपयेच्च ताम् ।। २२७

ज्वाला चक्राख्यमंत्रेण वह्निं प्रज्वालये त्ततः ।
महासुदर्शन मंत्रेण चरुश्रपण माचरेत् ।। २२८

चरवः

एवं चुल्यां केवलान्नं मौद्गान्नं पायसाह्वयम् ।
गुडान्नमिति तान् सर्वान् श्रपयेच्च चतुर्विधान् ।। २२९

अवतार्य चरून् कुंडस्योत्तरे विनिवेशयेत् ।
द्रावितं गाळितं सर्पिराज्यपात्रे समाहरेत् ।। २३०

आज्य संस्कारः

प्रणीति कूर्चं तत्पात्रे उदगग्रं निवेशयेत् ।
अग्नेरुत्तरतोंगारान् निधायोपरि पद्मज! ।। २३१

तदाज्यपात्रं विन्यस्य दर्भानादीप्य दर्शयेत् ।
विसर्जयित्वा तान् दर्भान् द्वे दर्भाग्रे चतुर्मुख! ।। २३२

द्वयाख्येनैव मंत्रेण घृतपात्रे निवेशयेत् ।
दर्भस्तंभेन दीप्तेन त्रिः पर्यग्नि समाचरेत् ।। २३३

विसृज्य दर्भस्तंबं तदग्ने रुद्वासये दुदक्।
अंगारा न्योजये त्कुंडे घृतस्थालीं पुरा न्यसेत् ।। २३४

अंगुष्ठानामिकाभ्यां तत्कूर्चेन करयोर्द्वयोः।
त्रिरुत्पूय पवित्रस्य ग्रन्थिं विस्रस्य शंबरम् ।। २३५

उपस्पृश्य प्रहृत्याग्नौ आज्यं सुरभिमुद्रया ।
अमृतीकृत्य तद्दर्भै स्तिरोधायाशुशुक्षणेः ।। २३६

अष्टासु दिक्ष्वपींद्रादीन् आवाह्याभ्यर्चयेत् गुरुः ।

स्रुक्स्रुवसंस्कारः

उष्णोदकेन प्रक्षाळ्य स्रुक् स्रुवौ पंचभिः कुशैः ।। २३७

सुनिर्मितेन कूर्चेन मूलं मूलेन वै तयोः ।
मध्यं मध्येन च तथाचाग्र मग्रेण मार्जयेत् ।। २३८

अग्नौ निष्टप्यतावद्भिः प्रोक्ष्योदीच्यां निधाय च ।
कूर्चग्रंथिं विसृज्याग्नौ प्रहृत्य तदनंतरम् ।। २३९

स्रुवेणाज्यं समादाय होमद्रव्येषु सेचयेत् ।
चरुं संसिच्य चाज्येन वामपार्श्वे स्रुवं क्षिपेत् ।। २४०

परिधि प्रक्षेपणम्

अंगुष्ठमध्य चरमांगुळनाहान्यथाक्रमम् ।
मध्य दक्षिण वामेषु प्रागुदग्वदनांस्तदा ।। २४१

श्रैधरेण नृसिंहेन हयग्रीवेण वै जपन् ।
परिधीन् त्रींश्च संस्थाप्य पश्चिमं परिधिं ततः ।। २४२

छंदसामादिना स्पृष्ट्वाऽग्ने रैशानाग्नि कोणयोः ।
अग्नीशानाख्य मंत्राभ्या माघारसमिधावपि ।। २४३

तत्तत्कोणे विनिक्षिप्य चोर्ध्वाग्रांश्चतुरानन ! ।
अदितेन्वित्यादिमंत्रैः प्रसुवेत्यवसानिकम् ।। २४४

परिषिच्य क्रमाद्वह्निं समिधो मुष्टिमुद्रया ।
गृहीत्वा पंचदश च ह्येकतोग्राघृताप्लुताः ।। २४५

प्रजापतिं हृदा ध्यायन् मूलेन जुहुयात् सकृत् ।

आघारहोमः

वामे करतले दर्भवेष्टिते घृतभाजनम् ।। २४६

निधाय देशिकः पश्चात् आघाराहुति माचरेत् ।
स्रुव माज्येन संपूर्य दक्षिणेनैव पाणिना ।। २४७

अग्नेर्नैर्ऋत मारभ्य शैवावध्याज्यधारया ।
प्राजापत्येन मंत्रेणाविच्छिन्नं होम माचरेत् ।। २४८

आवाय्वग्नितथैंद्रेण होमं कुर्यात् यथापुरम् ।

आज्यभागः

आज्यभागं ततः कुर्यात् आग्नेयं दक्षिणेऽनले ।। २४९

तत्रोत्तरे तथा सौम्यं मध्ये व्याहृतिभि स्त्रिभिः ।
सकृद्धुते समस्ताभि स्ततो ध्यायेत् हुताशनम् ।। २५०

अग्निध्यानम्

द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम् ।
वरदं शक्तिपाणिं च बिभ्राणं स्रुक्स्रुवौ तथा।। २५१

अभीतिदं चर्मधरं वामेचाज्यधरं करे ।

सप्तजिह्वाः

संति जिह्वास्सप्तवह्ने र्यथावदवधारय ।। २५२

काळी कराळी सुमना लोहिता धूम्रसंज्ञिता ।
स्फुलिंगिनी विश्वरूपी सप्तजिह्वाः शिखावतः ।। २५३

काळ्यास्थ्सानं कुंडमध्ये कराळ्याः प्राग्दिशि स्थितिः ।
अग्निकोणेऽस्ति सुमना लोहिता वारुणी मता ।। २५४

धूम्रायास्तु स्थिति स्सौम्ये मारुतेऽस्ति स्फुलिंगिनी ।
विश्वरूपी रसज्ञायाः शंभुभागे पदं स्मृतम् ।। २५५

जिह्वाहोमः

शांतिकर्मणि संस्कारे काळ्यां होमं समाचरेत् ।
विजयार्थं कराळ्यां च पुष्ट्यर्थं सुमनस्यपि ।। २५६

लोहितायां वशीकारे धूम्रायां मारणादिषु ।
सर्वसिद्ध्यै स्फुलिंगिन्या मणिमा द्यर्थसिद्धये ।। २५७

विश्वरूप्यां हुते ब्रह्मन्! वह्निभेदमितश्शृणु ।

अग्निभेदः

नित्याग्नि र्वृद्ध इत्युक्त उत्सवाग्नि र्युवाभवेत् ।। २५८

दीक्षाशांति प्रतिष्ठादौ बालाग्निरभिधीयते ।
अरण्यां मथितोवह्नि र्बालसंज्ञ श्चतुर्मुख! ।। २५९

सूर्यकांत शिलाजन्मा यौवनाग्निरुदाहृतः ।
वृद्धाग्नि रुच्यते ब्रह्मन्! श्रोत्रियागारसंभृतः ।। २६०

तत्तत् कर्मानुगुण्येन वह्निं ध्यात्वा विचक्षणः ।
अग्नेर्जननशांत्यर्थं द्वादशाक्षर विद्यया।। २६१

तिलानाघारसंमिश्रान् अष्टोत्तरशतं हुनेत् ।
सद्यः प्रतिष्ठितेवह्ना वष्टसंस्कार कर्मभिः ।। २६२

मूलमंत्रेण संस्कृत्य पूर्णाहुतिमथाचरेत् ।

गर्भादानादि संस्काराः

गर्भादानादि संस्कारान् आख्यास्ये शृणु पद्मज! ।। २६३

प्रत्यक्षरं तु जुहुयात् आज्येन द्वादशाहुतीः ।
कुर्वीत प्रतिसंस्कारं होमांते मूलविद्यया ।। २६४

पूर्णाहुतिं तथैवादौ संकल्पं च समाचरेत् ।
मानुषेष्वपि सर्वेषु चैवं हुत्वा ततः परम् ।। २६५

ब्राह्मणै रप्यनुज्ञातः संस्कारानुगुणक्रियाम् ।
समाप्य भोजयेत् विप्रान् पंचसंस्कारकर्मणि ।। २६६

पंचसंस्कारः

संकल्प्य प्रति संस्कारं हुत्वैवं कमलासन! ।
अंते कुर्वीत संस्कारं विष्णोराराधनात्परम् ।। २६७

निषेकाद्युपवीतांतं हुत्वैवं देशिकोत्तमः ।
जुहुयात् समिधः काळ्यां मूलमंत्रेण मंत्रवित् ।। २६८

मनोजवायां जुहुयात् प्रणवेन घृतं पुनः ।
लोहितायां हुनेदन्नं वासुदेवाख्यविद्यया ।। २६९

धूम्रायां जुहुयाल्लाजं संकर्षण मनूत्तमात् ।
हुनेत्तिलं स्फुलिंगिन्यां गुरुः प्रद्युम्न विद्यया ।। २७०

अनिरुद्धाख्यमंत्रेण विश्वरूप्यां पयस्ततः ।
कराळिकारसज्ञायां पुंसूक्त र्ग्भिस्तु माक्षिकम् ।। २७१

प्रतिजिह्वं प्रतिद्रव्यं जुहुयात् षोडशाहूतीः ।
पूर्णाहुतिं ततः कुर्यात् अग्नि मंत्रेण देशिकः ।। २७२

अग्निं तं गंधपुष्पाद्यैः अर्चयित्वा ततःपरम् ।
अदितेत्यादिभिः मंत्रैः प्रासावी रावसानिकैः ।। २७३

परिषिच्य ततो देवयजनार्थं प्रदक्षिणम् ।

अग्नावाराधनम्

परिषिच्यास्त्रमंत्रेण वह्निमध्ये ततो गुरुः ।। २७४

जुहुयात् योगपीठार्थं आधारादि यथापुरम् ।
आज्येन तत्र देवेशं हृदयादवतारयेत् ।। २७५

चिद्घनं परमानंदस्वरूपं तेजसांनिधिम् ।
सान्निध्य याचनं कुर्यात् यावद्याग स्समाप्यते ।। २७६

अर्घ्यादि जुहुयादग्नौ नैवेद्यांतं सकृत् सकृत् ।
जपार्थमपि कुर्वीत सकृद्धोमं तु सर्पिषा ।। २७७

समित्पुष्पादिभि स्सर्वैः जपार्थं जुहुयात् सकृत् ।
मंत्रैश्च परिवाराणां सर्पिषा जुहुयात् सकृत् ।। २७८

प्रतिष्ठादौ

अग्नावाराधनं त्वेतत् प्रतिष्ठादौ परत्र चेत् ।
वक्ष्यमाणेन विधिना जुहुयात् समिदादिभिः ।। २७९

नियम स्समिदादीनां पूर्वमेव मयोदितः ।
सहस्रं वा शतं वाऽथ यद्वार्थं तद्दळं चरेत्।। २८०

द्वादशाष्टौ च चत्वारः समिद्धोमः प्रशस्यते ।
घृताक्तैरेव कुर्वीत होमं तु समिदादिभिः ।। २८१

ऋग्भिः पुरुषसूक्तस्य षोडशान्नाहुति र्भवेत् ।
आज्यसिक्तेन चरुणा दर्व्या वा ग्रासमुद्रया ।। २८२

होमोन्नस्य प्रशस्तस्स्यात् आज्यहोम स्ततःपरम् ।
यावानासीत्समिद्धोम आज्यहोम स्तथा मतः ।। २८३

आज्यहोमः स्रुवेण स्यात् यथायोगमितःपरम् ।
कुर्वीत स्विष्टकृद्धोमं कुसुमाद्यै श्चतुर्मुख!।। २८४

अंगुष्ठमात्रं पुरुषं ध्यात्वा वह्नौ गुरु स्स्वयम् ।
अर्घ्यादिभि स्समभ्यर्च्य पूर्णाहुति मथाचरेत् ।। २८५

पूर्णाहुतिः

स्रुवेण सर्पिस्स्रुग्गर्ते निक्षिप्य तदनंतरम् ।
कुक्कुटांडप्रमाणं तु चरुपिंडं घृताप्लुतम् ।। २८६

निक्षिप्य च स्रुचो गर्ते अभिघार्य स्रुवेण च ।
ससमिद्दर्भकुसुमं सर्पिषाथ स्रुवेण च ।। २८७

अभिघार्य च तद्गर्तमपिधाय स्रुवेण च ।
नासिकाग्रांत मुद्धृत्य जुहुया न्मूलविद्यया ।। २८८

एवं पूर्णाहुतिं हुत्वा स्वात्मनोऽग्रे स्रुवं न्यसेत् ।
आज्यस्थालीं तस्य याम्ये विन्यसेत् स्रुच मुत्तरे ।। २८९

उदगग्रं ततो बर्हिः कराभ्यां ग्राहयेत् गुरुः ।
बर्हिषो मूलमध्याग्रान् आज्यपात्र स्रुवस्रुचि ।। २९०

एवं त्रिस्स्पर्शयित्वाथ कुंडमध्ये नियोजयेत् ।
नात्यग्रं प्रहरेद्बर्हिः परिधीन् प्रहरेत् ततः ।। २९१

मध्यमं परिधिं पूर्वं ततस्तदितरौ सकृत् ।

प्रायश्चित्तम्

प्रायश्चित्तार्थ माज्येन पंचोपनिषदा ततः ।। २९२

प्रतिमंत्रं च पूर्वोक्त संख्यया जुहुयात् ततः ।
स्रुच माज्येन संपूर्य सदर्भं समिधान्वितम् ।। २९३

अंगुष्ठमात्रं पुरुषं ध्यात्वा वह्नौ गुरुः स्वयम् ।
उद्धृत्य नासिकाग्रांत मभिघार्य स्रुवेण च ।। २९४

जुहुया न्मूलमंत्रेण पूर्णाहुत्या च साधकः ।

प्रणीताजल प्रोक्षणम्

आत्मनोग्रे कुशे स्थाप्य प्रणीतां प्रोक्षणीजलम् ।। २९५

तस्यां संयोज्य तदनु प्रणीतापात्र वारिभिः ।
महीं पूर्वदि सोमांतां सेचयित्वाऽधरांबुना ।। २९६

स्वात्मानं प्रोक्षयेत् ब्रह्मन्! ब्रह्मोद्वासन माचरेत् ।
स्रुवं जलेन संपूर्य कुंडस्य परितस्सकृत् ।। २९७

प्रादक्षिण्यक्रमेणैव परिषेचनमाचरेत् ।
शेषेणात्म शिरः प्रोक्ष्य वह्निस्थं परमेश्वरम् ।। २९८

समर्प्य हृदयांभोजे तिलकं कुंडभस्मना ।
कृत्वा शिरसि देवेशं अथार्घ्यादिभि रर्चयेत् ।। २९९

भक्त्या यदग्नौ विहितं यथाशक्ति यथाविधि ।
आराधनं त्वं देवेश! गृहाण परमेश्वर! ।। ३००

इति संप्रार्थ्य देवेशं तस्य पादारविंदयोः ।
समर्प्य हवनं पश्चात् देवनित्योत्सवं चरेत् ।। ३०१

नित्यहोमेषु परिधीन् बहिर्दिक्षु न दापयेत् ।

नित्योत्सवः

एवमग्नौ समाराध्य नित्योत्सवमथाचरेत् ।। ३०२

सौवर्णं राजतं ताम्रं पात्रं तंडुलपूरितम् ।
कर्मार्चा पुरतः स्थाप्य पद्मं द्विरसपर्णवत् ।। ३०३

विलिख्य तत्र मूलेन मूलादावाहये द्धरिम् ।
श्रीवत्साद्या द्वादश च शक्तीः पर्णेषु पूजयेत् ।। ३०४

एवं प्रतिदिनं प्रातरेवं मध्यं दिने यदि।
अंतेनैवं तत स्सायं कुसुमैः कमलासन! ।। ३०५

मंदिरं देवदेवस्य परिक्रम्य बलिं क्षिपेत् ।
प्रत्यहं त्रिर्बलिं दद्यात् यद्वा कालद्वयं चरेत् ।। ३०६

एकवारं बलिं दद्यात् यद्वा मध्यंदिनेऽन्वहम् ।
परिक्रम्य तु सर्वार्थं बलिदानं समाचरेत् ।। ३०७

नित्योत्सवप्रतिकृते रन्वग्रे वा बलिं क्षिपेत् ।
विनैव बलिदानेन नोत्सवोऽभ्युदयावहः ।। ३०८

महावातादि संक्षोभे न नित्योत्सव माचरेत् ।
चंडप्रचंडयोरेव बलिं दत्वा विचक्षणः ।। ३०९

तत्रैव सर्वभूतेभ्यो बलिदानं समाचरेत् ।

बलिदान विधिः

परिचारक माहूय भावितं गरुडात्मना ।। ३१०

पात्रं तन्मूर्ध्नि विन्यस्य सर्वालङ्कारसंयुतम् ।
तत्तन् मंत्रै र्बलिं दद्यात् प्रणवादिनमोंतकैः ।। ३११

तोयपूर्वोत्तरं दद्यात् अयं बलिरिति स्वयम् ।
चंडप्रचंडावारभ्य महापीठावसानिकम् ।। ३१२

प्रतिष्ठोक्त विधानेन बलिं दद्यात् विचक्षणः ।

वाद्यादिविधिः

प्रथमावरणे दद्यात् भेर्या केवलया बलिम् ।। ३१३

द्वितीयावरणे दद्यात् सुषिराद्यै स्सहानया।
तृतीयावरणे दद्यात् ताळमद्दळसंयुतम् ।। ३१४

मर्यादायां बलिं दद्यात् नृत्तगीतादिभि स्सह ।
मर्यादायां महत्यां तु सर्ववाद्यैस्सह क्षिपेत् ।। ३१५

सर्वत्र वेदघोषेण बलिदानं प्रशस्यते ।

महोत्सवे बलिदानविधिः

महोत्सवे प्रवृत्ते तु तत्र नित्योत्सवे कृते ।। ३१६

सद्मनो यागसंज्ञस्य द्वारे चंडप्रचंडयोः ।
दत्वा गर्भगृहं द्वारे तत्र चंडप्रचंडयोः ।। ३१७

प्रतिष्ठोक्तप्रकारेण ततः कृत्वा यथाक्रमम् ।
सर्वावरणभूदेशं परिक्रम्य ततो गुरुः ।। ३१८

ग्राममध्यं समासाद्य तत्र ब्रह्माणमर्चयेत् ।
दिक्षु सर्वासु चैंद्रादीन् अभ्यर्च्य बलिमाचरेत् ।। ३१९

संति चेत्तत्र पीठानि बलिं पीठोपरि क्षिपेत् ।
पीठाभावे बलिं दद्यात् देशिक स्थ्संडिलोपरि ।। ३२०

महामर्याद वाद्यानि ग्रामबल्यां चतुर्मुख! ।
सर्वत्र धूपदीपाद्यैः बलिदानं समाचरेत् ।। ३२१

शेषं सर्वं बलिद्रव्यं महापीठोपरि क्षिपेत् ।

नित्योत्सवबेराणि

नित्योत्सवार्चाभावे तु चक्रेणैव परिक्रमेत् ।। ३२२

तदभावे केवलया भेर्या वा कमलासन! ।
सर्वत्र क्षाळिते पीठे बलिदानं पुरोदितम् ।। ३२३

महापीठं परिक्रम्य बिंबै स्साकं गुरूत्तमः ।
मंदिराभिमुखं बिम्बं स्थापयित्वा ततः परम् ।। ३२४

सर्वेभ्यः पार्षदेभ्योऽपि पीठोपरि बलिं क्षिपेत् ।
तत स्तद्बिम्ब मर्घ्याद्यैः अर्चयित्वा निवेद्य च ।। ३२५

यथापुरं ततो बिम्बं शक्तिं मूले निवेशयेत् ।
इत्यवादीत् स्वयं देवः ततो देवमयाचिषम् ।। ३२६

उच्यतां भगवन्मह्यं प्रतिष्ठाविधिरुत्तमः ।
इत्युक्त स्स प्रभुः प्राह प्रतिष्ठाविधिमुत्तमम् ।। ३२७

गुह्यात् गुह्यतरं वक्ष्ये तदेतदवधारय ।। ३२८

इति श्रीपांचरात्रे श्री विष्णुतिलके ब्रह्मोपदेशे
पुण्याहादिविधिर्नाम पंचमोऽध्यायः

अथ मन्दिरनिर्माणाध्यायो नाम
षष्ठोऽध्यायः

प्रत्यक्षे जायते जन्तुः कंचित्कालं विभाति च ।
तत स्तं पुरुष श्रेष्ठं अपृच्छन् मुनिसत्तमाः ।। १

विष्णुसान्निध्य सिध्यर्थं बिम्बानां स्थापनाय च ।
कुर्यान्मंदिर निर्माणं भूतले सर्वसिद्धिदे ।। २

सर्वसिद्धिप्रदं देशं पूर्वमालोक्य तत्परम्।
आलयादि विनिर्माय तत्र देवं समर्चयेत्।। ३

आचार्यवरणम्

आचार्यं वरयेत् पूर्वं यद्वशास्सकलाः क्रियाः।
चातुर्वर्ण्य श्शुचिर्दक्षो महोत्साहः प्रसन्नधीः।। ४

दाता गुणाधिक श्श्रीमान् धनधान्यसमृद्धिमान् ।
आलयादि विनिर्मातुं शक्तो नान्य श्चतुर्मुख!।। ५

प्रसूतं सत्कुले शुद्धं ब्राह्मणं मंत्रवेदिनम्।
वेदवेदाङ्ग तत्त्वज्ञं पंचरात्रकृतश्रमम्।। ६

दीक्षितं पंचरात्रोक्त वर्त्मना वृद्धसेविनम्।
भगवद्ध्याननिरतं शास्त्रवश्यं महामतिम्।। ७

पठतं सततं मंत्रान् जगत्कल्याण कारिणम् ।
आचार्यं वरयेदादौ यदधीना हि सिद्धयः ।। ८

परार्थयजनं कर्तुं मध्यमाश्रमिणौ मतौ ।
नाद्यंताश्रमिणौ ब्रह्मन्! प्रतिष्ठोत्सवकर्मसु ।। ९

आचार्यगुणसम्पन्नान् ऋत्विजो वरयेत् ततः ।
ग्रामादि स्थापने योग्या या मही तां विलोकयेत् ।। १०

दैवज्ञेन सहाचार्यो निमित्तानपि लक्षयेत् ।
शुभे निमित्ते संदृष्टे ग्रामादीनारभे त्ततः ।। ११

भूपरीक्षा

देशिको रथकारेण सर्वां भूमिं परीक्षयेत् ।
सुपद्मा भद्रका पूर्णा धूम्राश्चेति चतुर्विधा ।। १२

सुपद्मा शांतिदा ब्रह्मन्! भद्रा तु सुखदा सदा।
जगतां पुष्टिदा पूर्णा धूम्रा तु क्षयकारिणी ।। १३

पुष्पाग फलवृक्षाढ्या नारिकेळ समावृता ।
कुश पद्म तुलस्याढ्या प्रागुदक् स्रवणा सदा ।। १४

एषा सुपद्मा विहिता भद्रका लक्षणं शृणु ।
फलक्षीर द्रुमयुता नदी सागर पार्श्वगा ।। १५

उद्यानोपवनोपेता व्रीहिगोधूमशालिनी ।
अंतर्जला च कथिता भद्रका कमलासन! ।। १६

श्यामाक कोद्रवयुता भूरिनिष्पावकुंकुमा ।
गिरिंगता प्रभूतांबुः पूर्णेति खलु वक्ष्यते ।। १७

यवार्कस्नुहिवेण्वाद्यैः श्लेष्मातक विभीतिकैः ।
घनशर्कर सङ्कीर्णा वायसगृध्रसंकुला ।। १८

सोषरा प्रोच्यते धूम्रा तासु श्रेष्ठादि लक्षयेत् ।
तत्र कांचिद्भुवं खात्वा जानुदघ्नं पुन स्तथा ।। १९

मृदैव पूरये च्छ्वभ्रं मृच्छेषे तूत्तमा मही ।
समे तु मध्यमा भूमिः न्यूने भू रधमा मता ।। २०

वर्जयित्वाधमां धीमान् शालिबीजादि निक्षिपेत् ।
आत्त्रिरात्रेंऽकुरे जाते सोत्तमा धरणी मता ।। २१

आपंचरात्रे मध्या स्यात् जघन्यास्यादितःपरम् ।

प्रवेशबलिः

यत्र प्रशस्यते भूमि स्तत्र वास्तु प्रकल्पयेत् ।। २२

ब्राह्मणै रथकारेण वेदवाद्यादि मंगळः ।
वास्तु भूमिं परिक्रम्य दिक्षु सर्वासु देशिकः ।। २३

ब्राह्मणे च बलिं दद्यात् भूत प्रेतापनुत्तये ।
पायसान्नेन कुर्वीत बलिदानं विचक्षणः ।। २४

भूताः पिशाचा नागाश्च असुरा राक्षसा ग्रहाः ।
सर्वे तेऽप्यपगच्छंतु बलितुष्टा यथातथम् ।। २५

देवानां च द्विजानां च स्थानं सम्यक्करोम्यहम् ।
वासुदेवस्य देवस्य सर्वभूतात्मकस्य च ।। २६

आभिरेव हि गाधाभि र्बलिं दत्वा विचक्षणः ।
सिद्धार्थान् दिक्षु सर्वासु विकीर्य तदनंतरम् ।। २७

सूत्रनिपातः

प्रागग्रं दश सूत्राणि निपात्योदङ्मुखं तथा ।
स्थानानि तत्र भूयासुरेकाशीति चतुर्मुख! ।। २८

ब्राह्मं तु मध्यमं विद्धि परित स्तस्य दैविकम् ।
पैतृकं परितस्तस्य पैतृका न्मानुषं स्मृतम् ।। २९

परितो मानुषस्यापि पैशाचो भाग इष्यते ।
निपातनार्थं सूत्राणां तत्र तत्र गुरूत्तमः ।। ३०

स्थापयित्वा बहून् शंकून् सूत्रपातं समाचरेत् ।
सूत्रसंधिषु सर्वत्र शंकुस्थापन माचरेत्।। ३१

वास्त्वाराधना

कुर्यात् सूत्रनिपातांते वास्तुनाथ समर्चनम् ।
अधोमुखं प्राक् शिरसं विन्यसेत् वास्तु पूरुषम् ।। ३२

प्रसार्य हस्तौ पादौ द्वौ कोणभूमिषु कल्पितम् ।
एवं ध्यात्वाऽर्चयेत् तत्र वास्तुनाथं विचक्षणः ।। ३३

तस्य दक्षिणपार्श्वे तु वास्तुहोमं समाचरेत् ।
समिच्चरु घृताहुत्याः परं पूर्णाहुतेः पुरा ।। ३४

रक्षःपिशाचनागेभ्यः समिद्भि र्जुहुयात् पृथक्।
जुहुयान्मूलमन्त्राभ्यां पृथगष्टोत्तरंशतम्।। ३५

हुत्वा वास्त्वीशमन्त्रेण पृथगष्टोत्तरंशतम्।
ततः पूर्णाहुतिं हुत्वा लोकपालबलिं क्षिपेत्।। ३६

दैवे च पैतृके भागे द्विजातिसदनं मतम्।
मानुषे देवधिष्ण्यानि दिक्षु प्रागादिषु क्रमात्।। ३७

पैशाचभागं संत्यज्य शूद्रादिसदनं मतम्।
शूद्राणां प्रतिलोमानां न वास्तु र्न च देवता।। ३८

यदि स्यादविवेकेन राजराष्ट्रक्षयावहः।

ग्रामादिः

ब्राह्मे भागे मम गृहं सर्वावरणसंयुतम्।। ३९

वसंति ब्राह्मणा यत्र स ग्रामः परिकीर्तितः।
यत्र स्यात् क्षत्रियावासः नगरं तदुदाहृतम्।। ४०

निवसंति विशो यत्र पत्तनं तत् प्रचक्षते ।
स्थापयेत् किंचिदीशान वदनं ग्रामवास्तु तत् ।। ४१

गर्भन्यासः

ग्रामस्य गर्भविन्यासं ब्राह्मे भागे समाचरेत् ।
पुराणां गर्भविन्यासः प्राच्यामैन्द्रे समीरितः ।। ४२

पत्तनस्य तु कौबेर्यां गर्भन्यासः प्रशस्यते ।
ग्रामस्य गर्भविन्यासं द्विजस्थापनतः पुरा ।। ४३

गर्भन्यासे कृते पश्चात् शयीत सदने द्विजः ।
द्विजस्थापनतः पश्चात् वास्त्वीशान् स्थापयेत् गुरुः ।। ४४

वास्तुदेवाः

मां स्थापयेत् ग्राममध्ये पञ्चमूर्तिमयं हरिम् ।
पञ्चमूर्तिमयं यद्वा ह्येकमूर्तिं समर्चयेत् ।। ४५

संहार योग शयनौ नृसिंहं विश्वरूपिणम् ।
जामदग्न्यं नार्चयेयुः ग्राममध्ये चतुर्मुख! ।। ४६

प्राच्यां समर्चयेत् सूर्यं आग्नेयां काममर्चयेत् ।
कार्तिकेयं यजेत् याम्ये नैर्ऋते तु गजाननम् ।। ४७

ग्रामादे वारुणे भागे वासुदेवं समर्चयेत् ।
निषिद्धा ग्राममध्ये या मूर्तयो मम पद्मज! ।। ४८

सा पूज्या प्रतिमा तत्र यद्वा सौम्या निकेतने ।
अथ वा वारुणे ब्रह्मन्! महालक्ष्मीं समर्चयेत् ।। ४९

मारुतेऽभ्यर्चयेत् दुर्गां सौम्ये धनदमंदिरम् ।
ईशाने शंकरस्थानं तत्र शंकरमर्चयेत्।। ५०

आग्नेय्यां तु महामोटीं ग्रामात् दूरे प्रकल्पयेत् ।
शास्तारं नैर्ऋते दूरे तथैव परिकल्पयेत् ।। ५१

ग्रामस्योत्तर दिग्भागे किंचिद्दूरे तु मातरः ।
उदङ्मुखा अर्चनीया यद्वैशान्यां समर्चयेत् ।। ५२

सूत्रपातेषु शूलेषु सूत्रसंधिषु मूर्धनि ।
वीध्यग्रेषु न कर्तव्यं देवस्थानं चतुर्मुख! ।। ५३

गृहाश्च नैव कर्तव्या स्तत्र वंशर्धिमिच्छताम् ।

द्वाराणि

ब्राह्मे मम गृहद्वारं प्राङ्मुखं पुष्टिवर्धनम् ।। ५४

औत्तरं धनदं विद्धि शुभदं पश्चिमाननम् ।
मोक्षदं दक्षिणद्वारं यथाकामं प्रकल्पयेत्।। ५५

प्रत्यग्द्वारं गृहं प्रोक्तं कुसुमायुधसूर्ययोः ।
स्कंदवारणवक्त्र श्रीविष्णुदुर्गांतवेश्मनाम् ।। ५६

वेश्मनो धनदस्यापि प्राग्द्वारं परिकल्पयेत् ।
शंभोऽस्तु दक्षिणद्वारं मोटीं शास्तारमेव च ।। ५७

प्राग्द्वारायतने स्थाप्य पूजयेत् कमलासन!।
संहारशयनाद्या श्चेत् मूर्तयो वारुणे मम ।। ५८

मंदिरं तदुदग्द्वारं ग्रामप्रेक्षं न कारयेत्।
सर्वत्र मम कुर्वीत सौम्यमूर्तेर्निकेतनम्।। ५९

विष्णुं च विष्णुभक्तांश्च दुर्गां भागवतोऽर्चयेत्।

पूजकाः

पंचसंस्कारदीक्षावान् पंचरात्रपरायणः ।। ६०

शिवं सूर्यं च मदनं सुब्रह्मण्यं धनेश्वरम् ।
गणेशं च क्वचित् दुर्गां शिवविप्र स्समर्चयेत् ।। ६१

महामोटीं च शास्तारं तथा वै सप्तमातरः ।
सूत एवार्चयेत् ब्रह्मन्! शास्तारं वा शिवद्विजः।। ६२

श्रेणयः

इतो बहिः प्रकुर्वीत वृषळानां निकेतनम् ।
ग्रामा द्बहिस्तथा प्राच्या मनुलोम निकेतनम् ।। ६३

दक्षिणस्यां तथा ग्रामात् प्रतिलोमनि केतनम् ।
श्रेणीनामपि सर्वेषां बहिश्चंडाळवाटिका ।। ६४

ग्रामस्य दूरे संकल्प्या ग्रामाद्दूरे तथोत्तरे ।

श्मशानम्

श्मशानं कल्पयेत् ब्रह्मन्! बहूदकनिषेवितम् ।। ६५

तीर्थस्य दक्षिणे देशे द्विजानां दहनं मतम् ।
सर्वेषां प्रतिलोमानां दाहः प्राच्यां विधीयते ।। ६६

शूद्राणा मनुलोमानां दाहोदीच्यां जलाशयात् ।

तटाकम्

याम्ये तटाकं कुर्वीत स्नानाद्यर्थं चतुर्मुख! ।। ६७

एवं यः कुरुते ब्रह्मन्! ग्रामादि कमलासन!।
स पुमान् मुक्तिमाप्नोति नात्र कार्या विचारणा ।। ६८

एवं ग्रामादि निर्माय ब्राह्मे मंदिरसिद्धये ।

कर्षणविधिः

कर्षणार्थं बलिं दद्यात् पूर्वोक्ते नैव वर्त्मना ।। ६९

यक्षाः पिशाचा नागाश्च येऽत्र तिष्ठंति सर्वदा ।
सर्वे प्रयांतु तेऽन्यत्र विष्णो स्स्थानं करोम्यहम् ।। ७०

इति मंत्रेण सिद्धार्थान् सर्वदिक्षु विकीरयेत् ।
वास्तुपूजां च होमं च बल्यंतं सम्यगाचरेत् ।। ७१

वक्ष्यमाणेन विधिना हलेन विलिखेत् गुरुः ।
वृषभौ कपिलौ रक्ता वलाभे बलशालिनौ ।। ७२

क्षाळयित्वा खुरं शृंगं मण्डयेत् कनकादिभिः ।
ब्राह्मणो यजमानश्चे त्पालाशं स्याद्धलं युगम् ।। ७३

नैय्यग्रोधं क्षत्रियश्चेत् प्लाक्षं विट् शूद्रयो र्द्वयोः ।
अलाभे सर्ववृक्षाणां नैय्यग्रोधो विशिष्यते ।। ७४

सौवर्णकौशिको योक्त्रं राजतं ताम्रमेव वा ।
कशाधनुर्ज्ये वीरण्यौ कुशरज्जुमयेऽथ वा ।। ७५

हलं च हलभूतं च एकयोन्या प्रकल्पयेत् ।
स्नातो नवांबरधरः सर्वालंकार संयुतः ।। ७६

प्रक्षाळ्य पादौ पाणी च कृताचामस्स्वयं गुरुः ।
प्राणायामत्रयं कृत्वा भूतशुद्धिं समाप्य च ।। ७७

ब्राह्मणैरप्यनुज्ञातः शुद्धपुण्याह वारिभिः ।
प्रोक्षयेद्वृषभस्कंधे लांगलं च युगं ततः ।। ७८

युगं हले च संयोज्य सुमुहूर्ते प्रणादिते ।
भेर्यादिवाद्ये विप्रेषु शाकुनादि पठत्स्वपि ।। ७९

गुरु स्स्वहृदये देवं ध्याय न्नारायणं हरिम् ।
दंडं प्रवयनं कृत्वा नैय्यग्रोधादि भूरुहाम् ।। ८०

पश्चात्तोदन मादाय पीडयेत् हुंफडादिना ।
प्राङ्मुखो मूलमंत्रेण प्रथमं कर्षये द्भुवम् ।। ८१

पौरुषेणैव सूक्तेन द्वितीयमपि कर्षयेत् ।
तृतीयं विष्णुसूक्तेन विष्णुगायत्रिया ततः ।। ८२

नारायणानुवाकेन पंचमं कर्षणं मतम् ।
पंचोपनिषदा षष्ठं भूमिसूक्तेन सप्तमम् ।। ८३

प्रादक्षिण्येन कृत्वैवं दक्षिणोत्तरतो लिखेत् ।
आचार्यस्य मन स्तुष्टिः कर्षणे यदि जायते ।। ८४

यजमानस्य धाम्नश्च शर्मणे तद्विपर्यये ।
असुखाय तत श्शांतिं दुर्निमित्ते समाचरेत् ।। ८५

आचार्य ऋत्विजामंते दद्याद्गो भूमिदक्षिणाः ।
ततः कृत्वालवालानि बीजान्युप्त्वाऽथ सेचयेत् ।। ८६

सस्ये भूरिफले मध्ये जघन्ये शृणु पद्मज! ।
दीर्घमध्याल्पकालेन वर्तते धाम तद्धरेः ।। ८७

भवेत्तथैव सान्निध्यं सहस्रं चाग्रजन्मनाम् ।
भोजयित्वा तोषयित्वा पंचोपनिषदा ततः ।। ८८

कुंभविन्यासविधिः

पंचगव्येन तत्क्षेत्रं प्रोक्ष्य कुद्दालकादिभिः ।
अंभसां दर्शनं यावत् ताव त्सम्यग्धरां खनेत् ।। ८९

भस्मांगारतुषा सत्वक्रिमिकीटादिदर्शने ।
*ततः खातात् बहिःकुंडे मूलेनाज्येन देशिकः ।। ९०

चरुणा नरसूक्तेन तिलगुग्गळुभि स्तथा ।
नीवारै र्मूलमंत्रेण खातहोमं समाचरेत् ।। ९१

पूण्याहनीरै स्संप्रोक्ष्य खाते शालीन् विनिक्षिपेत् ।
पीठं कृत्वा तदुपरि कुंभान् लोहमयान्नव ।। ९२

प्रागादीशान पर्यंतं मध्ये च स्थापयेन्नव ।
रत्नानि मध्यमे कुंभे नवाकंठं प्रपूरयेत् ।। ९३

स्वर्णादि पंचलोहानि प्रागाद्यष्टसु पूरयेत् ।
आधारशक्ति सौवर्णं मध्यकुंभे निवेशयेत् ।। ९४

कुंभमेकं तदुपरि स्वर्णैरापूर्य विन्यसेत् ।
तस्योर्ध्वमपि विन्यस्य कुंभं रजतपूरितम् ।। ९५

* शान्तिं हुत्वा ततः खातात् बहिः कुंडे मूलेनाज्येन देशिकः ।।

सौवर्णकुंभे निक्षिप्य धरणीप्रतिमां शुभाम् ।
तथारजत बिंबेऽपि न्यसेत्सौवर्ण मंबुजम् ।। ९६

सर्वान् कुंभान् गंधतोयै रापूर्य कमलासन! ।
सकूर्चपल्लवान् कृत्वा शरावै र्लोह निर्मितैः ।। ९७

पिधाय वालुकामृद्भिः खातमापूर्य वारिभिः ।
हस्तिपादै र्दृढीकृत्य पुनस्तोयेन पूरयेत् ।। ९८

कुर्युत् ग्रामादि निर्माणे विद्वांसो ब्रह्मराक्षसाः ।
तथा मंदिरनिर्माणे तत्तद्विघ्नोपशांतये ।। ९९

बालालयम्

निर्माय बालसदनं तत्र मामर्चयेत् त्सुधीः ।
त्रिहस्तं पंचहस्तं वा सप्तहस्त मथापि वा ।। १००

विस्तारो बालधिष्ण्यस्य यथाविभवकल्पनम् ।
बिंबं बालालये लोहमश्मना दारुणाथ वा ।। १०१

चतुर्हस्तं द्विहस्तं वा यजमानस्य यत्प्रियम् ।
हस्तपंचांगुळोत्सेधं उन्नत्या परमावधि।। १०२

विंशत्यंगुल मुन्नत्या ह्रसतः कमलासन! ।
यन्मानं यजमानस्य सुखदं तेन कल्पयेत् ।। १०३

जले वा मण्डपे वापि तद्बिंबमधिवासयेत् ।
बालसद्मानुगुण्येन वेदीं तत्र प्रकल्पयेत् ।। १०४

अंकुरार्पण कर्मादि ह्यधिवासे निवर्तिते ।
शाययित्वा ततः कुंभान् संस्थाप्य गुरुसत्तमः ।। १०५

हुत्वाऽधिवासहोमादि बिंबं तद्बालसद्मनि ।
रत्नन्यासं विना वेद्यां चतुर्थस्नपनं विना ।। १०६

मूलमंत्रेण संस्थाप्य प्रोक्षयित्वा यथाविधि ।
मंत्रा न्विन्यस्य संपूज्य प्रार्थयेद्गाधयाऽनया ।। १०७

पूजां गृह्णीष्व भगवन्! अस्मिंस्त्वं बालमंदिरे ।
शमय न्मूलधिष्ण्यस्य विघ्नकृद्दैत्य संहतिम् ।। १०८

विज्ञाप्यैवं परिक्रम्य प्रणम्य तदनंतरम् ।
चण्डप्रचण्डौ द्वारस्थौ क्षेत्रपालं खगेश्वरम् ।। १०९

द्वारे स्वदिक्षु चेंद्रादी नीशाने सैन्यनायकम् ।
गणेशं नैऋते भागे अर्चयेदशरीरिणः ।। ११०

कुमुदादिगणान् सर्वान् महापीठे समर्चयेत् ।

जीर्णोद्धारविधिः

प्रसंगा दत्र वक्ष्यामि जीर्णोद्धारं चतुर्मुख! ।। १११

ब्राह्मणान् वेदशास्त्रज्ञान् आहूय प्रणिपत्य च ।
अन्नाद्यै स्तोषयित्वा तान् प्रार्थयेत कृतांजलिः ।। ११२

पूजाबिंब मिदं विष्णोः स्थापितं पूर्वसूरिभिः ।
पूज्यमानेंगवैकल्य दूषणं चेहवर्तते ।। ११३

अस्य बिंबस्य जीर्णस्य चोद्धारं कर्तुमुद्यमे ।
आगमस्य वशात्कर्तुं व्यवसाय मुपास्महे ।। ११४

भवंतो नोऽनुजानंतु भवदाज्ञां करोम्यहम् ।
इति विज्ञाप्य तै स्सर्वै रनुज्ञातः प्रसन्नधीः ।। ११५

दूर्वाभि र्मधुयुक्ताभिः प्रासादाग्रे गुरूत्तमः ।
हुनेल्लक्षं सहस्रं वा शतमष्टोत्तरं तु वा ।। ११६

व्याहृतीभि स्ततश्शांतिं पंचोपनिषदा चरेत् ।
ब्राह्मणैस्सह पुण्याहं कारयित्वा ततो गुरुः ।। ११७

नत्वा स्वात्मगुरुं पश्चात् कल्पये द्बालमंदिरम् ।
बिंबं च लक्षणोपेतं पूर्ववत् कमलासन! ।। ११८

अंकुरा नर्पयित्वादौ कृत्वा प्रतिसरं ततः ।
जलेऽधिवास्य तद्बिंबं शय्यायामपि मंडपे ।। ११९

वेद्यां कुंभान् स्थापयित्वा सर्ग संहार माचरेत्।
हुत्वाऽधिवासहोमादि तद्बिंबं बालसद्मनि ।। १२०

वेदिकायां प्रतिष्ठाप्य गत्वा मूलगृहं गुरुः ।
स्नपनाद्यै स्समभ्यर्च्य कृत्वा प्रतिसरं ततः ।। १२१

कुर्यादाशासु सर्वासु शांतिहोमं चतसृषु ।
वक्ष्यमाणेन विधिना शक्त्याकर्षण माचरेत् ।। १२२

द्विविधस्थानम्

स्थानं मे द्विविधं ब्रह्मन्! सिद्धासिद्ध प्रभेदतः ।
मूले मूर्धनि शैलानां नदीतीरे च संगमे ।। १२३

समुद्रतीरे पुलिने ह्रदे तीर्थे च कानने ।
एतेषु निर्मितं स्थानं सिद्धाख्यं विश्वकर्मणा ।। १२४

देवादिभिरहं तत्र स्थापितश्चेत् यथाविधि ।
मनुष्यनिर्मितं ग्राम नगरादौ गृहं मम ।। १२५

असिद्धायतनं विद्धि ग्रामादि स्थितिहेतुकम् ।
उभयो स्स्थलयोरंग हान्यादौ पतनादिषु ।। १२६

धामादिचलने भेदे वक्ष्यमाणेन वर्त्मना ।
उद्वास्यावाहनं कुर्यात् वक्ष्यमाणेन वर्त्मना ।। १२७

प्रभापद्मासनादीनाम्

प्रभापद्मासनादीनां आयुधानां च पद्मज! ।
वैकल्ये चलने तेषां शक्तिं मूले नियोजयेत् ।। १२८

घटेवोद्वास्य तां शक्तिं निर्माय च यथापुरम् ।
पूर्ववद्वा समाधाय संप्रोक्ष्य च यथाविधि ।। १२९

तत्र शक्तिं पुनर्योज्य पूजयेत् पंचरात्रवित् ।
अत्यंतजीर्णे मूलादौ तच्छक्तिं पद्मसम्भव! ।। १३०

बालबिंबे समावाह्य पूजयेत् शास्त्रधर्मवित् ।

धामबिंबविषयम्

अजीर्णे ध्रुवबिम्बे तु जीर्णे धामनि पद्मज! ।। १३१

धामस्थ देवता स्सर्वा मूलबिम्बे नियोजयेत् ।
दाम्न्यजीर्णे ध्रुवे बिम्बे जीर्णे धामस्थ देवताः ।। १३२

शक्त्याकर्षणम्

नोद्वसे द्गुरु रन्यत्र चांगभंगादि वर्जिते ।
अजीर्णे नोद्वसेत् ब्रह्मन्! अन्यधा पापसम्भवः ।। १३३

कर्मार्चायास्तु पुरतः पीठे व्रीह्यादि निर्मिते ।
सोपकुम्भाष्टकं कुंभं महांतं करकान्वितम् ।। १३४

कूर्चवस्त्रापिधानाढ्यं स्वर्ण प्रतिमयान्वितम् ।
स्थापयित्वा महाकुम्भे मूलमंत्रेण देशिकः ।। १३५

मूलमूर्तिगतां शक्तिं करके च सुदर्शनम् ।
इंद्रादीनुपकुम्भेषु चावाह्याभ्यर्चये द्गुरुः ।। १३६

समुद्धृत्य ततः कुम्भान् निष्क्रामेद्देव मंदिरात् ।
मंदिरं तत्परिक्रम्य बालगेहं समाश्रयेत् ।। १३७

पुरतस्तस्य बिम्बस्य धान्यराशौ विनिक्षिपेत् ।

बालबिंब प्रोक्षणम्

पूर्वस्थापित कुंभानप्यादाय प्रोक्षयेत्पुरा ।। १३८

मंदिरान्त स्समानीत कुम्भेन प्रोक्षणं ततः ।
एवं संप्रोक्ष्य तद्बिम्बं प्रार्थये द्गाधयाऽनया ।। १३९

क्रियांतं कालमेतस्मिन् अल्पगेहे जनार्दन! ।
निवासं कुरु देवेश! कल्पिते बालमंदिरे ।। १४०

अद्य प्रभृति देवेश! द्वादशाब्दावधि प्रभो!।
त्वदन्यान् केशवादींश्च वासुदेवानुमन्यते ।। १४१

इति हृष्टेन मनसा कालं विज्ञाप्य देशिकः ।
मंत्रन्यासं ततः कृत्वा संपूज्य च यथाविधि ।। १४२

प्रासादावरणे कृत्वा बलिदानं चतुर्मुख! ।
बिंबं सम्यगलंकृत्य पुण्याहमपि वाचयेत् ।। १४३

वेदान्पठत्सु विप्रेषु गुरुः पंचांगभूषणः ।
हैमलांगल मादाय प्रविशे न्मूलमंदिरम् ।। १४४

जपन्नष्टाक्षरं मंत्रं मोचये त्पीठबंधनम् ।
विष्वक्सेन मनुध्यायन् बिम्बं निर्माल्यवत्स्मरेत् ।। १४५

बिम्बं संधानयोग्यं चेत् संधेयं कमलासन! ।
अयोग्यं तुच्छितं बिम्बं क्षितावंभसि निक्षिपेत् ।। १४६

वस्त्रैरज्जुभि राच्छाद्य व्याहृत्या कमलासन!।
पुण्यतीर्थेऽथ वा गर्ते क्षिप्त्वा मृद्भिः पिधापयेत् ।। १४७

स्नात्वा प्रासादमभ्येत्य कृत्वा पुण्याहमप्यनु ।
समंततो बलिं दत्वा देवान् गेहस्थितानपि ।। १४८

उद्वास्यात्तत्र गाश्चापि वासयित्वाथ वालुकाम् ।
खातभूमौ समापूर्य प्रासादाग्रे ततो गुरुः ।। १४९

रक्षाहोमं समाप्याथ शांतिहोमं समाप्य च ।
चतुर्थेऽहनि संप्राप्ते बालबिम्बं चतुर्मुख! ।। १५०

जीर्णोद्धारः

स्नापयित्वा चतुर्वक्त्र! जीर्णोद्धारं समाचरेत् ।
अंगभंगे रत्नजानां तप्तजांबूनदैः पुनः ।। १५१

संधेयं शैलजेष्वेवं संधाय प्रोक्ष्य पूजयेत् ।
दार्वादिपंचबिम्बाना मंगहानौ परित्यजेत् ।। १५२

अन्यत्सर्वात्मना बिम्बं स्पृष्ट्वा प्रोक्ष्य समर्चयेत् ।
अंगमात्र समाधाने सृष्टौ सर्वात्मनापि च ।। १५३

कुंभे वा बालबिम्बे वा शक्तिमारोप्य वै पुनः ।
सृष्ट्वा संप्रोक्ष्य विधिवत् पूजयेत् कमलासन! ।। १५४

त्यक्तं च लोहजं बिम्बं द्रावयित्वा पुन स्सृजेत् ।
देवे जीर्णे पुन स्सृष्टौ देव्यः प्राच्यस्सुखं स्थिताः ।। १५५

देवस्ताभिः पुनर्योज्यो नान्या देवी स्पृशेत् पुनः ।
पूजने संतते तासां नोद्वाहश्च पुनर्मतः ।। १५६

त्यक्तं बिम्बं क्षिपेद्भूमौ खात्वा यद्वांभसि क्षिपेत् ।
पुरा प्रमादाद्धामादि प्रमाणरहितं कृतः ।। १५७

कल्पयेत् सप्रमाणं तत् जीर्णोद्धारे चतुर्मुख! ।
बहुबेरैकबेरेषु यथापूर्वं प्रकल्पयेत् ।। १५८

विपरीतं न कुर्वीत कुर्याच्चेत् पापसम्भवम् ।
बहुबेरे पुरा देवो देवीभ्यां सहितो यदि ।। १५९

ताभ्यां सह विना यद्वा जीर्णोद्धारे प्रकल्पयेत् ।
सिद्धक्षेत्रे तु बिम्बादि पूर्वं लक्षणवर्जितम् ।। १६०

भूयः प्रकल्पने तद्व दन्यथा पापसंभवः ।
स्थित्वासनादिकं सर्वं कल्पनीयं यथापुरम् ।। १६१

असिद्धसदने कुर्यात् स्वच्छंदं नात्र किल्बिषम् ।
दिव्यं विमानं यद्वस्तु यन्मानं यादृशं पुरा ।। १६२

गुरु स्तद्वस्तु तन्मानं तादृशं कल्पयेत्पुनः ।
आर्षं वा मानुषं धाम मृदा वेष्टकयाकृतम् ।। १६३

भूयः प्रकल्पने तद्वत् शिलयेष्टकयाथ वा ।
पीठे पुरातने जीर्णे पीठ मन्यत् प्रकल्प्य च ।। १६४

तत्पीठे प्राक्तनं बिम्बं जीर्णोद्धारे निवेशयेत् ।
बिम्बे पुरातने जीर्णे बिम्ब मन्यत् प्रकल्प्य च ।। १६५

स्थापयेत् प्राक्तने पीठे पीठमन्य न्न कल्पयेत् ।
प्राक्तनैव प्रभा योज्या नवीना वा यथारुचि ।। १६६

प्राक्तना श्च परीवाराः सिद्धक्षेत्रे चतुर्मुख! ।
मूलबेरस्य रक्षार्थं उपपीठस्य वर्धनम् ।। १६७

न दोषाय भवेत् ब्रह्मन्! इतो वक्ष्ये शृणुष्व ह ।
सालगोपुर पीठादौ जीर्णे वा चलितेऽथ वा ।। १६८

दृढं विशालं विस्तीर्णं कल्पयेद्वा यथापुरम् ।
नद्यादिवेगनष्टं चेत् प्रासादादि तदुत्तरे ।। १६९

पूर्वस्मिन्वा यथासायं तथाभूयः प्रकल्पयेत् ।
तत्र पूर्वस्थितं बिम्बं स्थापये न्न पुन स्सृजेत् ।। १७०

मूर्तिमंत्राधिकारीणां मर्यादा यादृशी पुरा ।
पुनः प्रकल्पने चापि तादृश्येव न चान्यथा ।। १७१

पुरा प्रकल्पने यावत् ताव द्भूयः प्रकल्पने।
फलं तुल्यं तदुभयोः व्यत्यय न्नैव कारयेत् ।। १७२

अंगमात्र समाधाने बहुबेरे चतुर्मुख! ।
अंगमात्र समाधाने कर्मार्चां वेदिकोपरि ।। १७३

शाययित्वाथ शय्यायां विशेषमवधारय ।
जलाधिवास कर्मापि नेत्रोन्मीलन कर्म च ।। १७४

तत्त्वसंहारसर्गौ च त्यक्त्वान्यत् कर्मसंचयम् ।
कृत्वा संप्रोक्षणं कृत्वा देवदेवं समर्चयेत् ।। १७५

एवं बालगृहे देवं प्रतिष्ठाप्य महोत्सवम् ।
ध्वजारोहण कर्मादि पुष्पयागावसानिकम् ।। १७६

यद्वैकाह्नोत्सवं कुर्यात् प्रतिष्ठांते चतुर्मुख! ।
बालबिम्बे लोहजे तु नित्यं तेनैव कारयेत् ।। १७७

उत्सवार्थं नचेत् बिंबं बालेनैव समाचरेत्।
एवं बालं प्रतिष्ठाप्य गुरुः स्थपतिभि स्सह ।। १७८

उत्तमादि मंदिरम्

उत्तमादि त्रिधा धाम संचितादि तथा त्रिधा ।
मुख्यं शिलामयं धाम मध्यमिष्टकया कृतम् ।। १७९

अधमं दारुजं धाम हेय म्मृण्मय मुच्यते ।
द्रव्येणैकेन यद्धाम स्थूप्यंतं परिकल्प्यते ।। १८०

संचितादिधाम

तद्धाम संचितं विद्धि द्रव्ययुग्म मसंचितम् ।
कल्पितं यत्त्रिभिर्द्रव्यैः तद्विद्या दुपसंचितम् ।। १८१

चतुर्भिः कल्पितं धाम व्यामिश्रं तच्चतुर्मुख! ।
संचिता द्युत्तमादि स्यात् सन्निधानं च तादृशम् ।। १८२

द्रव्यार्जनम्

द्रव्यं न्यायेन संपाद्य मंदिरं कल्पयेन्मम ।
अदत्तं नैव गृह्णीयात् धर्मद्रव्यं न चाहरेत् ।। १८३

दूषितेन न कुर्वीत द्रव्येण मम मंदिरम् ।

मंदिर निर्माणम्

जलेन समतां वीक्ष्य खातभूमिं ततो गुरुः ।। १८४

विन्यस्य तत्र प्रकृति माधाय फलकामपि ।
राजतेन तथावापि प्रथमां शास्त्रवर्त्मना ।। १८५

संधायाथ दृढीकृत्य कारयेत् समतांजलैः ।
उपपीठं तदुपरि चाधिष्ठान मुपर्यतः ।। १८६

उपपीठं विना यद्वा चाधिष्ठानं प्रकल्पयेत् ।

एकतलम्

उपानं कल्पये दूर्ध्वं यद्वाधिष्ठान मेव वा ।। १८७

यद्वा पूर्वमधिष्ठानं पादं तत्र प्रकल्पयेत् ।
तदूर्ध्वं प्रस्तरं पश्चात् ग्रीवां च शिखरं ततः ।। १८८

एवमेकतले कुर्यात् यावत् स्थूपि चतुर्मुख! ।

द्वितलम्

द्वितले शृण्वधिष्ठानं चरणं प्रस्तरं ततः ।। १८९

कूटं शालां प्रकुर्वीत संस्थानं पंजरं ततः ।
प्रस्तरं वेदिकां ग्रीवां शिखरं च यथाक्रमम् ।। १९०

त्रितलम्

कल्पयेत् त्रितले धाम्नि चा द्वादशतलावधि ।
एवं प्रकल्पयेत् ब्रह्मन्! अथवा ऽष्टादशांगकम् ।। १९१

उपानं जगतीं कृत्वा कुमुदं पट्टिकामपि ।
कर्णं च पट्टिकां पश्चान्महतीं पट्टिकामपि ।। १९२

वाजनं वेदिका मूर्ध्वं चरणं च प्रकल्पयेत् ।
हंसमालां कपोतं च प्रतिं च प्रतिवेदिकाम् ।। १९३

कर्णं च शिखरं चेति कुर्यादष्टादशांगवत् ।
आस्थूपि यजमानस्य कुर्यात् शक्त्यनुसारतः ।। १९४

पूर्वं पदादि निर्माय पश्चात् धाम प्रकल्पयेत् ।
द्वारादि कल्पनार्थन्तु दिक्सूत्रभ्रमणं चरेत् ।। १९५

दिक्सूत्रभ्रमणम्

हस्तमानायतं शंकुं अंगुष्ठ परिणाहकम् ।
क्षीरवृक्ष समुत्पन्नं स्थापये न्मूलविद्यया ।। १९६

प्रासादमध्ये संस्थाप्य शंकुद्विगुण सूत्रतः ।
परितोमंडलं कृत्वा ततः पूर्वापराह्णयोः ।। १९७

मंडलांते लिखेत् छायां तत्र बिंदुद्वयं लिखेत् ।
तयोर्मध्ये लिखेत् बिंदुं तदारभ्य गुरूत्तमः ।। १९८

परबिंद्ववधि ब्रह्मन्! सूत्रपातं समाचरेत् ।
प्राक् पश्चिमे लिखेत् ब्रह्मन्! कच्छपानन पुच्छवत् ।। १९९

याम्ये तदुत्तरे चैवं विधाय चतसृष्वपि ।
दिक्षु शंकूंश्च संस्थाप्य तत स्सूत्राणि पातयेत् ।। २००

चतुरश्रं यथा भूयात् तथा सूत्रं निपात्य च ।
अष्टस्वसि तथाशासु शंकूनां स्थापनं चरेत्।। २०१

शंकुस्थापन वेळायां दुर्निमित्त समुद्भवे ।
देशिकः कारयेत् शांतिं तेन शांति र्भविष्यति ।। २०२

यजमानेच्छया कुर्यात् द्वारं कोणेन कारयेत्।
किंचिदीशान मालोक्य द्वारं धाम्नः प्रशस्यते ।। २०३

आसनं च स्थिति र्विष्णो श्शयनं यानमेव च ।

धामभेदः

विश्वरूपं च बिंबस्य रूपायामादिकं यथा ।। २०४

वृत्तं वृत्तायतं यद्वा चतुरश्रं तदायतम् ।
एवं चतुर्विधं ज्ञेयं प्रासादं मम पद्मज! ।। २०५

स्थित्यासनानि यानानि वृत्ते वा चतुरश्रके ।
वृत्तायते विमाने तु चतुरश्रायते तथा ।। २०६

शयनं विश्वरूपं च लोकाक्रांतं प्रकल्पयेत्।

नागरद्राविड वेसराः

नागरं द्राविडं चेति वेसरं च त्रिधा मतम् ।। २०७

विमानं मे चतुर्वक्त्र! वक्ष्ये तदवधारय ।
आस्थूपि कर्णमानांतं चतुरश्रे तदायते ।। २०८

विमानं नागरं विद्धि बह्वश्रे वा तदायते ।
तद्द्राविडमिति प्रोक्तं वृत्तेवृत्तायतेऽथ वा ।। २०९

वेसराख्यं विमानं तदुच्यते कमलासन! ।

धामविस्तारः

एकहस्तं समारभ्य दशहस्तांत मब्जज! ।। २१०

धामादि कल्पयेत् सम्यक् भुक्तिकामनया यदि ।
युग्मैर्हस्तैः प्रकुर्वीत मोक्षप्रार्थनया यदि ।। २११

ओजहस्तैः प्रकुर्वीत धाम पंचांगपूर्वकम् ।
कृत्वैवं पंचरात्रज्ञः प्रारभेत् प्रथमेष्टकाम् ।। २१२

प्रथमेष्टकाः

त्रिविधा इष्टका ब्रह्मन्! शैलकाष्टजमृण्मयाः ।
उत्तमे धाम्नि कुर्वीत शिलया प्रथमेष्टकाम् ।। २१३

मध्यमेषु विमानेषु मृण्मयीं प्रथमेष्टकाम् ।
सुपक्वेष्टकया कुर्यात् मध्यमे प्रथमेष्टकाम् ।। २१४

अधमे धाम्नि कुर्वीत काष्ठेन प्रथमेष्टकाम् ।
आमेष्टकामयीं हेये कारयेत् प्रथमेष्टकाम् ।। २१५

द्रव्यसंकर धामादौ यन्मुख्यं द्रव्यमुच्यते ।
तेनैवमुख्यद्रव्येण कारयेत् प्रथमेष्टकाम् ।। २१६

शिलया दारुणा यद्वा कारयेत् प्रथमेष्टकाम् ।
शिलां दार्वपि गृह्णीयात् तत्तत् संग्रह वर्त्मना ।। २१७

इष्टका स्ता मृण्मया श्चेत् रथकारेण देशिकः ।
इष्टकादेश मासाद्य पुण्याह मपि वाचयेत्।। २१८

मृण्मयेष्टकाः

अग्निं संस्कृत्य विधिवन्मूलेनाष्टोत्तरं शतम् ।
आज्येन चरुणा हुत्वा षोडशग्भि र्नृसूक्ततः ।। २१९

समिद्भिराज्य संख्याभि र्मूलेन तदनंतरम् ।
जुहुया न्मूलमंत्रेण पुष्पव्रीह्यादिभि स्ततः ।। २२०

उद्दिश्य पार्षदान् सर्वान् चरुणा होम माचरेत् ।
क्षेत्रपालाय भूतेभ्यो वास्त्वीशाय ततःपरम् ।। २२१

देवेभ्यश्च ऋषिभ्यश्च हुत्वाज्येन ततःपरम् ।
सप्तभि र्व्याहृतीभिश्च जुहुयात् सर्पिषा ततः ।। २२२

पूर्णाहुतिं ततः कृत्वा पार्षदादि यथाक्रमम् ।
चरुणा वास्तुनाथान्तं बलिदानं चतुर्मुख! ।। २२३

खट्वाय मिष्टकाः कुर्यात् अग्नेरुद्वासनात् परम् ।

सर्वेष्टकानां आयामविस्तारः

मुख्याहस्तसमायामा मध्यमाष्टादशांगुळा ।। २२४

षोडशांगुलमायामा जघन्या कमलासन! ।
विस्तारस्तु तदर्धेन तदर्धेन घनं मतम् ।। २२५

प्रासादानुगुणं कृत्वा पक्वापक्वं यथा दृढम् ।
षोडशस्तंभसंयुक्तं कल्पयेत् यागमंडपम् ।। २२६

इष्टकाधिवासादि

अंकुरानर्पयेत् पूर्वं ततः प्रतिसरं चरेत् ।
जलेऽधिवास्य ता स्सर्वा नयनोन्मीलनं चरेत् ।। २२७

वासुदेवादिभिर्मंत्रैः इष्टका नवभिर्घटैः ।
संस्नाप्य वेद्यां शय्यायां शाययित्वा यथाविधि ।। २२८

स्थापयित्वा ततः कुंभान् द्वारादीनर्चयेत् ततः ।
कुंभेषु परमात्मादि देवानावाह्य पूजयेत् ।। २२९

पायसं वा गुडान्नं वा कुंभानां विनिवेदयेत् ।
कुंडे वा स्थंडिलेवाऽग्निं प्रतिष्ठाप्य यथाविधि ।। २३०

समिद्भि श्चरुभि श्चाज्यै र्हुत्वा तदनु पद्मज! ।
समित्पुष्पादिभि स्सर्वैः पृथगष्टोत्तरं शतम् ।। २३१

चरुणाथ नृसूक्तेन स्पृष्ट्वा संपातसर्पिषा ।
बध्वा प्रतिसरं ताभ्यो रात्रौ दुःस्वप्नदर्शने ।। २३२

शांतिं हुत्वा प्रभातायां मुहूर्ते शोभने गुरुः ।
इष्टका स्ता स्समादाय प्रादक्षिण्येन पद्मज! ।। २३३

क्लुप्तस्य द्वारदेशस्य पादमूले तु दक्षिणे ।
इष्टकां तत्र निक्षिप्य तदारभ्य प्रदक्षिणात् ।। २३४

इष्टकाः स्थापयेत् सम्यक् सोमांतं कमलासन! ।
याम्यपश्चिमयोर्मूल मग्रं स्यादैंद्रसोमयोः ।। २३५

यथोपानादिविषयो न भवेत्तद्वदाचरेत् ।
अर्घ्याद्यै रुपचारै स्ता स्समभ्यर्च्य चतुर्मुख! ।। २३६

कुंभांबु प्रोक्षणं कुर्यादिष्टकानां यथाविधि ।
प्रादक्षिण्येन चैंद्रादि सोमांतं देवमंदिरे ।। २३७

मनुष्याणां तु मध्यांतं द्वादशाक्षर विद्यया ।
निदध्यादिष्टकाधाम्नि मनुष्यसदने यदि ।। २३८

श्रीसूक्तेनेष्टकाधानं देवीनामधिदेवता ।
उपान सदृशीः कुर्यात् इष्टकाः कमलासन! ।। २३९

उपानविषये राजराष्ट्रनाशो न संशयः ।

जलावर्त परीक्ष

पुरस्तादिष्टकान्यासात् श्वभ्रं तोयेन पूरयेत् ।। २४०

तत्र पुष्पाणि विन्यस्य जलावर्तं परीक्षयेत्।
शुभदं दक्षिणावर्तं याजमानस्य सद्मनः ।। २४१

सव्यावर्तं तदुभयो रशुभाय प्रकल्पितः ।
उदकं श्वभ्रनिक्षिप्तं सद्यश्शोषं व्रजेद्यदि ।। २४२

न समाप्तिं भजे द्धाम प्रारब्धं नात्र संशयः ।
एवं विधां निमित्तेषु शांतिं कृत्वा शुभं भवेत् ।। २४३

जलावर्तं परीक्ष्यादाविष्टकाधानमाचरेत् ।

देवागार निर्मातुः फलम्

संकल्प्य देवनिलयं करिष्यामीति मानवः ।। २४४

सर्वपापविनिर्मुक्तो नित्यवासी त्रिविष्टपे ।
निर्माय देवसदनं इह कामान् यथेच्छया ।। २४५

अंते त्रिविष्टपे भुङ्क्ते सर्वान् भोगान् न संशयः ।
संकल्प्य देवनिलयं असमाप्य मृतो यदि ।। २४६

सर्वपापात् विनिर्मुक्तो दिवि सीदति देववत् ।

गर्भन्यासविधिः

गर्भन्यासविधिं वक्ष्ये शृणुष्व कमलासन! ।। २४७

समध्यवेदिकं कृत्वा मण्डपं लक्षणान्वितम् ।
वेदिकायां धान्यपीठे कुंभान्नव निवेशयेत् ।। २४८

गन्धोदकै स्तानापूर्व मध्यकुंभे यजे न्महीम् ।
कुंभे ष्वष्टसु चैद्रांदीन् आवाह्याभ्यर्च्य देशिकः ।। २४९

सौवर्णं राजतं ताम्रं आयसं वाऽथ भाजनम् ।
द्वादशांगुळ विस्तारं आयतं तावदंगुळैः ।। २५०

चतुरंगळमुत्सेथात् चतुष्पाद समन्वितम् ।
यद्वा पादत्रयोपेतं सापिधानं चतुर्मुख! ।। २५१

वृत्तं वा चतुरश्रं वा नवगर्तसमन्वितम् ।
पुण्याहवारिणा प्रोक्ष्य क्षाळयेत् पंचगव्यतः ।। २५२

स्थापयेत् वेदिकाकुंभैः प्रागाद्यै श्चतुरानन!।
वेदिकायां पुन स्तस्यां स्थण्डिलं कल्पयेत् पुनः ।। २५३

वाससाऽथ सदर्भेण वेष्टितं गर्भभाजनम् ।
विन्यस्य स्थंडिले तस्मिन् पात्रगर्तेषु निक्षिपेत् ।। २५४

आत्मानं केशवं ध्यात्वा भाजनं वसुधां स्मरन् ।
माणिक्यादीनि रत्नानि ब्रह्मादीशावसानकम् ।। २५५

अलाभे सर्वरत्नानां वज्रं गर्तेषु निक्षिपेत् ।
अथ वा सर्वगर्तानि स्वर्णै रेव प्रपूरयेत् ।। २५६

विष्णुगायत्रियाभ्यर्च्य पात्रं कमलसंभव! ।
कुण्डे वा स्थण्डिले वाऽग्निं प्रतिष्ठाप्य यथाविधि ।। २५७

समिद्भिश्च तथाज्येन शतमष्टोत्तरं हुनेत् ।
चरुणा च नृनूक्तेन जुहुयात् षोडशाहुतीः ।। २५८

पात्रांतरे ससंपातं संगृह्य गुरुसत्तमः ।
इंद्रादिलोकपालेभ्य स्तिलाज्यचरुभि र्हुनेत् ।। २५९

भुवनेभ्यः पर्वतेभ्य स्समुद्रेभ्य स्ततः परम् ।
आदित्य वसुवायुभ्य ऋषिदेवेभ्य इत्यपि ।। २६०

शास्त्रपाताळ दिङ्नाग गणभूतेभ्य इत्यपि ।
नक्षत्रेभ्यो गृहेभ्यश्च हुत्वाऽथ गुरुसत्तमः ।। २६१

सम्पाताज्येन तत् पात्रं स्पर्शमंत्रेण सेचयेत्।
सुमुहूर्ते रजन्यां तत् वेदघोषपुरस्सरम् ।। २६२

धाम प्रदक्षिणीकृत्य प्रविशेत् गर्भमंदिरम् ।
अथ गर्भगृहद्वारि याम्यपार्श्वे त्रिथा कृते ।। २६३

स्थापयेदौत्तरे भागे पार्व्वे पादस्य भाजनम्।
ब्राह्मणो यजमानश्चेत्पट्टिकाया अथो भुवि ।। २६४

कुमुदोपरि राजन्यः कुमुदे विट्पतिर्यदि ।
शूद्रश्चेज्जगतौ गर्भन्यासं कुर्यादतंद्रितः ।। २६५

आत्मानं केशवं ध्यात्वा सर्वाभरणभूषितम् ।
गर्तेषु पूरयेत् सम्यक् गोमूत्रं मध्यमे पदे ।। २६६

चक्रं जांबूनदं किंचित् विन्यसेन्मूलविद्यया ।
महीं देवीं ततो ध्यायन् मन्त्र मेत दुदीरयेत् ।। २६७

सर्वभूतधरे कांते पर्वतस्तनमण्डिते ।
समुद्रपरिधानीये देवि! गर्भं समाश्रय ।। २६८

इति विन्यस्य तत्पात्रं पिधानेन पिधाय च ।
सुधया तद्दृढीकृत्य रक्षां कुर्यात् समंततः ।। २६९

तदा निमित्ते संदृष्टे प्रायश्चित्तं समाचरेत् ।
गर्भन्यासं पुरा कृत्वा ग्रामप्रासादकल्पनम् ।। २७०

कल्पयेत् यद्यकृत्वा तं क्षयं याता भवेत् ध्रुवम् ।
उपेताश्शिल्पिन स्सर्वे रथकारै श्चतुर्मुख! ।। २७१

उपानाद्यखिलं कुर्यु श्शिल्पशास्त्रोक्तवर्त्मना ।

मूर्धेष्टकाविधिः

कृतधाम्नो विमानाग्रे गुरु र्मूर्धेष्टका विधिम् ।। २७२

आरभेत यथा पूर्व मिष्टकाः परिकल्पयेत् ।
अंकुरार्पणकर्मांते ह्यधिवास्य यथापुरम् ।। २७३

अभिषिच्याथ हुत्वाऽथ स्पृष्ट्वा सम्पातसर्पिषा ।
सुमुहूर्तेऽथ संप्राप्त इष्टकाभि स्स्वयं गुरुः ।। २७४

आरुह्यैव विमानाग्रं पुण्याहं तत्र वाचयेत् ।
आरोपयेयुस्ता स्सर्वा ऋत्विज स्समलंकृताः ।। २७५

ऋत्विक्सहाय स्तत्रस्थो हृत्पद्मे कर्णिकोपरि ।
ध्यायन् नारायणं देवं आचार्यः प्रणवं जपन्।। २७६

आदध्यादिष्टका स्सर्वाः प्रागादि क्रममास्थितः ।
एकैकस्यां तथैकैका मिष्टकां स्थाप्य देशिकः ।। २७७

महाकुम्भोदकैः प्रोक्ष्य शेषं कर्म समापयेत् ।
स्त्री शूद्रानुनुलोमांश्च तूष्णी माधानमाचरेत् ।। २७८

पापरोगयुतान् ब्रह्मन्! पतितान् प्रतिलोमजान् ।
वर्जयेत् बल मास्थाय मूर्तिमूर्धेष्टका विधौ ।। २७९

स्थूपिकाविधिः

स्थूपिकाकील मधुना वक्ष्यामि शृणु पद्मज! ।
लोहजं दारुणं यद्वा स्थूपिकाकील कल्पनम् ।। २८०

ऊर्ध्वभूम्यंघ्रि तुलित मत्यर्थं द्विगुणं तु वा ।
वृत्तं वा चतुरश्रं वा पंचाश्रं वा प्रकल्पयेत् ।। २८१

मुमुक्षु स्स्थूपिकाकीलं युग्मैरेव प्रकल्पयेत् ।
अयुग्मै रैहिकप्रेप्सुः तत्संख्याचैक विंशतिः ।। २८२

मूर्धेष्टकाविधानेन कर्मजाल मिहाचरेत् ।
किंचित् विशेषं वक्ष्यामि तत् शृणुष्व चतुर्मुख! ।। २८३

स्वर्णानि नवरत्नानि गर्ते गर्ते विनिक्षिपेत् ।
सुमुहूर्ते तु संप्राप्ते स्थापयित्वा गुरूत्तमः ।। २८४

प्रोक्षये त्सुधया सम्यक् दृढीकरणमाचरेत् ।

स्थूपीलक्षणम्

स्थूपीं लोहमयीं कुर्यात् यद्वा दारुमयीं शुभाम् ।। २८५

शिखाकुंभं भवेत् स्वर्णं दीनारं ताम्रमेव वा ।
पैत्तळं वा प्रकुर्वीत मृण्मयं वा प्रकल्पयेत् ।। २८६

कीलस्थापन वेळायां शिखाकुंभं च विन्यसेत् ।
वृत्ते धाम्नि सवृत्तस्यात् अश्रेश्रं कमलासन! ।। २८७

स्वर्णाद्यैः पंचभिर्लोहै रत्नैः कुम्भं प्रपूरयेत् ।
घटाग्रं मुकुळाकारं यद्वा दीपसमाकृति ।। २८८

तन्मध्ये पंकजं कुर्यात् दृश्यं सर्वमनोहरम् ।
उत्तमांग विमानेषु महानासान्वितेषु चेत् ।। २८९

अग्रे संस्थापयेत् चक्रं यद्वा शूलं चतुर्मुख! ।

विमान दिङ्मूर्तिस्थापनम्

विमानस्य चतुर्दिक्षु स्थाप्यादिङ्मूर्तयस्ततः ।। २९०

प्राच्यां दिशि विमानस्य वज्रिणं वा षडाननम् ।
वराहं वासुदेवं वा श्रीधरं वा प्रकल्पयेत् ।। २९१

दक्षिणे दक्षिणामूर्तिं अथ वा पार्वतीसखम् ।
संकर्षणं वा सत्यं वा वराहं वा प्रकल्पयेत् ।। २९२

प्रतीच्यां श्रीधरं यद्वा नरसिंहं तथाऽच्युतम् ।
प्रद्युम्नमथ वा तत्र यजमानः प्रकल्पयेत् ।। २९३

उदीच्यां कल्पयेत् ब्रह्मन्! ब्रह्माणं वा धनाधिपम् ।
अनंतमनिरुद्धं वा स्वस्वलक्षण संयुतान् ।। २९४

आसीने वा स्थिते वाऽपि ध्रुवबेरे तु तादृशान् ।
शयाने ध्रुवबेरे तु आसीनानथ वा स्थितान् ।। २९५

यानारूढे ध्रुवे बिम्बे यानारूढान् प्रकल्पयेत् ।
विश्वरूपे ध्रुमे बिम्बे स्थितानेव प्रकल्पयेत् ।। २९६

इंद्रादयश्चेत् दिग्देवान् आसीनानेव कल्पयेत्।
यद्द्रव्यनिर्मितं धाम तद्द्रव्येण दिगीश्वरान् ।। २९७

तदुत्तमेन द्रव्येण यद्वा तान् परिकल्पयेत् ।
भित्तिभागस्थितानर्थाभासचित्रान् प्रकल्पयेत् ।। २९८

एकनासायुते धाम्नि दिङ्मूर्त्येका प्रशस्यते ।
नासाहीने विमाने तु नैवदिङ्मूर्ति कल्पनम् ।। २९९

सर्वेष्वपि विमानेषु कोणेष्वग्न्यादिषु क्रमात् ।
पूर्णं च पुष्कराक्षं च आनंदं नंदनं तथा ।। ३००

वीरसेनं सुषेणं च सम्भवं प्रभवं तथा ।
निर्माय स्थापयेत् तत्र विमानेष्वायतेषु चेत् ।। ३०१

पूर्णं च पुष्करं तत्र दक्षिणोत्तरनासयोः ।
विमानस्य प्रतितलं नृत्त्यद्विद्याधर स्त्रियः ।। ३०२

किन्नरोरग गन्धर्व स्त्रियः पुंसः प्रकल्पयेत् ।
कल्पये द्भगवद्बिम्बं सम्यक्तत्र चतुर्मुख! ।। ३०३

चतुर्ष्वपि च कोणेषु कल्पनीयः पदे पदे ।
वैनतेयोऽथ वा सिंह श्शिल्प शास्त्रोक्तवर्त्मना ।। ३०४

अधस्ता त्तु विमानस्याधिष्ठाने हुतभुग्दिशि ।
गजाननं तथैशाने महिषासुरमर्दनीम् ।। ३०५

दक्षिणाद्युत्तरांतासु दिग्देवाः प्रागुदीरिताः ।
तोयाधिवासनं कृत्वा मण्डपेवाधिवास्य च ।। ३०६

मुहूर्ते शोभने ब्रह्मन्! दिक्षु स्थापनमाचरेत् ।
यो यस्य वर्णश्शास्त्रोक्त स्तेनैवालेपनं भवेत् ।। ३०७

व्यत्यासे ब्राह्मणादीनां वर्णानां संकरं भवेत् ।

अर्धमंडपम्

अंतर्धामनि संपूर्णे कल्पयेदर्धमंडपम् ।। ३०८

गर्भगेहस्य यन्मानं तन्मानार्धाधिकं भवेत् ।
अर्धमंडपसंज्ञं तत् सर्वमर्धाधिकं भवेत् ।। ३०९

इतोऽधिकं वा कुर्वीत यथा विभवविस्तरम् ।
यद्वा गर्भसमं कुर्यात् अर्धाख्यं शिल्पशास्त्रवित् ।। ३१०

धरणीं सदृशीं कुर्यात् शिल्पी गर्भार्ध सद्मनोः ।
हीनेऽर्धमंडपे धाम्नः पार्श्वाभ्यां निर्गमो मतः ।। ३११

अग्रतः पृष्ठतो यद्वा निर्गमः पार्श्वसद्मनि ।

नृत्तार्धमण्डपम्

अग्रेऽर्धमण्डपं कुर्यात् विपुलं नृत्तमण्डपम् ।। ३१२

गर्भार्धमानयोरर्धं अधिकं तं प्रकल्पयेत् ।
आहोस्विद्द्विगुणं कुर्यात् यद्वा कुर्यादितोऽधिकम् ।। ३१३

उभयाभ्यां च पार्श्वाभ्यां निर्गमं तत्र कल्पयेत् ।

सोपानम्

सोपान पङ्त्कयः कार्या स्तत्र निर्गमयो र्द्वयोः ।। ३१४

युग्मान्येव प्रकुर्वीत सोपानान्यालयेषु मे ।
अयुग्मानि प्रकुर्वीरन् शिल्पिनोऽमानुषालये ।। ३१५

सोपान पार्श्वयोः कुर्यात् हस्ति हस्तं विलक्षणम् ।
द्विरदेवोह्यमानं वा रथांगं परिकल्पयेत् ।। ३१६

आस्थानमण्डपम्

नृत्तार्ध मण्डपस्याग्रे कुर्यात् आस्थानमंडपम् ।
नृत्तार्थमण्डपादर्धं अधिकं तं प्रकल्पयेत् ।। ३१७

द्विगुणं वा यथायोगं कुर्यात् आस्थानमंडपम्।
अन्यत्र यत्र कुत्रापि तन्मानं परिकल्पयेत्।। ३१८

कल्पने मण्डपादीनां इष्टकादीनि पूर्ववत् ।
मूर्धेष्टका च संस्थाप्या तथा दिङ्मूर्तयो विधे! ।। ३१९

कोणे तु गर्भविन्यासं कुर्यान्मंडपकर्मणि ।
भूपरीक्षादिकं सर्वं मंडपानां समाचरेत् ।। ३२०

कुर्यात् प्रासादवत् सर्वं आस्थानं सर्वतोमुखम् ।
द्विमुखं त्रिमुखं चैकमुखं वाऽस्थानमंडपम् ।। ३२१

गोपुराणि

विमानवत् गोपुराणि कल्पयेत् कमलासन! ।
प्रवेशनिर्गमद्वारि कुर्वीरन्प्रतिगोपुरम् ।। ३२२

गोपुरेषु प्रतितलं द्वारे द्वे परिकल्पयेत् ।
गर्भन्यासो गोपुराणां दक्षिणस्यां दिशि स्मृतः ।। ३२३

प्राकाराः

एकयोन्नतया भित्त्या वेष्टयेत् गर्भमंदिरम् ।
अंतर्मण्डप संज्ञं तत् तस्य द्वारार्थमंडपे ।। ३२४

एतदेव यया भित्त्वा विच्छिन्नं परिवेष्ट्यते ।
अंतर्हारं विदु ब्रह्मन्! तां भित्तिं पंचरात्रिणः ।। ३२५

प्रवेशनिर्गमौ मार्गौ तस्य वृत्तार्थमंडपे ।
अंतर्हारो यया भित्त्या वेष्ट्यते कमलासन! ।। ३२६

मध्यांतर्हार इत्याहुः तां भित्तिं शिल्पवेदिनः ।
आस्थानमण्डपात्तस्य प्रवेशो निर्गमस्स्मृतः ।। ३२७

विनिर्गमोस्य सर्वत्र प्रवेश श्चास्य पद्मज! ।
मध्यांतर्हार संज्ञं तत् येन कुड्येन वेष्ट्यते ।। ३२८

तन्मर्यादेति कथितं चतुर्द्वार समन्वितम् ।
महामर्यादनामास्य तद्बहि स्तद्वदुच्यते ।। ३२९

पंचैतानि चतुर्वक्त्र! प्राकाराणि हि सद्मनः ।
प्राकाराणां तु सर्वेषां उपरिष्टात् शिलादिभिः ।। ३३०

कारयेन्मंडपाकारं अधस्ताच्चरणान्वितम् ।
कुर्यात् द्वारेषु सर्वेषु गोपुराणि चतुर्मुख! ।। ३३१

कवाटस्थापन, प्रतिष्ठा च

द्वारे द्वारे प्रकल्प्येत कवाटद्वय मब्जज! ।
तत्प्रकारमिहाख्यास्ये यथाविध्यवधारय ।। ३३२

द्वारशाखा स्समानीय क्षाळये त्सर्वविद्यया ।
पुण्याहं वाचयित्वाऽथ पंचोपनिषदा गुरुः ।। ३३३

अद्भि स्संप्रोक्ष्य वासोभिः आच्छाद्य स्थंडिले ततः ।
द्वारशाखाः कवाटा वा स्थाप्य कुंभार्चनं चरेत् ।। ३३४

नवकुंभान् सकरकान् वासुदेवादि विद्यया ।
द्वारतोरणकुंभार्चापूर्वकं सर्वमाचरेत् ।। ३३५

अधिवासाह्वयं होमं निर्वर्त्य कमलासन! ।
संपाताज्येन संस्पृश्य द्वारशाखाः कवाटकौ ।। ३३६

मुहूर्ते शोभने प्राप्ते कवाटाधारकाश्मनि ।
गर्तयो रत्न विन्यासं पूर्ववत् कारयेत् गुरुः ।। ३३७

कवाटाधारशिलयो स्संस्थाप्य तदनंतरम् ।
पुण्याहं वाचयित्वाऽथ पंचगव्येन ते शिले ।। ३३८

संक्षाळ्य शोभने लग्ने कवाटौ स्थापयेत्तयोः ।
महाकुंभस्थ तोयेन कूर्चेन तदनंतरम् ।। ३३९

कारये द्देवविन्यास शाखास्वपि कवाटयोः ।
चतसृष्वपि शाखासु अधश्शांतिं च दक्षिणे ।। ३४०

वाग्देवी मूर्ध्वशाखायां लक्ष्मी मुत्तरतो रतिम् ।
कवाटे दक्षिणे ब्रह्मन्! विश्वदृक् भूतभावनौ ।। ३४१

कवाटेऽन्यत्र संस्थाप्यौ विश्ववक्त्रः प्रतापवान् ।
मत्स्यादि दशमूर्तीनां तत्रावाहनमाचरेत् ।। ३४२

वेदशास्त्रपुराणानां वेत्रेषु न्यासमाचरेत् ।
नाराचेषु त्रयस्त्रिंशत् देवतानां चतुर्मुख! ।। ३४३

ऋषीन् कीलेषु चावाह्य भूतेशं पट्टिकातले ।
कवाटकंदपट्टे तु विश्वभावन मर्चयेत् ।। ३४४

निर्माणार्थं तु बिम्बानां शिलासंग्रहणं चरेत् ।

प्रतिमाभेदलक्षणम्

तत् प्रकार मिहाख्यास्ये शृणु पंकजसंभव! ।। ३४५

रत्न लोह शिला मृत्स्ना दारु स्फटिकनिर्मिताः ।
प्रतिमा ष्षड्विधा ब्रह्मन्! तत्रापि त्रिविधां विदुः ।। ३४६

संपूर्णं निर्मितं बिंबं पूर्व पश्चिमभागयोः ।
सा चित्ररूपा विज्ञेया पूर्वभाग विनिर्मिता ।। ३४७

अर्धचित्र स्वरूपा सा पटभित्ति स्थलादिषु ।
वर्णाद्यै र्लिखिता या सा भासचित्रा चतुर्मुख! ।। ३४८

रत्नै र्विनिर्मितं बिंबं सर्वकामफलप्रदम् ।
स्वर्णराजततताम्रै स्तु लोहजं त्रिविधं भवेत् ।। ३४९

संपत्करं स्वर्णबिंबं राजती ज्ञानदायिनी ।
सौभाग्यदायिनी ताम्रा शैलबिंबे सितासिते ।। ३५०

ज्ञानवित्त यशोदायि शैलजं श्वेतमब्जज! ।
ब्रह्मणाराधनीयं तदन्यत् सर्वफलप्रदम् ।। ३५१

चातुर्वर्ण्य समाराध्यं पूज्यते पंचरात्रिभिः ।

शिलासंग्रहः

प्रशस्तं पर्वतं गत्वा शिलासंग्रहमाचरेत् ।। ३५२

तत्रापि भूगता त्याज्या दूषिता मपि वर्जयेत् ।
तपस्यंति द्विजा यत्र यत्र सिद्धा महर्षयः ।। ३५३

यत्र चंडाळ पतित प्रतिलोमादयो नराः ।
न संति क्षुद्रकर्माण स्तत्र ग्राह्या शिला विधे! ।। ३५४

यजमानानुगुण्येषु दिनेषु ब्राह्मणान् गुरुः ।
भोजयित्वाऽशिषं चापि वाचयित्वाऽथ दक्षिणाम् ।। ३५५

वितीर्य तेभ्य स्तदनु रथकारैश्च शिल्पिभिः ।
शिलासंग्रहणे योग्यं देशमासाद्य शास्त्रवित् ।। ३५६

तत्र प्रपां कारयित्वा चांकूरार्पणमाचरेत् ।
निर्माय स्थंडिलं धान्यैः कुंभान् सकरकान्नव ।। ३५७

विन्यस्य परमेष्ठ्याख्य विद्यया कूर्चपल्लवैः ।
अलंकृत्य पिधायाथ सिद्धार्धांश्चक्रविद्यया ।। ३५८

वितीर्य तांस्तु कलशान् प्रोक्ष्य पुण्याहवारिणा ।
प्रदृश्य चक्रमुद्रां च मूलमंत्रेण देशिकः ।। ३५९

मध्ये तु परमात्मानं करके च सुदर्शनम् ।
इंद्रादीनुपकुंभेषु नैवेद्यांतं समर्चयेत् ।। ३६०

समित्सर्पिः पुष्पफलदळैः पंचभिरप्यथ ।
मूलमंत्रेण जुहुयात् पृथगष्टोत्तरंशतम् ।। ३६१

चरुणापि नृसूक्तेन जुहुयात् षोडशाहुतीः ।
सर्पिषा तत्र जुहुयात् वक्ष्यमाणेन वर्त्मना ।। ३६२

वनदेवान् पर्वतांश्च गण्डशैलांस्तटानपि ।
शृंगांश्च निर्झरानब्धीन् वृक्षानप्योषधी स्ततः ।। ३६३

वनस्पतीजरायुज्यान् अण्डजान् स्वेदजानपि ।
उद्भिद स्सर्वभूतानि तिस्रोपि व्याहतीरपि ।। ३६४

समस्तया च व्याहृत्वा हुत्वा संपातमाचरेत् ।
पूर्णाहुतिं ततो हुत्वा संपातं स्पर्शविद्यया ।। ३६५

विसृज्य तस्यार शिलायां बलिदानं समाचरेत् ।
पललं रजनीचूर्णं लाजापूपे चरूनपि ।। ३६६

पयो दधि घृतं रंभाशलाटूनपि योजयेत् ।
दद्याच्च सर्वभूतेभ्यो बलिदानं चतुर्मुख! ।। ३६७

सुमुहूर्ते शिलां वीक्ष्य सिद्धार्थांश्चक्रविद्यया।
यक्षाः पिशाचा नागाश्च येऽत्र तिष्ठंति नित्यशः ।। ३६८

सर्वेतेऽप्यपगच्छंतु संनिधत्तां सदा हरिः ।
विकीर्य चेति मंत्रेण पुन स्सर्वाख्य विद्यया ।। ३६९

दद्यात् बलिं प्रतिदिशं भूतेभ्यः कमलासन! ।
पुण्याहं वाचयित्वाऽथ प्रोक्ष्य पूरुषविद्यया ।। ३७०

शिलां स्पृष्ट्वाऽथ मूलेन दत्वाऽर्घ्यं कमलासन! ।
अष्टोत्तरशतं कुर्यात् मूलमंत्रजपं गुरुः ।। ३७१

प्रासादानुगुणं कुर्यात् सूत्रपातं चतुर्मुख! ।
शिलां छिंद्यु स्स्थपतयो रथकारै स्समन्विताः ।। ३७२

छिन्ना विनिपतेत् भूमौ कोणेषु यदि तां शिलाम् ।
वर्जयेद्यदि सान्यत्र ग्राह्य सालोक्य मंदिरम् ।। ३७३

निपतेद्यदि सा ग्राह्या ता मुद्धृत्य गुरुस्स्वयम् ।
महाकुम्भाम्बुभिः प्रोक्ष्य ततः करकवारिणा ।। ३७४

परिषिच्य ततो बिम्बं कल्पयेत् कमलासन! ।
देवीनां च श्रियादीनां ब्रह्मादीनां तथैव च ।। ३७५

सर्वेषा मितरेषां च शिलासंग्रह माचरेत् ।
ब्रह्मादीनां प्रवक्ष्यामि शिलासंग्रहणे विधिम् ।। ३७६

यां यां मूर्तिं समुद्दिश्य शिलां संगृह्यते विधे! ।
तामेव मध्यमे कुम्भ इंद्रादीन् दिग्घटेषु च ।। ३७७

सुदर्शनं च करके सर्व मन्यत् पुरा यथा ।
देवीनां तु श्रियादीनां उद्दिष्टामेव मध्यमे ।। ३७८

उपकुंभाष्टके वच्मि प्रागादिषु यथाक्रमम् ।
वागीश्वरीं क्रियां कीर्तिं लक्ष्मीं सृष्टि मतःपरम् ।। ३७९

प्रह्वीं सत्यां च ब्राह्मीं च करके च सुदर्शनम् ।
यथापुरं तदितरत् तत्तन्मूर्तिं हुताशने ।। ३८०

पूर्णाहुतिं ततः कृत्वा संपातेन स्पृशेत् शिलाम् ।
शकटादिक मारोप्य कारुशालां निवेशयेत् ।। ३८१

कुर्युः प्रतिकृती स्सम्यक् शिल्पिन श्शिल्पतंत्रवत् ।
वृश्चिकादिषु मासेषु मिथुनांतेषु पद्मज! ।। ३८२

दारुसंग्रहम्

दारुसंग्रहणं कुर्यात् शिलासंग्रहणं तदा ।
शिलासंग्रहवद्देशं आसाद्य तदनन्तरम् ।। ३८३

प्रपादि बलिदानांतं शिलासंग्रहवत् चरेत् ।
आवाहनं च कुम्भेषु यजनं च हुताशने ।। ३८४

पूर्णाहुतिं ततः कृत्वा सम्पातेन स्पृशेत् तरुम् ।
वृक्षस्य निकटं गत्वा गाधामेता मुदीरयेत् ।। ३८५

कर्मणा पूर्ववृत्तेन स्थावराकारमाश्रिता ।
वृणोमि विष्णोः कर्मार्थं सर्वसम्पत्करं तव ।। ३८६

स्थावरत्व मितो गच्छ दिव्यरूप मनुत्तमम् ।
भुङ्क्ष्व भोगांश्च विपुलान् वासुदेव प्रसादतः ।। ३८७

हिनस्मि नाहं त्वां वृक्ष! किंतु मुंचामि जन्मनः ।
इति वृक्षमुपस्थाय रक्षासूत्रेण वेष्टयेत् ।। ३८८

मूलमंत्रेण तदनु पूर्वोक्त विधिना गुरुः ।
पललाद्यै र्बलिं दद्यात् वृक्षं पश्यन् इतःपरम् ।। ३८९

विकिरेदपि सिद्धार्था शेषं सर्वं पुरा यथा ।
शिल्पिन श्शिल्पशालायां बिम्बन्तु पुरुषाकृतिम् ।। ३९०

बिम्बनिर्माणम्

चतुर्भुजं वा द्विभुजं यजमानेच्छयाऽथ वा ।
आसीनं वा शयानं वा स्थितं वा यानगंतु वा ।। ३९१

त्रिविक्रमं विश्वरूपं कल्पयेयु र्यथाविधि ।
चेष्टाविकार सहितं कल्पयेयुश्च शिल्पिनः ।। ३९२

चेष्टा

शयनासन यानादि भृकुटीकुटिलादि च ।
हस्तपादप्रविक्षेप आयुधानां च धारणम् ।। ३९३

उदितास्त इमे चेष्टाः सौम्यक्रौर्यादय स्तथा ।

विकारः

विकारमिह वक्ष्यामि बिम्बानामवधारय ।। ३९४

वर्णश्च वदनाद्यंगं विकारा एवमादयः ।
निर्विकारं च निश्चेष्टं ध्यायंति प्रणवात्मकम् ।। ३९५

सिद्धाद्या उत्तमा ब्रह्मन्! तदन्ये कमलासन! ।
सविकारं सचेष्टं च ध्यायन्ति खलु पद्मज! ।। ३९६

सविकारादि निर्मेयं ततोऽर्चाबिम्बमब्जज! ।

स्थितबिंबमानम्

वक्ष्ये स्थितस्य बिम्बस्य मानं मूलस्य तच्छृणु ।। ३९७

गर्भद्वारसमं बिम्बं तदुत्तम मुदाहृतम् ।
त्रिपादं मध्यमं विद्धि द्वारार्थ मधमं विदुः ।। ३९८

स्थितस्य मूलबिम्बस्य समुच्छ्राय इहोदितः ।

आसीनबिंबमानम्

आसीनस्याद्य वक्ष्यामि तत् शृणुष्व चतुर्मुख! ।। ३९९

गर्भद्वारं त्रिधा कृत्वा भागद्वयसमुन्नताम् ।
आसीनां प्रतिमां कुर्यात् प्रकृति स्सोत्तमा मता ।। ४००

मध्यमा तत्र भागेन तदर्धेन कनीयसी ।

शयानस्य

शयानस्याद्य वक्ष्यामि प्रमाणं कमलासन! ।। ४०१

गर्भगेहांतरायामं सम्यक् षोडशधा भजेत् ।
संत्यजेत् चतुरो भागान् मूर्ध्नि द्वौ पादयोरपि ।। ४०२

अवशिष्टै श्शयानस्य दशांशै रुत्तमोन्नतिः ।
पंचमूर्ध्नि परित्यज्य पादयो स्त्रीन् परित्यजेत् ।। ४०३

अवशिष्टाष्टभीरंशै श्शयितु र्मध्यमोन्नतिः ।
पादयो श्चतुरो भागान् मूर्ध्नि षट् परिवर्जयेत् ।। ४०४

अवशिष्टषडंशैस्तु जघन्योन्नतिरब्जज! ।

यानारूढस्य

गर्भगेहोन्नतिर्यावत् तदर्धं यान मुच्यते ।। ४०५

गर्भद्वारोन्नतेरर्धं बिम्बं यानगळोपरि ।
यानारूढोन्नतिः पूर्णा तत्त्रिभागेन मध्यमा ।। ४०६

अधमा स्यात् तदर्धेन विश्वरूपविधिं शृणु ।

विश्वरूपम्

उन्नतिं गर्भगेहस्य भङ्त्वा द्वादशधोपरि ।। ४०७

भागमेकं परित्यज्य पीठे भागद्वयं तथा ।
उत्तमो विश्वरूपस्य मध्यमोन्नतिरुच्यते ।। ४०८

ऊर्ध्वं भागद्वयं त्यक्त्वा अधोभागत्रयं तथा ।
भागैस्तु समभिश्शिष्टै वैश्वीयं मध्यमोन्नतिः ।। ४०९

ऊर्ध्वं त्रयं तथाधश्च शिष्टै ष्षड्भिः कनीयसी ।

त्रिविक्रमः

लोकाक्रमणरूपस्य चैवमुन्नति रब्जज! ।। ४१०

स्थिते देवे स्थिता देव्य आसीनश्चेत् तथैव ताः ।
स्थितस्य देव्य आसीनाः आसीनस्य स्थिताऽथ वा ।। ४११

शयानादिषु देवेषु आसीना वा स्थिताऽथ वा ।
योषितां परतंत्राणां नान्या चेष्टा विधीयते ।। ४१२

यानारूढे तु देवेशे देवोत्संगगता यदि ।

देव्यः

यानारूढा स्तदा देव्यो न परत्र चतुर्मुख! ।। ४१३

द्विभुजा स्सौम्यवक्त्रा स्ताः परतंत्रेषु योषितः।
आसीना वा स्थिता यद्वा द्विभुजा देवयोषितः ।। ४१४

परतंत्रे कल्पनीयाः देवस्कंधसमुन्नताः ।
तावत्येवोन्नति ब्रह्मन्! स्वतंत्रे देवयोषिताम् ।। ४१५

यानस्कंधोपरिष्टां वा शयानां वा स्थितां तथा ।
चतुर्भुजां द्विहस्तां वा स्वतंत्रे परिकल्पयेत् ।। ४१६

शयनभेदाः

शयितु र्मूलबेरस्य शयनं तु चतुर्विधम् ।
भोगं योगं च संहारं सृष्टिसंज्ञं चतुर्मुख! ।। ४१७

अनंतभोगशयने द्विभुजो वा चतुर्भुजः ।
श्रीवत्सांकः प्रसन्नोऽस्य श्रीधरण्यो श्श्रियोऽथ वा ।। ४१८

विन्यस्योत्संगयोः पादौ सुखं शेतेऽथ वा स्वयम् ।
श्रीमह्यवयवा सा श्रीः बाहुमूलं समाश्रिता ।। ४१९

देवस्य शेषशय्यायां अर्चना पीठपार्श्वयोः ।
ब्राह्माद्या भित्तिदेशे वा गन्धर्वा देवयोषितः ।। ४२०

देवस्य भोगशयन मिदं योगाह्वयं शृणु ।
शेषे शयानो देवेशो द्विभुजो वा चतुर्भुजः ।। ४२१

श्रीवत्सांकं प्रसन्नास्यो योगमेक स्समास्थितः ।
श्रीमह्यवयवा लक्ष्मीः अर्चनापीठ पार्श्वयोः ।। ४२२

बद्धांजलिः खगेश श्च ब्रह्माद्या श्च तपोधनाः ।
परितः खलु सेवंते शयनं योगसंज्ञितम् ।। ४२३

अनंतभोगशयने बहुमस्तकमण्डिते ।
चतुर्हस्तोऽष्ट हस्तो वा भ्रुकुटी कुटिलाननः ।। ४२४

दंष्ट्राकराळवदन श्चक्राद्यायुध लांछितः ।
एक एव स्वयं शेते शयनेति भयंकरः ।। ४२५

अर्चनापीठिका पार्श्वे श्री र्वा लक्ष्मी खगेश्वरौ ।
कृतांजलिपुटौ प्रह्वौ संहारशयनाह्वयम् ।। ४२६

सृष्ट्याख्याशयनं वक्ष्ये शृणु तत्कमलासन! ।
शेषेऽश्वत्थदळे यद्वा बालभूषणभूषितः ।। ४२७

अळकै स्सुप्रसन्नास्यो बालो नीलाम्बुजप्रभः ।
पीयूषसागरे रम्ये सुखं शेते जगत्पतिः ।। ४२८

सनाळनाभी कमले ब्रह्मा बद्धांजलि र्भवेत् ।
एतत्स्यात् सृष्टिशयनं त्रिविक्रममित श्शृणु ।। ४२९

चतुर्भुजो वा द्विभुज स्सव्यं पादं महीतले ।
मस्तके सुरराज्यं च पादं सव्येतरं दिवि ।। ४३०

विन्यस्य याचते भूय स्सव्येतर करेण तम् ।
धरणीं देहि देहीति एष एव त्रिविक्रमः ।। ४३१

यानाधिरूढः

कल्पयेत् वैनतेयस्य स्कंधोपरि जगत्पतिम्।
स एव यानारूढस्स्यात् उदित श्च त्रिविक्रमः।। ४३२

द्विहस्तमेककण्ठं च चतुर्दिक्षु चतुर्मुख! ।

विश्वरूपी

वासुदेवादिवदनं प्रागादिषु यथाक्रमम् ।। ४३३

वासुदेवानना दूर्ध्वं देवानां वदनान्यपि ।
ऋषीणां वदनानि स्यु स्संकर्षण मुखोपरि ।। ४३४

प्रद्युम्न वदनादूर्ध्वं दैत्यरक्षो मुखान्यपि ।
अनिरुद्ध मुखादूर्ध्वं नागगंधर्वकिन्नराः ।। ४३५

तत्त न्मुखाना मुपरि विविधान्याननान्यपि ।
पिशाचाजगर व्याघ्र नर पक्षिमुखान्यपि ।। ४३६

क्रमेण कल्पनीयानि तत्तदूर्ध्वं पुनःपुनः ।
कंठाधोदेश मारभ्य पादांतं पुरुषःस्थितः ।। ४३७

विश्वमूर्ति रियं ब्रह्मन्! कथितः कमलापतेः ।

स्वतंत्र परतंत्र भेदः

प्रकारमिह वक्ष्यामि स्वतंत्र परतंत्रयोः ।। ४३८

कर्षणादिक्रियापूर्वं विमाने गर्भमन्दिरे ।
सर्वावरणभूयिष्ठे बलिपीठादि संयुते ।। ४३९

प्रतिष्ठित स्स्वतंत्रस्स्यात् परिवारसमेधितः ।
तदावरणशोभार्थं स्वतन्त्रावरणेषु चेत् ।। ४४०

परतंत्रं विजानीयात् ग्रामे चेत् वास्तुदेवताः ।
स्वतंत्र एव ज्ञातव्यो ग्राममध्ये प्रतिष्ठितः ।। ४४१

अन्यत्र परतंत्रस्स्यात् इतश्शृणु चतुर्मुख! ।

कर्म्मार्चादिबेराणि

कर्मार्चा चोत्सवार्चा च बल्यर्चा च तथैव च ।। ४४२

स्नानार्चा तीर्थयात्रार्चा शयनार्चेति षट् क्रमात् ।
षड्भिः प्रकृतिभिः पूजा सोत्तमा कमलासन! ।। ४४३

तिसृभिर्मध्यमा पूजा जघन्या चाद्यमा त्रया ।
एकबेरविधानेषु कर्मार्चा स्नपनाह्वया ।। ४४

नेष्यते हि तयोः कर्म मूलबेरे समाचरेत् ।
मूलबेरसमुच्छ्रायं दशधा विभजेत् पुरा ।। ४४५

कल्पयेत् एकभागेन कर्मार्चां कमलासन! ।
बल्यर्चा तीर्थयात्रार्चा शयनोत्थानकौतुकम् ।। ४४६

कर्मार्चा संमितोच्छ्रायं कल्पयेत् शिल्पवित्तमः ।
कर्मबिंबसमुत्सेधा त्रिगुण श्शिष्टयोर्द्वयोः ।। ४४७

स्नपनस्योत्सवार्धस्य प्रमाणं कमलासन! ।
स्थानयानासन विधौ ध्रुवबिंबे यथाक्रमम् ।। ४४८

कर्मार्चादीनि तद्वत् स्युः ध्रुवे तु शयने पुनः ।
तिष्ठेद्वासीत वा कामं शयनं तत्र नेष्यते ।। ४४९

नित्योत्सवार्ध बिंबे यत् सर्वत्रैव स्थितं भवेत्।
सदेविके ध्रुवे बिंबे षट् कर्मादि तथा भवेत् ।। ४५०

देवीभ्या मेकया यद्वा तानि शिल्पी प्रकल्पयेत्।
औत्सवं बिंबमथ वा देवीभ्या मेकयाऽथ वा ।। ४५१

सदेविके ध्रुवे बिंबे नौत्सवं स्याददेविकम् ।
अदेविके ध्रुवे बिंबे औत्सवं स्यात् सदेविकम् ।। ४५२

ना देविकं प्रकुर्वीत बिंबं कुत्रचि दौत्सवम् ।

द्वारपाल लक्षणम्

चतुर्भुजान्वा द्विभुजान् द्वारपालान् प्रकल्पयेत्।। ४५३

ध्रुवबेर समान्नूपैः बिभ्राणांस्तर्जनीं करे ।
कुर्यात् गर्भगृहद्वारे चंडं याम्ये तदुत्तरे ।। ४५४

प्रचंडं चाथ संकल्प्य शिल्पिभी रर्धसद्मनि ।
शंखचक्रोत्तमांगौ द्वौ अंतर्मंडल संज्ञके ।। ४५५

जय श्च विजयश्चोभौ अंतागारस्य वै शृणु ।
चतुर्षु सत्सु द्वारेषु द्वारपालानिह शृणु ।। ४५६

अंतर्हारस्य पूर्वस्य द्वारि पद्मी गदाधरः ।
दक्षिणस्यां तथा खड्ग शार्ङ्गिणौ द्वौ प्रकल्पयेत्।। ४५७

प्रतीच्यां कल्पयेत् वज्रमुसलायुध धारिणौ ।
पाशांकुशायुधधरौ उत्तरस्यां प्रकल्पयेत् ।। ४५८

मध्यांतर्हार संज्ञस्य प्राकारस्य चतुर्ष्वपि ।
धातारं च विधातारं ततो भद्र सुभद्रकौ ।। ४५९

कृतांतमसुरध्वंसं कुबेराक्षं कुबेरकम् ।
मर्यादावरणे ब्रह्मन् द्वार्षु प्रागादिषु क्रमात्।। ४६०

दुर्जयं प्रबलं विश्वभावनं पुष्पकं ततः ।
संभवं प्रभवं चापि सुशोभन सुभद्रकौ ।। ४६१

पंचमावरणे कुर्यात् प्रागादिषु यथाक्रमम् ।
कुमुदं कुमुदाक्षं च पुंडरीकं च वामनम् ।। ४६२

शंकुकर्ण सर्पनेत्रं सुमुखं सुप्रतिष्ठितम् ।

विष्णुपार्षदाः

वैष्णवाः पार्षदा स्सर्वे भ्रुकुटीकुटिलाननाः ।। ४६३

मणिकंकणमालाढ्याः द्विहस्ताः कुटिलेक्षणाः ।

एकावरणे परिवाराः

एकावरणगेहस्य परिवारक्रमं शृणु ।। ४६४

नृत्तार्धमंडपे यद्वा तथैवाऽस्थानमंडपे ।
देवस्याननमालोक्य कल्पनीयो विहंगराट् ।। ४६५

गोपुरोत्तरसाले तु द्युमणिं परिकल्पयेत् ।
तद्दक्षिणे निशानाथ माग्नेये मीनकेतनम् ।। ४६६

स्वयंभुवं दक्षिणस्यां नैर्ऋते वारणाननम् ।
वारुण्यां दिशि कल्पेरन् स्कंदं कात्यायनीसुतम् ।। ४६७

मारुते कल्पयेत् दुर्गां उत्तरस्यां धनाधिपम् ।
अथ शंकर मीशाने क्षेत्रपालं प्रकल्पयेत् ।। ४६८

सोमेशानांतरे देशे विष्वक्सेनं प्रकल्पयेत् ।
अंगणे दक्षिणे सप्तमातरो नैर्ऋते श्रियम् ।। ४६९

इंद्रादयो लोकपालाः स्वासु स्वासु दिशास्वपि ।
कल्पयेत् गोपुरस्यांतः बहि र्वा बलिपीठिकाम् ।। ४७०

अंतर्हारधाम्नि

अंतर्हाराह्वये धाम्नि विशेष मवधारय ।

प्रथमावरणे

प्रथमावरणे ब्रह्मन्! गोपुरस्योत्तर स्थले ।। ४७१

पुरुषं दक्षिणे तस्य कल्पयेत् अच्युतं ततः ।
आग्नेये तु हयग्रीवं याम्ने संकर्षणं ततः ।। ४७२

वराहं नैर्ऋते भागे प्रद्युम्नं पश्चिमे ततः ।
वायावनंतं सौम्ये तु ह्यनिरुद्धं प्रकल्पयेत् ।। ४७३

नृसिंह मीशकोणे च पीठिकासु तथांगणे ।
चक्री च मुसली शंखी खड्गीचैव गदाधरः ।। ४७४

अन्तर्हारे

शार्ङ्गी पद्मी तथा वजी पूज्या स्सर्वेऽस्त्रधारिणः ।
एकावरणमात्रे तु ये ये पूर्वमुदीरिताः ।। ४७५

द्वितीयावरणे सर्वे कल्पनीया यथाविधि ।

मध्यांतर्हारे

मध्यांतर्हार सालस्य गोपुरोभयपार्श्वयोः ।। ४७६

सूर्याचंद्रमसौ कल्प्या वेवं सर्वत्र पद्मज! ।
मध्येऽग्नियमयो स्सूर्यान् द्वादशान् परिकल्पयेत् ।। ४७७

तथैव यमनैर्ऋत्योः अंतरष्टवसूनपि ।
मध्ये वरुण नैर्ऋत्यो स्तथा पितृगणानपि ।। ४७८

वायुमारुतयो र्मध्ये विश्वेदेवान् प्रकल्पयेत् ।
सौम्यमारुतयो रंतः पूज्या स्सप्तर्षयस्तथा ।। ४७९

सौम्येशानान्तरे ब्रह्मन्! रुद्रानेकादश पृथक् ।
तत्रैव क्षेत्र पालोऽपि पीठेषु कुमुदादयः ।। ४८०

मर्यादायाम्

मर्यादायां महत्यां च मध्यांतर्हार संस्थितान् ।
कल्पयेदंगणे स्थाने विशेषमवधारय ।। ४८१

उपेंद्रः प्राकृतः पुण्यः पुष्करो विश्वभावनः ।
असुरघ्नः कृतांत श्च भूतनाथोष्टमस्मृतः ।। ४८२

महामर्यादायाम्

चरमावरणे ब्रह्मन् पीठिकासु यथाक्रमम् ।
विश्वेशो विश्वकृत् विश्वं विश्वात्मा विश्वलोचनः ।। ४८३

विश्वपादो विश्वभुजः अष्टमो विश्वकर्मकृत् ।

महापीठम्

द्वितीये वा तृतीये वा चतुर्थे वा खगाधिपम् ।। ४८४

मंदिराभिमुखं कुर्यात् पृष्ठत स्तस्य कल्पयेत्।

ध्वजस्तंभः

बलिपीठं तदुभयो रंतस्स्तभं ध्वजाह्वयम् ।। ४८५

स्तम्भस्स्यात् गोपुरायामो विमानायाम एव वा ।
आस्थानमंडपायामः अग्रे पट्टी त्रयान्वितः ।। ४८६

ध्वजयष्टि समायुक्तः पट्टिघंटारवांचितः ।
वेदिकोपरि तं स्तम्भं स्थापये न्मंदिराननम् ।। ४८७

महानसम्

प्रथमादि चतुर्थांतेष्वाग्नेयां दिशि कल्पयेत्।
पाकार्थं मण्डपं ब्रह्मन्! धूम निर्याणसंयुतम् ।। ४८८

खसूरिका समायुक्तं दीर्घचुल्या समन्वितम् ।
मध्ये तस्य महाकुण्डं नित्यहोमाय कल्पयेत् ।। ४८९

द्वारं प्रकल्पयेत् तस्य मध्ये वायुजलेशयोः ।
कल्पयेत् तत्र कमलां प्राङ्मुखीं वारुणस्थले ।। ४९०

अंतर्वाथ बहि स्तस्य कूपमेकं प्रकल्पयेत् ।

धान्यागारम्

धान्यागारं प्रकुर्वीत चाग्नेय्यां दिशि सद्मनः ।। ४९१

दक्षिणोत्तर वारुण्यां कूपस्थानं प्रचक्षते ।
कल्पयेत् सौम्यदिग्भागे धनागारं चतुर्मुख! ।। ४९२

ऐशेकोणे सरस्वत्या वाद्यागारं प्रचक्षते ।
छत्र चामर वस्त्रादि भवनं दक्षिणादिशि ।। ४९३

भुक्ति स्थानं द्विजातीनां उत्तरस्यां प्रकल्पयेत् ।
देवाभरणशालां तु वारुण्यां दिशि कल्पयेत् ।। ४९४

क्षौमपुष्पसुगन्धानां भवनं मरुतो दिशि ।

यागशाला

नैऋत्यां कारुशां कुर्यात् आग्नेय्यां यागमण्डपम् ।। ४९५

समध्यवेदिकं कुर्यात् चतुष्कुण्ड समन्वितम् ।
पञ्चकुण्डान्वितं यद्वा उत्सवार्थं चतुर्मुख! ।। ४९६

चतुर्द्वारसमायुक्तं यद्वा द्वारैकसंयुतम् ।
किंचिदाग्नेयमाश्रित्य कल्प्यो वाहनमण्डपः ।। ४९७

एवमादीनि चान्यानि विचित्राणि प्रकल्पयेत् ।

मत्स्यादिमूर्तीनां

मत्स्यादि सर्वमूर्तीनांअवतारानुगुण्यतः ।। ४९८

तत्तद्देवी परीवारैः कल्पयेत् बिम्बमन्दिरे ।
सर्वेषां विष्णुभक्तानां मंदिराणि प्रकल्पयेत् ।। ४९९

दिङ्मूर्ति रहितान्येव बिम्बं चापि भुजद्वयम् ।

गृहार्चा

गृहार्चायाः प्रवक्ष्यामि निर्माणविधि मब्जज! ।। ५००

गृहस्य मारुते भागे नैर्ऋत्यां वाऽस्य मंदिरम् ।
हस्तद्वय समायामं मूलबिम्बं प्रकल्पयेत् ।। ५०१

तत्र पादं भवे न्मध्यं तदन्यदितरद्भवेत् ।
मूलबिम्बन्त्रिधा कृत्वा भागेनैकेन कल्पयेत् ।। ५०२

औत्सवं पूजयेत् यद्वा सालग्रामं समर्चयेत् ।

सालग्रामम्

सालग्रामशिला यत्र पूज्यते कमलासन! ।। ५०३

तस्मात् क्रोशद्वयं पुण्यक्षेत्रमित्यवधारय ।
भिन्ना वा स्फुटिता यद्वा चक्रयुक्ता शिला यदि।। ५०४

पूजनीया प्रयत्नेन भुक्तिमुक्ति फलप्रदा ।
नावाहनं न प्रतिष्ठा न शांति नैव निष्कृतिः।। ५०५

दुग्धेन स्नापयेत् ब्रह्मन्! स्पर्शाद्यैः दूषितायदि।
पूजयित्वा प्रयत्नेन भुक्तिं मुक्तिं च विन्दति ।। ५०६

इति श्रीपांचरात्रे ब्रह्मोपदेशे
मंदिरनिर्माणाध्यायोनाम षष्ठोऽध्यायः

अथ प्रतिष्ठाविधि र्नाम सप्तमोऽध्यायः

प्रतिष्ठा विधिः

उक्तो मंदिर निर्माणविधिः कमलसम्भव! ।
विविधानां प्रतिष्ठानां विधिमत्र ब्रवीम्यहम् ।। १

प्रतिष्ठादिवसात् पूर्वं द्वादशाहे नवेऽह्नि वा ।
सप्तमे पंचमे यद्वा तृतीयेऽह्नि चतुर्मुख! ।। २

वपनम्

उत्सवारम्भदिवसात् सप्तमे पंचमेऽह्नि वा ।
गुरुव्रतेषु स्नपने प्रायश्चित्ताख्य कर्मसु ।। ३

वेदव्रतेषु चतुर्षु प्रारम्भे यागकर्मणाम् ।
वसुधा संग्रहे काले शिलादारु परिग्रहे ।। ४

शंकुस्थापनकाले च ध्वजारोहण कर्मणि ।
विविधासु प्रतिष्ठासु बाह्याभ्यंतर कर्मसु ।। ५

आचार्यत्वे कृते कर्ता वपनस्नान माचरेत् ।
वपनेन विना कर्म यदि तन्निष्फलं भवेत् ।। ६

मृत्सङ्ग्रहणम्

आचार्यो वपनस्स्नातो मृत्संग्रहण माचरेत् ।
विविक्तं देश मासाद्य प्रपान्तत्र प्रकल्पयेत् ।। ७

गोमयेनानुलिप्येनां भूषये न्मालिकादिभिः ।

पंचाग भूषणम्

सुधाचूर्णै रलंकृत्य गुरुः पंचांग भूषणः ।। ८

हारोपवीत कटक केयूरांगुळि भूषणम् ।
पंचांगभूषण मिदं कथितं कमलासन! ।। ९

धृतोर्ध्वपुण्ड्र रचन स्सुप्रक्षाळित पत्करः ।
पवित्रपाणि श्शुद्धश्च त्रिराचम्य ततः परम् ।। १०

अद्भिः खनित्रं संक्षाळ्य वेष्टये न्नववाससा ।
प्राङ्मुखोदङ्मुखो यद्वा उपविश्यासने शुचिः ।। ११

संकल्प्यासून् समायम्य भूतशुद्धिं समाप्य च।
कृत्वा मानसयागांतं पुण्याहं वाचये त्ततः ।। १२

खनित्रं विष्णुगायत्र्या भुवं सौदर्शनेन च ।
संप्रोक्ष्य विलिखेत्पश्चात् भुवं भूम्यां यथाविधि ।। १३

नवतालेन मानेन शंभुदिङ्न्यस्त मौळिकाम् ।
नैर्ऋतंन्यस्त चरणां ऊर्ध्ववक्त्रां निरामयाम् ।। १४

ततो दर्भैः परिस्तीर्य कूर्चेन धरणीं स्पृशन् ।
भूमिर्भूम्नेति सूक्तेन ब्राह्मणै रपि जापयेत् ।। १५

तत्र भूमिं समावाह्य षडंगन्यास माचरेत् ।
दर्शये त्सौकरीं मुद्रां भुव मर्घ्यादिभि र्यजेत् ।। १६

इंद्रादीन् परितोऽभ्यर्च्य परमान्नं निवेदयेत् ।
ततो मुखे च बाह्वोश्च वक्षसि स्तनयो रपि ।। १७

जठरे च ततो मध्ये ततोऽपि जघनांघ्रिषु ।
वेदवाद्येषु घुष्टेषु खनित्रेण गुरु स्स्वयम् ।। १८

खात्वा वराहमन्त्रेण लोहजे वेत्रजेऽथ वा ।
भाजने मूलमंत्रेण संगृह्यास्त्रेण वाससा ।। १९

आच्छाद्य मूर्ध्नि विन्यस्य वेदवाद्य समन्वितः ।

अंकुरार्पणम्

सतूर्यघोषं प्रविशेत् अंकुरार्पण मण्डपम् ।। २०

स्नातः क्षौमादिवसनः सोष्णीषो गन्धमाल्यवान् ।
पंचांगभूषणै र्युक्तः पादौ हस्तौ विशोध्य च ।। २१

पवित्रपाणिराचांतो गोमयालेपितं गुरुः ।
पुण्याहवारिणा प्रोक्ष्य वेदिकायां चतुर्मुख!।। २२

प्रागायतानि चत्वारि तिर्यक् तावंति पातयेत् ।
चंदनार्द्राणि सूत्राणि नवपात्रास्पदं भवेत् ।। २३

पात्रान् पदेषु सर्वेषु धान्यै स्स्थण्डिलकल्पनम् ।
संक्षाळ्य पालिका स्सर्वाः बिलमूलानि पद्मज! ।। २४

अवरुद्धकुशैः काशैः ऊर्ध्वमश्वत्थ पल्लवम् ।
बध्वा मृद्भिः पूरयित्वा वालुकाभि स्तदुच्छकैः ।। २५

तदूर्ध्वं गोमयै श्शुष्कैः पालिकासु प्रपूरयेत् ।
प्रागादीशानपर्यंतं अष्टौ पुरुषविद्यया ।। २६

संस्थाप्य पालिकामध्ये सोमकुम्भं समर्चयेत् ।
पालिका स्सोमकुंभं च वाससा वेष्टयेत् पृथक् ।। २७

पूरयेदपि तं कुम्भं गंधकर्पूरवारिभिः ।
कूर्चपल्लव संयुक्तं शरावेण पिधायतम् ।। २८

सर्वान् धर्भैः परिस्तीर्य बीजावापमथाचरेत् ।

नवधान्यम्

तिल मुद्ग यव व्रीहि माष गोधूम सर्षपाः ।। २९

चणको राजमाषश्च धान्यानि नवचाहरेत् ।
विन्यस्य नूतनेपात्रे संक्षाळय पयसा गवाम् ।। ३०

स्थण्डिले स्थापयेत् पात्रं कुशै स्संस्तीरयेत् ततः ।
आवाहनार्चनं कुर्यात् पात्रेऽस्मिन् मूलविद्यया ।। ३१

द्वारतोरण कुंभांश्च ध्वजांश्चाभ्यर्च्य देशिकः ।
नवेन वाससाऽच्छाद्य सोमकुंभे ततःपरम् ।। ३२

सोममावाह्य चाभ्यर्च्य पुण्याहं वाचयेत्पुनः ।
पालिकासु च सर्वासु विष्णुमावाह्य पूजयेत् ।। ३३

सदस्यै स्तैरनुज्ञातो द्वादशाक्षरविद्याया ।
बीजावापं ततः कृत्वा मूर्धानमिति मंत्रतः ।। ३४

मृद्भिराच्छाद्य तास्सर्वा इमंमे वरुणेत्यृचा ।
सोमकुंभोदकै स्सिच्य पिधानैश्छादयेच्च ताः ।। ३५

कर्मणा मवसानांतं सोमकुंभार्चनं चरेत् ।
निवेदयेन्महान्नं च पालिकानां च पद्मज! ।। ३६

नक्तं दिवं महादीपं अनिर्वाणं प्ररोपयेत् ।
कुमुदादि गणेभ्योऽपि बलिदानं समाचरेत् ।। ३७

पालिकास्वष्टसु ब्रह्मन्! सेचयेच्च निशाजलम् ।
यजमानो गुरुं सम्यक् अर्चये दंकुरार्पणे ।। ३८

मंदिर संस्कारः

कर्मार्चादिषु बेरेषु निर्मितेषु यथाविधि ।
रत्नन्यासं पीठिकायां कारयित्वाथ शिल्पिभिः ।। ३९

उन्मीलयित्वा नेत्राणि शिल्पिनश्च धनादिभिः ।
तोषयित्वा ततो ब्रह्मन्! धाम्नोन्त र्बहि रब्जज! ।। ४०

मार्जनालेपनाद्यैश्च शोधयित्वा समं ततः ।
प्रज्वालितै र्दर्भपुंजैः पर्यग्निकरणं चरेत् ।। ४१

पवमानादिभि स्सूक्तैः प्रोक्षये त्पंचगव्यतः ।
दीपानुद्दीपयेत् ब्रह्मन्! गोघृतेन समंततः ।। ४२

धूपद्रव्यैर्गंधकाष्ठैः धूपये दभितो गृहम् ।
दूर्वाक्षत सुधाचूर्णै र्धाम्न स्सर्वत्र मंडयेत्।। ४३

शान्तिहोमः

अपराह्णे तु संप्राप्ते शांतिहोमं समाचरेत्।
बिंब प्रासादपीठानां प्रमाणानां चतुर्मुख! ।। ४४

न्यूनातिरेक जनित दोषशांत्यै यथाविधि।
पुण्याहं वाचयित्वादौ प्रतिष्ठाप्य हुताशनम्।। ४५

भूरादिसप्तभि र्मंत्रैः साक्षतैश्च शमीदळैः ।
पृथक् पृथक् शतं हुत्वा चरुणा षोडशाहुतीः ।। ४६

पुंसूक्त ऋग्भिर्जुहुयात् पंचोपनिषदा ततः ।
प्रत्येकं पंचभिर्मंत्रैः आज्येन शतमाहुतीः ।। ४७

प्रतिमा सन्निधावेवं ततः पूर्णाहुतिं चरेत् ।
नमस्तुभ्यं भगवते जातवेदस्वरूपिणे ।। ४८

नारायणाय हव्यस्य कव्यस्य च यथातथम् ।
होत्रे यष्टव्य देवाना मात्मने परमात्मने ।। ४९

सन्निधत्स्व चिरं देव प्रतिमायां हिताय नः ।
प्रांजलि स्सन्नुपस्थाय मंत्रेणानेन पावकम् ।। ५०

प्रणिपत्य सदर्भेण वाससा प्रतिमां ततः ।
आच्छाद्य मूलमंत्रेण चोत्तर्यं तेन दापयेत् ।। ५१

अर्घ्यपाद्यादिदीपांतं विष्णुगायत्रिया चरेत् ।
स्वस्वमंत्रै स्तदन्येषां आवासो दीपमाचरेत् ।। ५२

ततो जलाधिवासादि प्रतिष्ठांत क्रियात्मनाम् ।

प्रतिसर बंधनम्

सिद्ध्यर्थं कर्मणां कुर्यात् करे कौतुकबन्धनम् ।। ५३

कुर्वीत स्वर्णसूत्राणि यद्वा तंतुमयानि वा ।
स्वर्णादि पात्रे धान्येषु निधायाच्छाद्य वाससा ।। ५४

पुण्याहवारिभिः प्रोक्ष्य देवबिंबपुरोभुवि।
सुदर्शनषडर्णेन सप्तवारं जपेत्ततः ।। ५५

संपूज्य तंतून् बिंबं च देशिकः करयोर्द्वयोः ।
अंगुष्ठानामिकाभ्यां तान् गृहीत्वा गंधरेणुभिः ।। ५६

त्र्यंबकर्चा समालिप्य विश्वेत्तातेति मंत्रतः ।
अथवा मूलमन्त्रेण बध्नीयात् कौतुकं करे ।। ५७

पुंसां दक्षिणहस्ते च योषिता मितरे करे ।
बिंबानां कौतुकं बध्वा शतमस्त्रमनुं जपेत् ।। ५८

यो ब्रह्मा ब्रह्मण इति कुर्यात् तत्राभिमंत्रणम् ।
बृहत्सामेति मंत्रेण धूपपात्रस्थ भस्मना ।। ५९

रक्षां कृत्वा ततोऽर्घ्याद्यै रर्चयित्वा निवेद्य च ।
स्वस्यापि दक्षिणे हस्ते बध्वा प्रतिसरं ततः ।। ६०

द्वादशाक्षरमंत्रेण प्रणमे द्दण्डवत् क्षितौ ।

जलाधि वासः

कारयेन् मृण्मये बिंबे वर्णलिप्तेपि दारुणि ।। ६१

पटे वा दर्पणे यद्वा भित्त्यां वा चित्रिते हरौ ।
इत्यादिषु न कर्तव्यं साक्षात् तोयाधिवासनम् ।। ६२

एवमादिषु कुर्वीत छायाख्यांबु निवासनम् ।
रत्नशैलज दारूणां लोहजानां चतुर्मुख! ।। ६३

साक्षादेव जलावास स्तत्र छाया क्वचित् भवेत् ।

छायाविधिः

विधिं छायाधिवासस्य शृणु वक्ष्यामि सांप्रतम् ।। ६४

देवस्य पुरतो भूमौ स्थंडिले धान्यकल्पिते ।
जलद्रोणीं कटाहं वा लोहजं वाऽथ मृण्मयीम् ।। ६५

स्थाप्य गंधोदकैः पूर्य दर्भैस्संस्तीर्य सर्वतः ।
पुण्याह वारिभिः प्रोक्ष्य द्वारतोरण मर्चयेत् ।। ६६

शोषयेत् तत्कटाहांबु पूर्वं पुरुषविद्यया ।
दग्ध्वा तद्विश्वमंत्रेण प्लावयेत् सर्वविद्यया ।। ६७

ततो मध्ये कटाहस्य योगपीठं प्रकल्पयेत् ।
अष्टाविंशति दर्भैस्तु कृते कूर्चे प्रसन्नधीः ।। ६८

संहारं संस्मरन् बिंबात् आह्वयेन्मूलविद्यया ।
त्रयोविंशतिभि र्दर्भै स्तदन्येषां विधिस्स्मृतः ।। ६९

जलमध्येऽथ तत्कूर्चं प्रागग्रं शायये द्गुरुः ।
संहारक्रम माश्रित्य शाययित्वा ततः परम् ।। ७०

सौदर्शनेन मंत्रेण चक्रमुद्रां प्रदर्शयेत् ।
द्वारतोरणकुंभार्चां समाप्य तदनंतरम् ।। ७१

दक्षिणेन कटाहस्य स्थंडिले धान्यनिर्मिते ।
नवकुंभान्सकरकान् संस्थाप्य तदनंतरम् ।। ७२

ब्रह्माणं मध्यमे कुंभे करके तु सुदर्शनम् ।
आवाहये दथेंद्रादीन् पूर्वादिषु यथाक्रमम् ।। ७३

आवाह्याभ्यर्च्य सिद्धार्थान् विकिरे दस्त्रविद्यया ।
तत्र दीपमनिर्वाणं गुरुरारोपये न्निशि ।। ७४

वाससा प्रतिमां सम्यगाच्छाद्य तदनंतरम् ।
वेदान् पठत्सु विप्रेषु मंदिरद्वारि देशिकः ।। ७५

सौदर्शन षडर्णेन चक्रमावाह्य पूजयेत् ।

पीठ संयोजनविधिः

लोहजानान्तु बिंबानां पीठसंयोजनात् परम् ।। ७६

जलाधिवसनं कुर्यात्तत् कुर्यात्पीठबंधनम् ।
धान्यै स्स्थंडिल माकल्प्य पद्ममष्टदळं लिखेत् ।। ७७

दर्भानास्तीर्य परितो वाससाच्छादयेत्ततः ।
पद्मे वा केवले पिठे स्वर्णं रत्नानि निक्षिपेत् ।। ७८

आज्येन विष्णुगायत्र्या शतं पुरुषसूक्ततः ।
चरुणा षोडश ततो हुत्वा संपात सर्पिषा ।। ७९

स्वर्णं रत्नानि संस्पृश्य वासुदेवं विचिंतयन् ।
मूलमंत्रेण तद्बिंबमारोप्य मणिभर्मभिः ।। ८०

पीठसंयोजनं कुर्यु स्ततस्स्थपतयस्स्वयम् ।
कारयित्वाथ तैरेव नयनोन्मीलन क्रियाम् ।। ८१

मानातिरेकन्यूनानां शांत्यर्थं शान्तिमाचरेत् ।
स्थंडिलोपरि विन्यस्य कुंभमेकं प्रसन्नधीः ।। ८२

वासदेवं समावाह्य द्वादशाक्षर विद्यया ।
अभ्यर्च्य कुंभतोयेन बिंबं तदभिषेचयेत् ।। ८३

हरिद्रामलकैश्चूर्णै रुद्वर्त्य तदनंतरम् ।
उष्णोदकै स्तत्संक्षाळ्य सदर्भनववाससा ।। ८४

आवेष्ट्य मूलमंत्रेण तेनैवोत्तर्य मर्पयेत् ।
दत्वार्घ्यादि यथापूर्वं रक्षाबंधनकर्म च ।। ८५

साक्षाज्जलाधिवास विधिः

रथादिकं समारोप्य वेदवाद्य पुरस्सरम् ।
ग्रामं प्रदक्षिणीकृत्य निनयेच्च जलाशयम् ।। ८६

अवतार्य प्रपामध्ये प्राङ्मुखं वाऽप्युदङ्मुखम् ।
निवेश्य चासने रम्ये जलमध्ये ततः परम् ।। ८७

कारयित्वा प्रपां दिव्यां जलं पुरुषविद्यया ।
संशोष्य दग्ध्वा विश्वेन निवृत्त्या प्लाव्य तज्जलम् ।। ८८

पुण्याहवारिभिः प्रोक्ष्य पीठमन्तर्जलं महत् ।
विन्यस्य तत्र संकल्प्य योगपीठं यथाविधि ।। ८९

द्वारतोरणकुंभार्चां तत्र कुर्याद्विचक्षणः ।
जापयन्शाकुनं सूक्तं बिम्बमुत्थाप्य देशिकः ।। ९०

संहारं संस्मरन्पीठे शायये त्प्राक्शिरः स्वयम् ।
दक्षिणे स्थापयेत् कुंभान् पूर्ववन्नव पद्मज! ।। ९१

ब्रह्मादीशांत मावाह्य रक्षार्थं तत्र पूजयेत् ।
सौदर्शनेन मंत्रेण चक्रमुद्रां प्रदर्श्य च ।। ९२

अग्निप्राकारमंत्रेण तन्मुद्रामपि दर्शयेत् ।
पाठयेत् सकलान्वेदान् दीपानत्र प्ररोपयेत् ।। ९३

त्रिरात्रमेकरात्रं वा यामं यामार्धमेव वा ।
जलेऽधिवासयेत् ब्रह्मन्! बिम्बान्येवं यथाविधि ।। ९४

जलाधिवास देशलक्षणम्

नदीषु दीर्घिकायां वा तटाके निर्झरेऽपि वा ।
जलाधिवासं कुर्वीत प्रसन्ने सलिले विधे! ।। ९५

अल्पतोये श्मशानान्ते लवणोदक दूषिते ।
कषाये कटुके चैव तिक्ते फेनैश्च दूषिते ।। ९६

चैत्य वृक्षसमीपे तु नीचैरध्यासिते तथा ।
ऊषरे शैवलयुते वर्णांतरयुते तथा ।। ९७

एवमादिषु दोषेषु प्रतिमां नाधिवासयेत् ।
नद्याद्यभावे बिम्बस्य जलाधिवसनं चरेत् ।। ९८

जलद्रोण्यां कटाहे वा समुद्धृत्य महज्जलम् ।
यथा सम्भवमन्यस्मिन् मृण्मयादौ तदिष्यते ।। ९९

सद्यो वा तोयवासं च पुरस्ता दधिवासनात् ।
स्नानपानादिकं कर्म बिम्बस्योत्थापनावधि ।। १००

न कुर्वीर न्नरास्सर्वे गृहार्चास्थापने यदि ।
सद्य एव समुद्धृत्य नयनोन्मीलनं चरेत् ।। १०१

शाययित्वा जले बिम्बं वास्तुहोमं समाचरेत् ।

वास्तुपूजा

प्रभाते गुरुरुत्थाय कृतपूर्वाह्निक क्रियः ।। १०२

आस्थानमण्डपं यद्वा प्राप्य वृत्तार्थमण्डपम् ।
तस्य दक्षिणपार्श्वे तु आसीनः प्राङ्मुखो गुरुः ।। १०३

विस्रस्तांगं वास्तुनाथं विलिख्य तिलराशिषु ।
परिस्तीर्याथ सङ्कल्प्य प्रोक्ष्य पुण्याहवारिणा ।। १०४

दर्भसप्तकृतं कूर्चं वास्तुनाथहृदि न्यसेत् ।
आवाह्य तत्र वास्त्वीशं गंधाद्यै स्सम्यगर्चयेत् ।। १०५

वास्तुनाथस्य शिरसि विन्यसेदंशुमालिनम् ।
सव्ये तु विन्यसेत् ब्रह्मन् बाहुमूले झषध्वजम् ।। १०६

कूर्परे तस्य वै स्कंदं हस्ते तस्मिन् विनायकम् ।
पादयोरश्विनी देवौ मध्ये चंद्रमसं न्यसेत् ।। १०७

अन्यहस्ते न्यसेद्दुर्गां कूर्परे सप्तमातरः ।
बाहुमूले न्यसे त्स्थाणुं विष्णुं हृदयपङ्कजे ।। १०८

ब्रह्माणं नाभिदेशे च इंद्रादीन् परितोष्टसु! ।
वास्तुनाथोत्तरे देशे क्षेत्रपालं समर्चयेत् ।। १०९

एवमावाह्य चाभ्यर्च्य वास्तुनाथस्य पश्चिमे ।
यथाविध्यग्नि माधाय तत्र वास्त्वीशमर्चयेत् ।। ११०

पंचोपनिषदैर्मन्त्रैः सर्पिषा जुहुयात् पृथक् ।
सहस्रं वा शतं यद्वा वास्तुनाथस्य विद्यया ।। १११

शम्यपामार्ग खदिरैः आज्येनापि पृथक् पृथक् ।
हुत्वाष्ट च सहस्रं च चरुणा षोडशाहुतीः।। ११२

हुत्वा पुरुषसूक्तेन तत् पश्चादंशुमालिने ।
झषध्वजाय स्कंदाय विनायकवराय च ।। ११३

अश्विनीभ्यां चंद्रमसे दुर्गायै मातरस्ततः ।
स्थाणुं विष्णुं विधिं हुत्वा चान्नेनैव सकृत्सकृत् ।। ११४

विद्यया वास्तुनाथस्य हुत्वा पूर्णाहुतिं ततः ।
इंद्रादि क्षेत्रपालान्तं बलिं दत्वा विसर्जयेत् ।। ११५

अनर्चिते वास्तुदेवे कृतंकर्मासुरं भवेत् ।
तस्मात् सर्वप्रयत्नेन वास्तुनाथं समर्चयेत् ।। ११६

वास्तुनाथ प्रतिकृतिं दर्भसंचय निर्मिताम् ।
दग्ध्वा वास्त्वीशकूर्चेन विसृजे न्मंदिराद्बहिः ।। ११७

मन्दिरस्य ततः कृत्वा मार्जनालेपनादिभिः ।
शुद्धिं यथा मनस्तुष्टि पुण्याहप्रोक्षणं चरेत् ।। ११८

सुधाचूर्णै रलंकृत्य सिद्धार्था नस्त्रविद्यया ।
विकीर्य सर्वतोदिक्षु गुरुर्गत्वा जलाशयम् ।। ११९

उदकात् बिंम्ब मुत्थाप्य प्रपायां तीरविष्टरे ।
विन्यस्य प्राङ्मुखं बिम्बं कुम्भान प्युदकात् बहिः ।। १२०

उद्धृत्योद्वास्य तदनु बिम्बं संक्षाळ्य वारिभिः ।
तिंत्रिण्या लोहजे बिम्बे संशोध्य क्षाळ्य चाम्भसा ।। १२१

वस्त्राभरण गंधाद्यैरलंकृत्य यथापुरम् ।
यानमारोप्य वेदाद्यैर्निनये द्यागमण्डपम् ।। १२२

मण्डप स्योत्तरेभागे विष्टरे विनिवेशयेत् ।
गर्भगेहं समासाद्य कटाहे शायितं पुरा ।। १२३

कूर्चमुद्धृत्य तन्निष्ठां शक्तिं मूले निवेशयेत् ।
कुम्भस्थ देवांश्चोद्वास्य नेत्रोन्मीलन कर्मणे ।। १२४

नेत्रोन्मीलनम्

सङ्कल्प्यापोह्य वस्त्राणि माल्यान्याभरणानि च ।
नेत्रोन्मीलन योग्यानि प्रोक्ष्य पुण्याहवारिभिः ।। १२५

वस्त्रै राच्छाद्य तद्बिम्बं पुरत स्स्थण्डिले गुरुः ।
सौवर्णं राजतं पात्रं विन्यसे त्पूर्वपश्चिमे ।। १२६

मध्वाज्यपूरिते कृत्वा तादृश्या द्वे शलाकिके ।
तयो र्विन्यस्य वासोभि राच्छाद्य मधुभाजने ।। १२७

सूर्यं तदितरे चंद्रमावाह्याभ्यर्च्य देशिकः ।
मधुवातेति च मधु स विराजं परीत्यृचा ।। १२८

अभिमंत्र्याज्य पात्रं च धान्य गो कन्यकाः पुरा ।
संस्थाप्य पाद्ये संघुष्टे मध्वक्त मुखया गुरुः ।। १२९

शलाकयाऽथ सौवर्ण्या चित्रं देवेति दक्षिणम् ।
अन्ययाऽज्यांतमुखया तच्चक्षुरिति मंत्रतः ।। १३०

वामं लोचनमुन्मील्य पटमाच्छादनं गुरुः ।
व्यपोह्य सर्वधान्यानि गाः कन्या अपि दर्शयेत् ।। १३१

देवं स्तुत्वा प्रणम्याथ छायास्नपनमाचरेत् ।

छायास्नपनम्

छायाधिवासो यद्बिम्बे छायास्नानं च तत्र वै ।। १३२

जलेऽधिवासो यस्यासीत् साक्षात् स्नपनमस्य वै ।
स्थण्डिले कलशान्स्थाप्य स्नपनोक्त विधानतः ।। १३३

आवाह्य च समभ्यर्च्य कूर्चे वा दर्पणेऽथ वा ।
मूलाद्बिम्बं समावाह्य कलशै स्स्नपनं चरेत् ।। १३४

दर्पणस्थं यथापूर्वं ध्रुवबिम्बे विचिंतयेत् ।

स्नपने भेदाः

पंचाद्यै स्सप्तदशभिः मम स्नपन माचरेत् ।। १३५

देवीनां तु श्रियादीनां नवभी रथपंचभिः ।
ब्रह्मादीनां तु सर्वेषां पंचभि स्स्नापये द्विधे! ।। १३६

अथ नीराजनांतं मा मभ्यर्च्य गुरुसत्तमः ।
ध्रुवबेरस्य हृदये ध्याये द्दीपमणिप्रभम् ।। १३७

वासुदेवं परंब्रह्म वासोभि श्छादये त्ततः ।
धाम्नो बहि र्विनिर्गत्य यागशालां प्रविश्य च ।। १३८

वासोभि र्बिम्बमाच्छाद्य नोन्मील्य नयने उभे ।
कन्यका गाश्च धान्यानि दर्शयित्वा ततः परम् ।। १३९

कर्मांगस्नपनम्

तुलसीकाननं गत्वा तुलसीमूल मृत्तिकाः ।
समादाय गुरुः पश्चात् कर्मांगस्नपनं चरेत् ।। १४०

स्नपनार्थं तु सङ्कल्प्य चोत्तमोक्त विधानतः ।
विधानेनान्ययो र्यद्वा स्नपनं परिकल्पयेत्।। १४१

पुण्याहवारिभिः प्रोक्ष्य स्नपनद्रव्यमृत्तिकाः ।
कलशस्थापनादन्यत् यथा पूर्वं समाचरेत् ।। १४२

मृज्जलेनाभिषिच्यादौ मूर्धानमिति मंत्रतः ।
शुद्धोदकेन संक्षाळ्य चेमंमे वरुणे त्यृचा ।। १४३

कुम्भतोयै स्ततः कुर्यात् स्नपनं तद्यथापुरम् ।
नीराजनांतं कुर्वीत हरिद्रास्नपनं विना ।। १४४

चक्राब्जमंडलम्

चक्राब्जमण्डलं ब्रह्मन्! वर्तयेत् वेदिकोपरि ।
वेदिकां प्रोक्षयेत् बिम्बं तदा पुण्याहवारिभिः ।। १४५

चंदनार्द्राणि सूत्राणि प्राङ्मुखोदङ्मुखान्यपि ।
निपात्य सप्तदश च वेदिकायान्ततः परम् ।। १४६

पदेषु तत्र प्राप्तेषु षट्त्रिंशच्च पदान्यपि ।
संमार्ज्य स्थाप्य तन्मध्ये शंकुमेकं प्रसन्नधीः ।। १४७

समानि पंचवृत्तानि यथास्यु स्तत्र बिम्बवत् ।
तथा सूत्रं भ्रामयित्वा मध्यवृत्तं तु कर्णिकाम् ।। १४८

केसरं च दळं नाभिं द्वितीये परिकल्पयेत् ।
तृतीयं च तुरीयं चाप्यरक्षेत्रं प्रकल्पयेत् ।। १४९

पंचमेनैव वृत्तेन कल्पयेन्नेमिमण्डलम् ।
पीठिकां कल्पयेत् पश्चात् अष्टाविंशतिभिः पदैः ।। १५०

बहिः पंक्तिद्वयेनाथा शीतिभि र्वीथिकामपि ।
बहिः पंक्तिद्वयेनास्या श्चतुरश्रं प्रकल्पयेत् ।। १५१

ततः प्रतिदिशं ब्रह्मन्! मध्ये मध्ये चतुष्पदैः ।
द्वाराणि कारयेत् ब्रह्मन्! प्रागादिषु चतुर्ष्वपि ।। १५२

द्वाराणां पार्श्वयो र्बाह्य रथ्यायां चेदुभे उभे ।
एकैक मंतरध्ययां शोभार्थं मार्जिते पदे ।। १५३

तत्पार्श्वे बहिरेकेन चांतर्वीथ्यां त्रिभिः पदैः ।
शोभात्रिभिः पदैरूर्ध्व मंतरेकेन चेद्विधे! ।। १५४

उपशोभेति कथिता शोभापार्श्वे प्रकल्पयेत् ।
उभयोः पार्श्वयोर्द्वार मेवं कृत्वा चतुर्मुख! ।। १५५

पदाभ्यामेव शिष्टाभ्यां कोणे कोणे प्रकल्पयेत् ।

वर्णरचना

वर्णानां रचनां कुर्यात् मंडले तदनंतरम् ।। १५६

सितं कृष्णं तथा श्यामं पीतं कुंकुममित्यपि ।
वर्णाः पंचोदिता ब्रह्मन्! तत् प्राकार इहोच्यते ।। १५७

शालितंडुलचूर्णादि सितवर्णे प्रकल्पयेत् ।
पुटदग्धानि गृह्णीयात् कृष्णवर्णे चतुर्मुख! ।। १५८

चूर्णितं शुष्कवर्णानां श्यामवर्णाय कल्प्यते ।
पीतवर्णाय कल्प्येत हरिद्राचूर्ण मब्जज! ।। १५९

सिंधूरं कुंकुमं यद्वा रक्तवर्णाय कल्पयेत् ।
पीतेन कर्णिकां शुक्लैः बिंदून् द्वादश तत्र वै ।। १६०

क्षेत्रं द्वितीयं तदनु त्रिधैव विभजेद्गुरुः ।
बिंद्वर्धं प्रथमं ग्राह्यं दळार्थं तदनंतरम् ।। १६१

नेम्यर्थं ग्राहयेदन्यत् कर्णिकाच रेखिकांगुरुः ।
शुक्लेन परिकल्प्याथ केसराद्यं सितेन च ।। १६२

उत्तरं तु द्विधा कृत्वा पूर्वं पीतेन कल्पयेत् ।
तदुत्तरं तु रक्तेन तदंते बिंदवस्सिताः ।। १६३

श्यामै स्तदन्तराळानि रक्तैस्तु दळरेखिकाः ।
रक्तेनैव दळाग्राणि दळमूलानि शुक्लतः ।। १६४

रक्तैर्दळान्तराळानि दळान्त वलयं तथा ।
नाभिरेखा भवेत् श्यामैः श्यामेनैवार रेखिकाः ।। १६५

कृष्णैरराणि कल्प्याथ रक्ते नैव तदंतरम् ।
अरांतवलयं श्यामैः नेमिं द्वेधा प्रकल्प्य च ।। १६६

कृष्णेन प्रथमं भागं सितेन तदनंतरम् ।
नेम्यंतवलयं कृष्णैः पीठं कृष्णेन पूरयेत् ।। १६७

पीठान्तं पीतवर्णेन शुक्लेनैवाथ वीधिकाम् ।
शोभाः पीतेन संपूर्य श्यामेनार्धाश्रयान्ततः ।। १६८

उपशोभाश्च कृष्णेन ततो द्वारचतुष्टयम् ।
पूर्वं सितेन रक्तेन दक्षिणं पीतवर्णतः ।। १६९

पूरयेत् पश्चिमद्वारं कृष्णेन तदनंतरम् ।
कोणान् कृष्णेन संपूर्य तेषु शंखान् प्रकल्पयेत् ।। १७०

शुक्लैस्तदंतराळानि श्यामेन परिपूरयेत् ।
सितेन परितोरेखां कारयेत् गुरुसत्तमः ।। १७१

बिंदवो द्वादश प्रोक्ताः षण्णवत्यैव केसरम् ।
दळानि द्वादश ब्रह्मन्! द्वादशाराणि पद्मज! ।। १७२

एवं संकल्प्य चक्राब्जमण्डलं तदनंतरम् ।
मंडलाराधनं कुर्याद्येन तुष्टोऽस्मि पद्मज! ।। १७३

शयनाधिवासः

चक्रपद्मस्य पूर्वे वा दक्षिणे वेदिकोपरि ।
द्वादशाक्षरमंत्रेण प्रोक्षये द्गंधवारिणा ।। १७४

प्रागग्रानुदगग्रान् वा दर्भानास्तीर्य देशिकः ।

स्थण्डिल विधिः

व्रीहिभि स्स्थंडिलं कृत्वा तदूर्ध्वं तंडुलै रपि ।। १७५

तिलैश्च तंडुलादूर्ध्वं पद्मं तत्र समालिखेत् ।
तिलोपरि समास्तीर्य दर्भान् पूर्ववदब्जज! ।। १७६

उपरिष्टात् व्याघ्रचर्म मृद्वास्तरणमप्यथ ।
रत्नकंबळ मस्योर्ध्वं क्षौमं तदुपरि क्षिपेत् ।। १७७

तदूर्ध्वं शुक्लवसनं उपधानानि निक्षिपेत् ।
हस्तयोः पादयोश्चापि गंडूकानि समर्पयेत् ।। १७८

आवासयित्वा तां गंधैः परिस्तीर्य कुशै स्ततः ।
वेदान् पठत्सु विप्रेषु बिंबमुत्थाप्य देशिकः ।। १७९

प्रादक्षिण्येन सनकै र्बहिष्कुडं यथा तथा ।
योगपीठं प्रकल्प्यादौ शय्यायां तदनंतरम् ।। १८०

मूलेन शायये दिंबबं प्राक्शिरो दक्षिणाननम् ।
युवासुवासामंत्रेण वासोभिः कंबळैरपि ।। १८१

समंतत स्समाच्छाद्य द्वारतोरण मर्चयेत् ।

द्वारतोरणपूजाविधिः

ब्रह्मन्! तोरणनिर्माणमद्य वक्ष्यामि तच्छृणु ।। १८२

अश्वत्थ तोरणं प्राच्यां याम्या मौदुंबरं विदुः।
नैय्यग्रोधं पश्चिमस्यां सौम्ये प्लाक्ष श्चतुर्मुख! ।। १८३

उन्नतिः पुरुषायाम स्तोरणायाम ईरितः ।
यद्वा हस्तत्रयायामो हस्तद्वय समुन्नतः ।। १८४

एक हस्तायतो यद्वा आयामार्धेन पद्मज! ।
विस्तारः कथितस्तेषां पार्श्वशाखा समन्वितः ।। १८५

ऊर्ध्वपट्ट्येव विहिता नान्या स्याद्द्वार तोरणे ।
उपरिष्टात् पट्टिकायां त्रीणि शूलानि विन्यसेत् ।। १८६

प्रागाद्याशासु निक्षिप्य तोरणानि यथाक्रमम् ।
स्थंडिलोपर्यतस्तेषु देवतावाहनं चरेत् ।। १८७

ऋगादि चतुरो वेदान् प्रागादिषु चतुर्ष्वपि ।
इन्द्रादींश्चतुरस्तद्वत् आवाह्याभ्यर्चयेत् गुरुः ।। १८८

प्राच्यां दक्षिणशाखायां कुमुदं वामतोऽर्चयेत् ।
कुमुदाक्षं तदुभयो रधस्तात् स्थंडिलोपरि ।। १८९

कलशौ द्वौ च संस्थाप्य पूर्णं दक्षिणतोर्चयेत् ।
पुष्कराक्षं तदितरे याम्ये द्वाराख्यतोरणे ।। १९०

शाखयोः पुंडरीकाक्ष वामनं च समर्चयेत् ।
आनन्दनन्दनं चापि कुंभयो रर्चये दधः ।। १९१

शंकुकर्णं सर्वनेत्रं पश्चिम द्वारशाखयोः ।
वीरसेनं सुषेणं च पूजयेत् कुंभयोरधः ।। १९२

शाखयो रुत्तरद्वारे सुमुखं सुप्रतिष्ठितम् ।
अधस्तात् कुंभयोर्ब्रह्मन्! संभवं प्रभवं तथा ।। १९३

एवमावाह्य चाभ्यर्च्य चाम्नायान्पाठये द्दिद्वजैः ।
सर्वत्र वाद्ये संघुष्टे गुरुर्हृदयपंकजे ।। १९४

ध्यायन्नारायणं देवं पुण्याहमपि वाचयेत् ।
अर्चयेत् कर्णिकामध्ये मंत्राध्वानं चतुर्मुख! ।। १९५

चक्राब्जमंडलाराधनाविधिः

बीजं पिंडं च संज्ञाश्च गायत्रीं च पदं तथा।
मालामन्त्रं समभ्यर्च्य केसरेषु ततः परम् ।। १९६

परं व्यूहं च विभवं विभवांतर मप्यथ ।
अर्चामंतर्यामिणं च तत्त्वान्यपि सभाजयेत् ।। १९७

दळेषु कादि वर्णांश्च पूजये न्नाभिमंडले ।
जाग्रत्स्वप्न सुषुप्तीश्च तुर्यन्तत्र सभाजयेत् ।। १९८

अरेषु ज्ञानमैश्वर्यं शक्तिं बलमतः परम् ।
वीर्यं तेजश्च संपूज्य नेमिभूमौ चतुर्मुख! ।। १९९

अर्चयेत् भुवनाध्वानं बिंदुषु द्वादशस्वपि ।
द्वादशाक्षर विद्याया वर्णानि द्वादशक्रमात् ।। २००

अभ्यर्च्य कर्णिका मध्ये कर्णिकायां समष्टिमत् ।
द्वादशाक्षरमंत्रं चाप्यष्टाक्षरमतः परम् ।। २०१

विष्णोष्षडक्षरं चापि गायत्रीं वैष्णवीमपि ।
वासुदेवादि मन्त्रांश्च मीनादीनां तथैव च।। २०२

सौदर्शनं हयग्रीवं श्रियोभूम्यश्च पद्मज ! ।
अनंतं गरुडं चापि विष्वक्सेन मतःपरम्।। २०३

ततश्चंडादि मंत्रांश्च पार्षदानां तथैव च।
केसरेष्वपि तत्त्वानि सर्वाण्यपि यथाविधि।। २०४

देवताश्च त्रयस्त्रिंशत् तत्रावाह्य समर्चयेत्।
दळेष्वपि ककारादि क्षांतवर्णार्चनं चरेत्।। २०५

नाभिदेशे केशवादीन् मत्स्यादीन् पंकजासन !।
विश्वादीन् कुमुदाद्यांश्च लोकपालां स्ततःपरम्।। २०६

कुमार्यादीन् किन्नारांश्च तथा किंपुरुषानपि।
विमलादीश्च व्याप्त्यादीः श्रीवत्सादी स्समर्चयेत्।। २०७

अकारादिस्वरान् सर्वान् अरक्षेत्रे समर्चयेत्।
अर्चये न्नेमिभूभागे भुवनानि चतुर्दश।। २०८

विष्ण्वादि सकलान् लोकान् नेमिभूमौ समर्चयेत्।
चक्रमण्डल दीक्षायां विधिरेष उदीरितः ।। २०९

आवाहनविधिः

दीक्षा प्रतिष्ठायागादौ इतः पूजाविधिं शृणु ।
पद्मस्य कर्णिकाक्षेत्रे योगपीठं प्रकल्पयेत् ।। २१०

अंतराराध्य देवेशं हृदया दवतारयेत् ।
कर्णिकायां समावाह्य सान्निध्य प्रार्थनां चरेत् ।। २११

अर्घ्यादिभि स्तं संपूज्य केसरेषु चतुर्मुख ! ।
श्री भू सरस्वती ब्रह्मन् ! रतिप्रीती ततः परम् ।। २१२

कीर्तिं शांतिं च तुष्टिं च पुष्टिं तत्र समर्चयेत् ।
श्रीवत्साद्या द्वादश च दळेषु द्वादशस्वपि ।। २१३

दळान्तवलये ब्रह्मन् ! व्याप्त्याद्यर्चनमाचरेत्।
विष्णु मभ्यर्चये न्नाभावरेषु द्वादशस्वपि ।। २१४

विष्ण्वादीन् द्वादशाराध्य तदंतवलये शृणु ।
मत्स्यादि द्वादशाराध्य नेमिभूमौ तत श्शृणु ।। २१५

चक्रादीन्यायुधान्यष्टौ अभ्यर्च्य तदनंतरम् ।
अग्न्यादि पीठकोणेषु वराहं नृहरिं ततः ।। २१६

अनंतं च हयग्रीवं वीधिकायां ततः परम् ।
इंद्रादीन् लोकपालांश्च पूर्वादि द्वारपार्श्वयोः ।। २१७

चंडप्रचंडौ पूर्वत्र याम्यां धातृ विधातरौ ।
जयश्च विजयोश्चोभौ प्रतीच्यां दिशि पद्मज ! ।। २१८

उदीच्या मर्चयेद्द्वारि गुरुर्भद्र सुभद्रकौ ।
ईशानकोणे रथ्यायां विष्वक्सेनं समर्चयेत् ।। २१९

पूर्वद्वारात् बहिर्ब्रह्मन् अर्चयेद्विहगाधिपम् ।
याम्यादिषु चतुर्द्वार्षु चक्रकौमोदकीधरान् ।। २२०

प्रणवादि नमोंतैश्च तत्तन्मंत्रै स्समर्चयेत् ।
नैवेद्यांतं समभ्यर्च्य नीराज्य तदनंतरम् ।। २२१

कारयेद्वेदिकामध्ये धान्यपीठं यथापुरम् ।

महाकुंभस्थापनम्

तिलोर्ध्वं पद्ममालिख्य महाकुंभं चतुर्मुख! ।। २२२

द्रोणांबुपूरणे योग्यं सौवर्णादि विनिर्मितम् ।
अथवा मृन्मयं कुंभं सूत्रवेष्टन संयुतम् ।। २२३

मृन्मयानां तु कुंभानां कारयेत् सूत्रवेष्टनम् ।
गंधोदकेन संपूर्य चामकर्पूररेणुभिः ।। २२४

अश्वत्थपल्लवं कूर्चं तन्मुखे विनिवेशयेत् ।
अपिधाय शरावेण वस्त्रयुग्मेन वेष्टयेत् ।। २२५

तद्दक्षिणे तु करकं स्थापयेत् चतुरानन! ।
शायितस्यापि बिंबस्य कुंभयो रुभयोरपि ।। २२६

कुंभाष्टकञ्च संस्थाप्यं आशासु परितोऽष्टसु ।
गंधपुष्पादिभिः कुंभान् मण्डयेत् तदनंतरम् ।। २२७

स्थंडिल धान्य प्रमाणम्

खारिद्वयं तिलानां तत् द्विगुणं तंडुलान्यपि ।
तंडुलद्विगुणाः प्रोक्ता व्रीहयः कमलासन! ।। २२८

सर्वत्र स्थंडिलंकुर्यात् एभिर्धान्यै श्चतुर्मुख! ।
वस्त्रपल्लव कूर्चादि सर्वत्र कलशादिषु ।। २२९

आवाहने तु संप्राप्ते महाकुंभवदाचरेत् ।

प्रतिमादि विन्यासः

माणिक्यादीनि रत्नानि प्रतिकुंभं समर्पयेत् ।। २३०

शंखं चक्रं गदां पद्मं ध्वजं श्रीवत्समेव च ।
गरुडं कमठंचापि निष्कस्वर्ण विनिर्मितान् ।। २३१

न्यसेत् प्रागादिकुंभेषु महाकुंभे ततः परम् ।
प्रतिमां वासुदेवस्य तावत् स्वर्णविनिर्मितम् ।। २३२

सुदर्शनं च करके तावत्स्वर्ण विनिर्मितम् ।
निक्षिप्य परितः कुंभं परिस्तीर्य कुशैर्गुरुः ।। २३३

विन्यस्य मूर्तिकुंभानां मध्ये मध्येऽष्टमंगळम् ।

अष्टमंगळम्

ताळमात्रायतं ब्रह्मन्! तदर्धेनैव विस्तृतम् ।। २३४

लोहेन यज्ञवृक्षैर्वा कारयेत् फलकाष्टकम् ।
वक्ष्यमाण विधानेन लांछये त्फलकाष्टकम् ।। २३५

श्रीवत्सं पूर्णकुंभं च भेरीं दर्पणमंडलम् ।
मत्स्ययुग्मं पांचजन्यं चक्रं च गरुडं गुरुः ।। २३६

लाञ्चयेत् फलगास्वेवं श्रीवत्सं विन्यसेत्पुरा ।
आग्नेय्यां पूर्णकुंभं च याम्यां भेरीं च निक्षिपेत् ।। २३७

दर्पणं नैऋते भागे मत्स्ययुग्मं च पश्चिमे ।
मारुते पाञ्चजन्यं च शाङ्कर्यां विनतासुतम् ।। २३८

एतानि मङ्गळान्यष्टौ महाकुंभोप कुंभयोः ।
अंतरे स्थंडिले ब्रह्मन्! विस्यसेत् प्रोक्ष्य वारिभिः ।। २३९

महाकुंभाराधन विधिः

कुंभानां परितस्स्थाप्या स्सांकुरा अपि पालिकाः ।
संकल्प्य कुंभपूजार्थं ततः पुरुषविद्यया ।। २४०

संशोष्य कुंभतोयानि विश्वमंत्रेण दाहयेत् ।
निवृत्तिविद्यया प्लाव्य ध्यात्वा गुरुमनन्यधीः ।। २४१

योगपीठं प्रकल्प्याथ हत्पद्मे कर्णिकोपरि ।
हरिमाराध्य तत्पद्मात् द्वादशाक्षर विद्यया ।। २४२

अवतार्य महाकुंभे प्रणवेन यथाविधि ।
अर्घ्यादि दीपपर्यंतं समाराध्य ततः परम् ।। २४३

आरभ्य चतुरो वेदान् करके च सुदर्शनम् ।
प्राक्कुंभे विष्णुमावाह्य याम्ये तु मधुसूदनम् ।। २४४

त्रिविक्रमं च पाश्चात्ये ततो वामनमुत्तरे ।
आग्नेयादिषु कोणेषु श्रीधरादि चतुष्टयम् ।। २४५

आवाह्य पूर्ववत्सम्यक् प्रणवेन समर्चयेत् ।
पायसान्नं निवेद्याथ तदानीं भगवन्मयान् ।। २४६

यजमान स्तदंतेन भोजयेत् द्वादशावरान् ।
आयता दशभि र्हस्तैः तै र्हस्तै रेव विस्तृता ।। २४७

षोडशस्तंभ सहिता प्रपा वा यागमंडपः ।
तन्मध्ये कल्पयेत् वेदीं विस्तीर्णां पंचभिः करैः ।। २४८

यागमंडप वेदिका कुंडलक्षणम्

आयतामपि तैरेव तस्यां कुंभार्चनं मतम् ।
त्रिहस्तायामविस्तारां यद्वा वेदीं प्रकल्पयेत् ।। २४९

यत्रार्च्यते महाकुंभ स्तत्र शय्या मता मम ।
पश्चिमेवोत्तरेवास्याः मंडलार्चन वेदिका ।। २५०

तयोरेकत्र कुर्वीरन् अंकुरार्पण वेदिकाम् ।
सार्थहस्त समायाम विस्तारान् कमलासन! ।। २५१

हस्तद्वय समायाम विस्तारान् मण्डलार्चने ।
एक कुंडविधानोऽयं पंचकुंड विधौ शृणु ।। २५२

कुंभशय्यास्पदावेदि र्मध्ये मंडप मुच्यते ।
मारुते कल्पयेत् वेदीं मंडलाराधनास्पदाम् ।। २५३

आग्नेय्यामेव कल्प्येरन् अंकुरार्पण वेदिकाम् ।
प्रधान वेदिकामानां कल्पयेन् मंडलार्चने ।। २५४

पुष्पयागे च दीक्षादौ मध्येमंडप मब्जज! ।
सर्वत्र वेदिका प्रोक्ता हस्तमात्र समुच्छ्रया ।। २५५

कुंडलक्षणविधिः

वेद्या स्तालमितात् देशात् कुंडानि परिकल्पयेत् ।
चतुरश्रमयं कुंडं प्राच्यां कमलसंभव! ।। २५६

चापाकृति भवेत् याम्यां पश्चिमे कमलाकृति ।
त्रिकोण मुत्तरे कुंडं आग्नेय्यां चतुरश्रकम् ।। २५७

मेखलात्रय युक्तानि कुंडानि परिकल्पयेत् ।
प्रतिकुंडं प्रकुर्वीत मध्ये पद्मं विचक्षणः ।। २५८

पद्मकुंडे मेखलासु दळानि परिकल्पयेत् ।
अराणि कुरुते तत्र चक्रकुंडं तदेव हि ।। २५९

पद्मकुंडे न कुर्वीत मध्ये पद्मं चतुर्मुख! ।

स्रुक् स्रुवम्

बाहुदंड समायाम स्स्रुचः प्रोक्त स्स्रुवस्यवा ।। २६०

स्रुचोलक्षण माख्यास्ये तच्छृणुष्व चतुर्मुख! ।
षडंगुलेन विस्तीर्णं त्रिंशद्भि र्विभजेत्ततः ।। २६१

अग्रै श्चतुर्भि रंशैस्तु वराह वदननाकृति ।
घृत निर्याण सहित मेकांगुळ घनादिकम् ।। २६२

षड्भिरंशै स्ततोधस्तात् गळदेशं प्रकल्पयेत् ।
षडंगुळैश्च विस्तारो घनं तावद्भिरुच्यते ।। २६३

चतुरंगुळमात्रेण गर्तं तत्र प्रकल्पयेत् ।
गर्तदेशे तु कुर्वीत शिल्पवि न्मेखलात्रयम् ।। २६४

गर्तस्य पृष्ठतः कुर्यात् कमलाकार मब्जज! ।
वृत्तं वा चतुरश्रं वा गळभूमिं प्रकल्पयेत् ।। २६५

अधस्तात् गळदेशस्य वेदांशैः कमलासन! ।
पंचभी रंगुळै रग्रे त्रिभिराद्ये प्रकल्पयेत् ।। २६६

इन्दीवर दळाकारं यद्वा कोकनद प्रभम् ।
गळस्य पृष्ठे पद्मे तु नात्रेंदीवर मिष्यते ।। २६७

शंखं चक्रं प्रकुर्वीत तत् पार्श्वे चतुरानन! ।
चतुर्भि र्दशभिर्भागैः नाळायामं प्रकल्पयेत् ।। २६८

कुर्यात् द्व्यंगुळविस्तारं घनं सार्धांगुळं मतम् ।
अवशिष्ट द्वयांशेन कंदं कुर्या द्विचक्षणः ।। २६९

स्रुक् लक्षणमिदं प्रोक्तं स्रुवलक्षणमुच्यते ।

स्रुवलक्षणम्

चतुरंगुळ विस्तारं स्रुवस्य कमलासन! ।। २७०

त्रिंशद्भागं यथापूर्वं कृत्वा याममतःपरम् ।
अग्रे परित्यजे द्भाग चतुष्टय मनंतरम् ।। २७१

स्रुवस्य वदनं कुर्यात् षड्भि रंशै स्ततःपरम् ।
अंगुळिभ्यां तथा द्वाभ्यां गर्ते द्वे परिकल्पयेत् ।। २७२

आयते षड्भिरंशैश्च कुर्यात् मध्ये च रेखिकाम् ।
सा भवेत् एकयांगुळ्या गर्ते चाद्यंतसम्मिते ।। २७३

नासिकापुटवत् भूयात् गर्तद्वय समन्विता ।
रेखिकाया भवे दंतः गर्तयो रुभयोरपि ।। २

अर्थांगुळ मितं द्वारं आयामेन त्रिभागवत् ।
पृष्ठदेशं प्रकुर्वीत नाळिकेरस्य लोष्टवत् ।। २७

अधश्चतुर्भि र्भागैश्च कुर्यात् कोकनदं शुभम् ।
स्रुग्वदेवेतरत् सर्वं ततः कमलसंभव! ।। २७६

हस्तमात्र समायामौ स्वर्णेन रजतेन वा ।
ताम्रेण स्रुक्स्रुवौ कुर्यात् यद्वा याज्ञीयदारुणा ।। २७७

पुरैव सर्वं निर्माय प्रोक्ष्य पुण्याहवारिभिः ।

अग्निप्रतिष्ठा

अश्वत्थे वा शमीवृक्षे कारयित्वारणी मपि ।। २७८

द्वादशाक्षरमंत्रेण मथित्वा जातवेदसम् ।
सूर्यकान्ताश्मनो यद्वा संपाद्य द्विजसद्मनः ।। २७९

तमग्निं सर्पिषा प्रोक्ष्य प्रत्यक्कुंडस्य पश्चिमे ।
दक्षिणे वाऽथ विन्यस्य त्रीन् दर्भान् कमलासन! ।। २८०

कूर्मासनं निवेश्योर्ध्वं उपविश्यासने गुरुः ।
कृत्वा मानसयागांतं भूतशुद्धिं चतुर्मुख! ।। २८१

पर्यग्निकरणं कुर्यात् कुंडानां दर्भमुष्टिभिः ।
वैष्णवाग्निं च तं ध्यात्वा अग्नि संस्कारमाचरेत् ।। २८२

इतरेष्वपि कुंडेषु तस्मादेवाग्निमुद्धरेत् ।
प्रागादिष्वथ कुंडेषु समिद्धे जातवेदसि ।। २८३

प्राच्या माहवनीयोग्निः याम्ये वै दक्षिणामुखः ।
प्रतीच्यां गार्हपत्योग्निः उत्तरे सभ्य ईरितः ।। २८४

आग्नेय्या मावसत्थ्योग्निः पंचाग्नीना मयं क्रमः ।
प्रागादिकुंडाग्निमध्ये योगपीठं प्रकल्पयेत् ।। २८५

प्राक्कुंडे वासुदेवं तं याम्ये संकर्षणं ततः ।
प्रद्युम्नं पश्चिमे कुंडे अनिरुद्धं तथोत्तरे ।। २८६

नारायणं तदन्यत्र समावाह्य यथापुरम् ।
आज्यैर्जपांत माराध्य जुहुयान्मूर्तिपां स्ततः ।। २८७

पलाश खदिराश्वत्थ बिल्वोदुंबर वृक्षजैः ।
समिद्भि र्जुहुयादग्नौ प्रागादिषु यथाक्रमम् ।। २८८

अलाभे सर्वसमिधां होमः पालाशजै र्मतः ।
पायसान्नेन जुहुयात् प्राक्कुंडे पद्मसंभव! ।। २८९

कृसरे दाक्षिणात्येऽग्नौ गुडान्नं पश्चिमेऽनले ।
हरिद्रान्न मुदीच्याग्नौ मुद्गान्न मितराग्निषु ।। २९०

वासुदेवादिभि र्मंत्रैः होमः प्रागादिषु स्मृतः ।
मूर्तिमंत्रेण यष्टव्यं यद्वाऽष्टाक्षरविद्यया ।। २९१

पंचमेऽग्नौ गुरुस्सम्यक् पृथगष्टोत्तरं शतम् ।
समिद्भि स्स्वस्वमंत्रेण चरुणा षोडशाहुतीः ।। २९२

नृसूक्त षोडशर्ग्भिश्च स्वमंत्रै स्सर्पिषा पुनः ।
मूर्तिपेष्वथ जुह्वत्सु समिदाद्यैर्यथा विधि ।। २९३

आसाद्य बिंबनिकट मासीनश्चासने गुरुः ।
पंचभूतमयं बिंबं ध्यात्वा संहारमाचरेत् ।। २९४

तत्त्वोत्पादन संहार परमंत्रं ब्रवीमि ते ।

तत्त्वसंहारः

प्रणवं पूर्व मुद्धृत्य तत्त्वमंत्र मतःपरम् ।। २९५

नतिं तदनुचोद्धृत्य परमंत्र चतुर्थिकाम् ।
सर्गसंहारमंत्रोऽयं तत्त्वादीनां चतुर्मुख! ।। २९६

मंत्रमेनं समुच्चार्य क्रियानुगुणमूहयेत् ।
प्राणोपस्थेंद्रिययुतं चतुर्गुण समाश्रितम् ।। २९७

पृथिवीतत्त्व माचार्य स्तच्चतुर्थ्या समुद्धरेत् ।
अंते नतिं समुद्धृत्य पृथिवीं संहरेत्पुरा ।। २९८

पादादि जानुपर्यंतं संहृत्य पृथिवीं ततः ।
अपां पूर्ववदुद्धृत्य संहारो त्पादनाह्वयम् ।। २९९

समूह्य श्चापो नत्यंतं गुह्यांतं संहरेत्ततः ।
अग्नेः पूर्ववदुद्धृत्य नत्यंतं तत्समूह्य च ।। ३००

गुह्यादि नाभिपर्यंतं तत्त्वसंहारमाचरेत् ।
पूर्ववन्मंत्र मुद्धृत्य वायोरूहां विधाय च ।। ३०१

ततो नाभ्यादिनासांतं संहरे न्मंत्रवित्तमः ।
नभसो मंत्रमुद्धृत्य समूह्य च यथापुरम् ।। ३०२

मूर्धांतं संहरेन्नस्तो मनस्तत्वं समुद्धरन् ।
समूह्य हृदये चैव महंकारं धियं तथा ।। ३०३

प्रकृतिं च तथा जीवमूह्य संहारमाचरेत् ।
एवं संहृत्य तत्त्वानि पंचमाग्नि मुपेत्य च ।। ३०४

तत्त्वहोमः

आसीन आसने यद्वा प्राक्कुण्डमुपलभ्य वा ।
सङ्कल्प्य तत्त्वहोमार्थं तमग्निं परिषेचयेत्।। ३०५

अदितेत्यादिभि र्मंत्रैः प्रसुवेत्यावसानिकैः ।
पूर्वव न्मन्त्रमुद्धृत्य चोह्य स्वाहावसानिकम् ।। ३०६

जुहुयादाहुती रष्टौ प्रतितत्त्वं च सर्पिषा ।
पात्रांतरेऽपि संपातं प्रतिमंत्रं समाहरेत् ।। ३०७

स्वाहान्तं जुहुयादग्नौ नमोन्तं न्यासमाचरेत् ।
हुत्वाग्नौ तत्त्वमंत्रेण स्वाहान्तेन चतुर्मुख! ।। ३०८

संपाताज्येन तेनैव नमोंतेन ततःपरम् ।
वक्ष्यमाण प्रतीकेषु बिम्बं कूर्चेन संस्पृशेत् ।। ३०९

हुत्वादौ सर्वतत्त्वानि प्रासावी रावसानिकम् ।
परिषिच्य ततो न्यासं संपातेन समाचरेत् ।। ३१०

जीवं च प्रकृतिं बुद्धिं अहंकारं मनस्तथा ।
हुत्वा संपातमाहृत्य प्रतिमाहृदये न्यसेत् ।। ३११

विन्यसेत् शब्दतन्मात्रं प्रतिमा श्रोत्रयोर्द्वयोः ।
बिंबत्वचि न्यसेत् स्पर्शं रूपं लोचनयोर्न्यसेत् ।। ३१२

जिह्वायां रसतन्मात्रं गंधं नासातले न्यसेत् ।
श्रोत्रं तालुनि विन्यस्य त्वचं त्वचि चतुर्मुख! ।। ३१३

नेत्रेंद्रियं नयनयो र्जिह्वायां रसनामपि ।
नासातले न्यसेद्घ्राणं वागिंद्रियमथ न्यसेत् ।। ३१४

पाणीन्द्रियं न्यसेत् पाण्योः पादं चरणयोर्न्यसेत्।
पाय्विन्द्रियं तथाऽपाने मेहनं मेहने न्यसेत्।। ३१५

आकाशं सेंद्रियं ब्रह्मन्! समूह्य गुरुसत्तमः ।
न्यसेन्मूर्धादि नासांतं वायुमूह्य सहेंद्रियम् ।। ३१६

न्यसेन्नासादिनाभ्यन्त मग्निं सेंद्रियमूह्य च ।
न्यसेन्नाभ्यादि गुह्यांत माप ऊह्य सहेंद्रियाः ।। ३१७

न्यस्य गुह्यादिजान्वंतं पृथिवीं सेंद्रियां तथा ।
समूह्य विन्यसेत् ब्रह्मन्! जान्वादि चरणावधि ।। ३१८

न्यासहोमेषु सर्वत्र कुर्यादाद्यंतयो र्द्वयोः ।
परिषेचन कर्माथ प्रतिमाया स्समर्चनम् ।। ३१९

परमंत्रः

परमंत्र मितो वक्ष्ये शृणुष्व कमलासन! ।
पूर्वमोंकार मुद्धृत्य नतिमंत्रं समुद्धरेत् ।। ३२०

पवर्गप्रथमादिं च रेफमप्युद्धरे त्ततः ।
अचां द्वितीय मुद्धृत्य यवर्ग प्रथमाक्षरम् ।। ३२१

समुद्धरे दचामादिं परमंत्र ष्षडक्षरः ।
प्राणानायम्य तदनु सङ्कल्प्य परिषिच्य च ।। ३२२

प्राणादिदशवायुन्यासविधिः

जुहुयात् प्राणमंत्रैश्च परमंत्रपुरस्सरम् ।
परमंत्रं समुच्चार्य प्राणनाम्न श्चतुर्मुख! ।। ३२३

चतुर्थीमपि चोच्चार्य स्वाहांतां होममाचरेत् ।
न्यसेन्नमोंत मुच्चार्य होमसंख्या च पूर्ववत् ।। ३२४

नाभिकंदा त्समारभ्य प्राणादिन्यासमाचरेत् ।
प्राणं तु ब्रह्मरंध्रांतं सुषुम्नायां चतुर्मुख!।। ३२५

अपानं वामनासान्त मिडायां न्यासमाचरेत्।
पिंगळायां न्यसेत् व्यान मन्यनासापुटावधि।। ३२६

गंधिन्यां वामनेत्रांत मुदान न्यासमाचरेत्।
समानं हस्तिजिह्वायां दक्षिणालोकनावधि।। ३२७

पूषायां विन्यसेन्नागं वामश्रोत्रांत मब्जज! ।
यशस्विन्यां न्यसेत् कूर्मं दक्षिण श्रवणावधि।। ३२८

अलंबुसायां कृकरं पायुमूलावधि न्यसेत्।
देवदत्तं कुहूनाड्यां मेढ्रान्तं विन्यसे त्सुधीः।। ३२९

विन्यसेदापदांगुष्ठं कैशिन्यां तु धनंजयम्।
परिषिच्याथ विन्यस्य संपूज्यासून्नियम्य च।। ३३०

संकल्प्य परिषिच्याथ पुनर्होमं समाचरेत्।

प्राणप्रतिष्ठाहोमविधिः

प्राणप्रतिष्ठाहोमोऽयं सर्वहोमेषु पूजितः।। ३३१

अनेन प्रतिमाशक्ति र्हुताग्निरिव वर्धते।
उद्धृत्य छंदसामादि मद्द्वितीयं सबिंदुकम्।। ३३२

महीबीजं समुद्धृत्य कवर्गादि मसप्तमम्।
प्रणवं च यवर्गेतु क्रमेणाष्टौ समुद्धरेत्।। ३३३

ओंकार मेकपंचाश द्वर्णानपि सबिंदुकान्।
हंसस्य प्रथमांचास्य सकलानीन्द्रियान्यपि।। ३३४

भूतानि पंचमात्राणि वचनाद्याश्च षट्क्रियाः।
त्वक्चर्ममांस रुधिर मेदोस्थीन्यपिमज्जिका।। ३३५

प्राणादिवायवस्सर्व इहायांतु पदद्वयम्।
सुखेन तिष्ठन्तु चिरं मां रक्षन्तु टटांतिकम्।। ३३६

जप्त्वाष्टौ जुहुयादग्नौ नमोन्तं सर्पिषा स्पृशेत्।
देवीनां च श्रियादीनां ब्रह्मादीनां तथैव च।। ३३७

प्राणप्रतिष्ठाहोमान्तं न्यासहोम उदीरितः।

आयुधन्यासः।

जुहुया दायुधान्यग्नौ परमन्त्र पुरस्सरम्।। ३३८

ततो नत्यन्तमुद्धृत्य संपाताज्येन संस्पृशेत्।
चक्रन्तु दक्षिणे हस्ते शंखं वामे गदामपि।। ३३९

पद्मन्तु दक्षिणे हस्ते शार्ङ्गं वै दक्षिणेतरे।
किरीटं मूर्ध्नि विन्यस्य वत्सं दक्षिण अक्षसि।। ३४०

कौस्तुभं हृदये न्यस्य वनमालां गळे न्यसेत्।
ऊरुमध्ये वैनतेयं होमन्यासौ समाचरेत्।। ३४१

देवीनां च श्रियादीनां ब्रह्मादीनां तथैव च।
चण्डादीनां च भक्तानां नायुधन्यास ईरितः।। ३४२

मत्स्यादि हरिमूर्तीना मादिमूर्तेश्च पद्मज!।
कर्तव्य आयुधन्यासो भगवद्रूपमेयुषाम्।। ३४३

कुर्वीत षोडशन्यास मादिमूर्ते र्गुरूत्तमः।

षोडशन्यासविधिः

न जंगमेषु कुर्वीत षोडशन्यास मुत्तमम्।। ३४४

नैवमत्स्यादि मूर्तीनां षोडशन्यास उच्यते।
सन्यासः परतन्त्राणा माश्रितानां प्रकीर्तितः।। ३४५

प्रणवन्यासः

प्राणानायम्य संकल्प्य परिषिच्य ततःपरम्।
कुर्वीत प्रणवन्यासं परमन्त्र पुरस्सरम्।। ३४६

अकारं हृदये विष्णु मुकारं दक्षिणोरसि।
ब्रह्माणं च मकारं च शङ्करं सव्यवक्षसि।। ३४७

परमन्त्रं समुच्चार्य वासुदेवं हृदिन्यसेत्।
तत्तन्नाम चतुर्थ्यन्तं होमो न्यासश्चकीर्तितः।। ३४८

अथ स्यात् व्याहृतिन्यासो होमश्च कमलासन! ।

व्याहृतिन्यासः

परमन्त्रं समुद्धृत्य तत्तल्लोक चतुर्थिकम्।। ३४९

स्वाहान्तं क्रमशो मन्त्रो नत्यन्तं वा यथारुचि।
भूलोकं पादयोर्ब्रह्मन्! भुवर्लोकं न्यसेद्धृदि।। ३५०

सुवर्लोकं न्यसेत् मूर्ध्नि वर्णन्यासं तत श्चरेत्।

अक्षरन्यासः

ओंकारं पूर्व मुद्धृत्य तत्त द्वर्णं सबिंदुकम्।। ३५१

नतिं परचतुर्थीं च गात्रशब्दस्य पद्मज!।
चतुर्थीं च ततस्स्वाहां नतिं न्यासे समुद्धरेत्।। ३५२

अकारः प्रथमोवर्णो जिह्वायां न्यास माचरेत्।
आकारं वदने ब्रह्मन्! इकारं दक्षिणेऽक्षिणि।। ३५३

ईकारं वामनयन उकारं कर्णगह्वरे।
ऊकारं वामकर्णे च ऋकारद्वय मब्जज! ।। ३५४

क्रमेण नासापुटयो र्द्वावृकारौ यथाक्रमम्।
दक्षिणोत्तरयो र्ब्रह्मन्! गंडयो रुभयोरपि।। ३५५

दन्तपङ्त्क्या मथोर्द्वायां एकारं तदनन्तरम्।
अधोदंत ततो ब्रह्मन्! ऐकारं विन्यसे द्बुधः।। ३५६

ओंकारमुत्तरोष्ठे चापि औकार मधरोष्ठके।
अंकारं विन्यसेत्फाल अःकारं तालुनोरपि।। ३५७

यकारं त्वचि विन्यस्य रेफं नयनयोर्द्वयोः।
लकारं नासिकामूर्ध्नि वकारं दशनात्मनि।। ३५८

शकारं श्रोत्रयो र्ब्रह्मन्! षकारमुदरे न्यसेत्।
सकारं विन्यसेत् कट्यां हकारं हृदये न्यसेत्।। ३५९

ळकारं विन्यसे न्नाभौ क्षकारं मेहने न्यसेत्।
ककारं चरणांगुष्ठे खकारः पादतर्जनी।। ३६०

गकारो मध्यमा तस्य घकार स्तदनामिका।
कनिष्ठिका ङकारोस्य तेषु न्यासं समाचरेत्।। ३६१

सव्येतरोरुमूले तु चकारं विन्यसेत् सुधीः।
तदूरुमध्ये विन्यस्य छकारं तदनन्तरम्।। ३६२

जकारं दक्षिणे जानौ तज्जंघाया मनन्तरम्।
झंकारं दक्षिणेपादे ञकारमपि विन्यसेत्।। ३६३

वामोरुमूले टकारं ठकारं तस्य मध्यतः।
डकारं च ढकारं च विन्यसेत् जानुजंघयोः ।। ३६४

णकारं विन्यसेत् पादे देशिको दक्षिणेतरे ।
सव्येतरभुजामूले तकारं विस्यसेद्बुधः ।। ३६५

थकारं तद्भुजामध्ये दकारं भुजसंधिके ।
धकारं कूर्परे तस्य नकारं दक्षिणेकरे ।। ३६६

पकारं विन्यसेद्वाम भुजमूले चतुर्मुख! ।
फकारं तद्भुजामध्ये बकारं भुजसंधिके ।। ३६७

तत् कूर्परे भकारं च मकारं तत्करस्थले ।

नक्षत्रन्यासः

नक्षरतन्यास मधुना वक्ष्यामि चतुरानन! ।। ३६८

परमंत्रं समुच्चार्य तत्तदृक्ष चतुर्धिकम् ।
प्रतीकस्य चतुर्थींच स्वाहांतं गुरु रुद्धरेत् ।। ३६९

एवं हुत्वा यथा पूर्वं नत्यंतं न्यास माचरेत् ।
रोहिणीं हृदये ब्रह्मन्! विस्यसे न्मस्तके मृगम् ।। ३७०

आर्द्रां केशेषु फालेतु विन्यसे च्च पुनर्वसुम् ।
विन्यसे द्वदने पुष्यं आश्लेषं नासिकांचले ।। ३७१

मखांदंतेषु विन्यस्य श्रोत्रयोः पूर्वफल्गुनी ।
सव्येतरभुजे ब्रह्मन्! न्यसेत् उत्तरफल्गुनीम् ।। ३७२

हस्तं वामभुजे चित्तां सव्येतरकरे न्यसेत् ।
वामहस्ततले स्वातीं विशाखां दक्षिणस्तने ।। ३७३

वामस्तनेऽप्यनूराधां ज्येष्ठा मुदरमंडले ।
मूलं कट्यामधाषाढां मेहने विन्यसेत्ततः ।। ३७४

विन्यसे दुत्तराषाढं वृषणे कमलासन ! ।
विन्यसेत् श्रवणं पायौ धनिष्ठां दक्षिणोरुके ।। ३७५

तत श्शतभिष गृक्षं वामोरौविस्यसेत्सुधीः ।
विन्यसे द्दक्षिणे जंघे पूर्वाभाद्रा मतःपरम् ।। ३७६

विन्यसे दुत्तराभाद्रां सव्यजंघापदे गुरुः ।
रेवतीं दक्षिणेपादे दस्रौ वामे ततःपरम् ।। ३७७

भरणीं दक्षिणेपार्श्वे सव्यपार्श्वेतु कृत्तिकाम् ।

नव्रग्रहन्यासः

एवं विन्यस्य तदनु ग्रहन्यासं समाचरेत् ।। ३७८

परमंत्रं समुद्धृत्य ग्रहनाम चतुर्थिकम् ।
अंगनाम चतुर्थी च स्वाहा मंते समुद्धरेत् ।। ३७९

सूर्यंतु दक्षिणे नेत्रे चंद्रं तदितरे न्यसेत् ।
उदरेऽगारकं ब्रह्मन्! बुधं बुद्धौ समर्चयेत् ।। ३८०

बृहस्पतिं न्यसे द्वाचि विन्यसे च्छुक्र मिंद्रिये ।
शनैश्चरं ललाटेच राहुं चरणयोर्द्वयोः ।। ३८१

केतुं केशेषु विन्यस्य नाभिदेशे ध्रुवं न्यसेत् ।
सप्तर्षीन् सर्वगात्रेषु विन्यस्य कमलासन! ।। ३८२

कालन्यासः

कालन्यासं प्रकुर्वीत संकल्पादि पुरस्सरम् ।
परतंत्रं पुरोद्धृत्य कालनाम चतुर्थिकम् ।। ३८३

स्वाहांत मुद्धरेद्धोमे न्यासे नत्यंत मुद्धरेत् ।
शरीरे वत्सरं ब्रह्मन्! चैत्रं शिरसि विन्यसेत् ।। ३८४

न्यसेन्मुखेऽथ वैशाखं ज्येष्ठंतु हृदये न्यसेत् ।
आषाढं श्रावणंचापि स्तनयोरु भयोः क्रमात् ।। ३८५

कुक्षौ भाद्रपदं ब्रह्मन्! कट्या माश्वयुजं न्यसेत् ।
दक्षिणोरौच कार्तिक्यं मार्गशीर्षं तदन्यतः ।। ३८६

तैषं दक्षिण जंघायां माघ मन्यत्र विन्यसेत् ।
विन्यसेत् फाल्गुनं मासं पादयो रुभयोरपि ।। ३८७

विन्यसे द्दक्षिणे बाहौ देशिको दक्षिणायनम् ।
तदन्यत्र स्यसे द्बाहौ उत्तरायण मब्जज! ।। ३८८

पर्वाणि पर्वसुन्यस्य सर्वांगेषु ऋतूनपि ।
अहोरात्राणि सर्वाणि विन्यसेत् सर्वसंधिषु ।। ३८९

त्रुट्यादीन् रोमसु न्यस्य ततः कृतयुगं मुखे ।
हृदये विन्यसे त्रैतां कट्यां द्वापर मब्जज! ।। ३९०

ततः कलियुगं ब्रह्मन्! विन्यसेत् पादयोर्द्वयोः ।
स्वायंभु स्वारोचिषेच उत्तमं तामसं तथा ।। ३९१

रैवतं चाक्षुषं चैव ततो वैवस्वतं तथा ।
अमूनि मन्वंतराणि विन्यसे द्दक्षिणेभुजे ।। ३९२

सूर्यदक्षब्रह्मधर्म रुद्रसावर्णिका न्यपि ।
भूति मन्वंतरं चापि भुजे वामेऽथ विन्यसेत् ।। ३९३

न्यसेद्दक्षणजंघायां परार्थं प्रथमं गुरुः ।
द्वितीयं वामजंघायां महाकल्पन्तु मस्तके ।। ३९४

प्रतीकानां चतुर्थींच स्वाहान्ता मुद्धरन् गुरुः ।
एवं हुत्वाथ विन्यस्य जातिन्यासं ततश्चरेत् ।। ३९५

जातिन्यासः

जातिप्रतीक मंत्राणां चतुर्थींतु टटांतिकाम् ।
परपूर्वां समुद्धृत्य होमो न्यासश्च पूर्ववत् ।। ३९६

ब्राह्मणं वदने ब्रह्मन्! क्षत्रियं बाहुमूलयोः ।
ऊरुमूलेन्यसे द्वैश्यं वृषळं पादयोर्द्वयोः ।। ३९७

पादांगुळीषु सर्वासु विन्यसेत् प्रतिलोमजान् ।
संधिष्वेवानुलोमांश्च गावश्च वदने न्यसेत् ।। ३९८

अजाविकान् न्यसेद्बाह्वोः ऊर्वोरपि अजाविकान्।
विन्यसे न्नागरारण्य पशून् पादे यथाक्रमम्।। ३९९

तोयन्यासः

तोयन्यासं ततः कुर्यात् मंत्रोद्धार पुरस्सरम् ।
परमंत्रं समुद्धृत्य ततस्तोय प्रतीकयोः ।। ४००

चतुर्थीं च ततस्स्वाहां नतिं यद्वा समुद्धरेत् ।
मेघान् केशेषु कूपानि रोमकूपेषु विन्यसेत् ।। ४०१

पादयोर्विन्यसेद्वापीः जंघयोर्निर्झरानपि ।
नदीश्च सर्वगात्रेषु कुक्षावब्धींश्च विन्यसेत् ।। ४०२

निगमन्यासः

निगमांश्च चतुर्थींच परमंत्र पुरस्सराम् ।
स्वाहानत्यंत मुच्चार्य निगमन्यासमाचरेत् ।। ४०३

ऋचं शिरसि विन्यस्य यजुर्वैदक्षिणे भुजे ।
साम वामभुजायां च हृदये चाप्यथर्वणम्।। ४०४

इतिहासं पुराणं च दक्षिणोत्तर जंघयोः।
सकलांगिरसंनाभौ कल्पसूत्रं पदद्वये।। ४०५

न्यसेत् व्याकरणं वक्त्रे कण्ठे तर्कं चतुर्मुख!।
मीमांसां हृदये ब्रह्मन्! निरुक्तं ज्योतिषं ततः।। ४०६

क्रमाल्लोचनयोर्न्यस्य गारुडं श्रोत्रयोरपि।
हस्तयोस्तु धनुर्वेदं योगशास्त्रं हृदि न्यसेत्।। ४०७

पादयोर्नीतिशास्त्रं च विन्यस्य तदनन्तरम्।

देवतान्यासः

कुर्वीत देवतान्यासं परमन्त्र पुरस्सरम्।। ४०८

देवताङ्गचतुर्थीं च स्वाहा नत्यवसानिकाम्।
उद्धृत्य होमं न्यासं च कुर्वीत कमलासन! ।। ४०९

ब्रह्माणं शिरसि ब्रह्मन्! जिह्वायां तु सरस्वतीम्।
इन्द्रं तु दक्षिणे बाहौ वामबाहू महाबलम्।। ४१०

स्तनयो र्विश्वकर्माणं प्रह्लादं च यथाक्रमम्।
नारदं दक्षिणे कुक्षौ अनन्तादीन् तदुत्तरे।। ४११

अस्थिदेशे च वरुणं पितॄंश्चरणयोरपि।
विश्वान्देवान् न्यसेदूर्वोः ऋषीन् जान्वोश्च विन्यसेत्।। ४१२

यक्षांसि जंघयोर्ब्रह्मन्! न्यसेत् रक्षांसि पादयोः।
विद्याधरान् पार्ष्णिदेशे पाददेशे नवग्रहान्।। ४१३

पृष्ठतो जृम्भकान् सर्वान् विन्यसेत् कटिपार्श्वयोः।
सुब्रह्मण्यं गणेशं च दक्षिणोत्तरयोः क्रमात्।। ४१४

उत्तरोष्ठे तु गन्धर्वान् अधरे चाप्सरो गणान्।

वैराजन्यासः

एवं विन्यस्य तदनु वैराजन्यास माचरेत्।। ४१५

मन्त्रोद्धारो यथापूर्वं अङ्ग स्वाहान्त मब्जज!।
मस्तके विन्यसे त्सर्वं सूर्यं दक्षिणलोचने।। ४१६

वामनेत्रे न्यसेच्चन्द्रं नासान्त र्मरुतस्तथा।
दिशो बाहुषु विन्यस्य हृदये विन्यसेदृषीन्।। ४१७

नभो वपुषि विन्यस्य दैवतान्यन्तरात्मनि।
केशेषु विन्यसेन्मेघान् नक्षत्राण्यपि भूषणे।। ४१८

मुखेऽग्निं गिरिवाणीं च विन्यस्याथ क्रतून् न्यसेत्।

क्रतुन्यासः

क्रत्वंगनाम्नोश्चतुर्थीं परमन्त्रपुरस्सराम्।। ४१९

स्वाहानत्यन्त मुद्धृत्य होमो न्यासश्च पूर्ववत्।
अश्वमेधन्तु शिरसि नरमेधं ललाटके।। ४२०

वदने राजसूयं च गोसवं तु गले न्यसेत्।
एकादशात्मकं नाभौ अग्निष्टोमं तु मेहने।। ४२१

अतिरात्रं वृषणयोः आप्तोर्यामं तथोरुषु।
जान्वोस्तु षोडशात्मानं विन्यसेत् जंघयोर्द्वयोः।। ४२२

उक्थ्यं च वाजपेयं च दक्षिणेतरयो स्ततः।
चातुर्मास्यं बाहुमूले हस्ते सौत्रामणिं न्यसेत्।। ४२३

सर्वाङ्गुलीषु पश्विष्टिं दर्शं दक्षिणलोचने।
पूर्णमासं तदन्यत्र स्तनयो रुभयोरपि।। ४२४

स्वाहाकारवषट्कारौ विन्यसेत्तु यथाक्रमम्।
ततः पंचमहायज्ञान् अङ्गुलीषु न्यसेत्सुधीः।। ४२५

दक्षिणां हृदये ब्रह्मन्! इष्टिस्तोमा न्कचेष्वपि।
मुख आहवनीयाग्निं गार्हपत्यं हृदि न्यसेत्।। ४२६

दक्षिणाग्निं न्यसेन्नाभ्यां आवसथ्यं पदद्वये।
हृदये विन्यसेत् सभ्यं प्रवर्ग्यं भूषणेष्वपि।। ४२७

विन्यस्य तदनु ब्रह्मन्! गुणन्यासं समाचरेत्।

गुणन्यासः

परमन्त्रं समुद्धृत्य मन्त्राण्यूह्य यथापुरम्।। ४२८

होमं न्यासं च कुर्वीत होमसंख्या यथापुरम्।
विन्यसे न्मस्तके सत्वं रजो वै बाहुमूलयोः।। ४२९

तमश्चरणयोर्न्यस्य मूर्तिन्यासं ततः श्चरेत्।

मूर्तिन्यासः

मन्त्रमूह्य यथापूर्वं होमं न्यासं समाचरेत्।। ४३०

मत्स्यमूर्तिं न्यसेन्मूर्ध्नि कूर्ममूर्तिं पदद्वये।
वराहं जंघयोर्नस्य फाले नरहरिं न्यसेत्।। ४३१

आनने वामनं ब्रह्मन्! हृदये भार्गवं ततः।
कार्तवीर्यं च करयोः हृदये राममब्जज!।। ४३२

बलभद्रं च कृष्टं च तथैव हृदये न्यसेत्।
गुह्ये बुद्धं ततः कल्कीं विष्णुं जान्वोश्च विन्यसेत्।। ४३३

शक्तिन्यासः

एवं विन्यस्य तदनु शक्तिन्यासं समाचरेत्।
मन्त्रमूह्येत् यथापूर्वं ललाटे विन्यसे च्छ्रियम्।। ४३४

सरस्वतीं मुखे ब्रह्मन्! रतिं गुह्ये चतुर्मुख!।
विन्यसेत् कर्णयोः प्रीतिं कीर्तिं लोचनयोरपि।। ४३५

विन्यसेत् हृदयं शान्तिं उदरे तुष्टिमब्जज! ।
सर्वगात्रेषु पुष्टिं च ज्ञानं तु हृदये न्यसेत्।। ४३६

ऐश्वर्यं मूर्ध्नि विन्यस्य शिखायां शक्तिमप्यथा।
बाहुमूले बलं ब्रह्मन्! तेजो नयनयो र्द्वयोः।। ४३७

विन्यसेत् परितोवीर्यं विशेष मवधारय।
नत्यन्तो हृदयोद्धारः स्वाहान्तस्तु शिरो मनुः।। ४३८

वौषडन्तश्शिखामन्त्रः बलान्ते कवचाय हुम्।
तेजो मन्त्रो वौषडन्त वीर्यमस्त्राय फड्युतम्।। ४३९

लोकविन्यासः

हुत्वा विन्यस्य तदनु लोकन्यास मथाचरेत्।
समूह्य तत्र मन्त्राणि परमन्त्र पुरस्सरम्।। ४४०

स्वाहावसाने जुहुयात् नत्यन्ते न्यासमाचरेत्।
अतलं पादतलयोः वितलं पादयोरपि।। ४४१

सुतलं गुल्फयो ब्रह्मन्! नितलं जंघयोरपि।
जान्वोर्महातलं न्यस्य चोर्वोरपि तलातलम्।। ४४२

कट्यामपि च पाताळं भूलोकं पादयोरपि।
भुवर्लोकं मेहने च सुवर्लोक मथोदरे।। ४४३

हृदयेऽथ महर्लोकं जनो लोकं गले न्यसेत्।
तपोलोकं च वदने सत्यलोकं च सस्तके।। ४४४

हुत्वाऽग्नौ विन्यसेत् बिंबे संपाताज्येन कूर्चतः।
न जंगमेषु बिंबेषु षोडशन्यासमाचरेत्।। ४४५

कृत्वैवं षोडशन्यासं ततः शान्तिं समाचरेत्।

शान्तिहोमः

ओं भूस्स्वाहेति मन्त्रेण मधुनाऽष्टोत्तरं शतम्।। ४४६

प्राचीनकुण्डे हुत्वाग्नौ संपातेन पदौ स्पृशेत्।
भुव स्स्वाहेति मन्त्रेण पयसाऽष्टोत्तरं शतम्।। ४४७

हुत्वाऽथ दाक्षिणात्येऽग्नौ देवस्य जठरं स्पृशेत्।
अष्टोत्तरशतं दध्ना सुवः स्वाहेति पद्मज! ।। ४४८

पश्चिमेऽग्नौ ततो देवमुखं कूर्चेन संस्पृशेत्।
ओं भूर्भुवस्सुव स्स्वाहे त्याज्येनाष्टोत्तरं शतम्।। ४४९

हुत्वोत्तरेऽग्नौ देवस्य सर्वाण्यंगानि संस्पृशेत्।
तत्रैव विष्णुगायत्र्या गुडाज्यमधुभिः पृथक्।। ४५०

अष्टोत्तरशतं हुत्वा तत्तत् संपातमाहरेत्।
प्रत्येकं संस्पृशे द्देवसर्वाङ्गं कमलासन! ।। ४५१

कुंभाम्बुसेचनम्

वेदिकाकोणभूमिष्ठ कुंभतोयै र्यथाक्रमम्।
विष्णुगायत्रिया सिंचेत् वैतस्या शाखया गुरुः।। ४५२

पलाशखदिराश्वत्थ बिल्वशाखाभिरब्जज!।
यथाक्रमन्ते सिंचेयुः मूर्तिपाः प्रतिमां ततः।। ४५३

संकीर्णविधिः

तत्वसंहारमारभ्य शान्तिकर्मावसानिकम्।
लोहशैलद्रु बिंबानां विधिरेष चतुर्मुख! ।। ४५४

अन्यत्र बहुबेरे च संहारोत्पादनादिकम्।
सदनेन्तः प्रविश्यैव शान्तिकर्मान्तमाचरेत्।। ४५५

श्रियादीनां च देवीनां ब्रह्मादीनां तथैव च।
प्राणप्रतिष्ठाहोमान्तं कर्मजालं यथापुरम्।। ४५६

न्यासकालेषु सर्वत्रा प्यर्घ्याद्यैरुपचर्य च।
अन्नं चतुर्विधं ब्रह्मन्! प्रणवेन निवेदयेत्।। ४५७

शयने देवदेवेशे भोगिनोऽप्येवमाचरेत्।
कृते जलाधिवासे तु भिन्नकाले चतुर्मुख!।। ४५८

प्रतिष्ठाकर्मसिद्ध्यर्थं रक्षाबंधन माचरेत्।
शयनादि प्रतिष्ठान्तं कुर्यात् कौतुकबन्धनम्।। ४५९

कंबलै र्बिंबमावेष्ट्य द्वारि चक्रं समर्चयेत्।

महाप्रतिष्ठाविधाने परिवाराणाम्

कुर्या न्महाप्रतिष्ठायां इन्द्रादीनां गुरूत्तमः।। ४६०

अधिवासादिकं कर्म यथापूर्वं पृथक् पृथक्।
सर्वेषां परिवाराणां पीठानां च चतुर्मुख! ।। ४६१

नेत्रोन्मीलन शय्यादि सर्वं पूर्ववदिष्यते।
तत्र तत्राग्रतः कुर्यात् कुण्डे वा स्थंडिलेऽथ वा।। ४६२

परिवाहाह्वयं होमं वैष्णवैः कारयेदपि।
प्रत्यावरणमासाद्य द्वारपालादि पद्मज! ।। ४६३

तदावरणदेवानां पीठानां च यथाक्रमम्।
द्वारस्थावरण पीठानां तत्तदावरणेष्वपि।। ४६४

कुर्यात् पृथक् पृथक् होमं यथाविधि चतुर्मुख! ।
समिधा चरुणाज्येन तत्तन्मंत्रै र्यथाक्रमम्।। ४६५

जुहुयात् षोडशचरून् अन्यदष्टोत्तरं शतम्।
हुत्वा तांस्तांश्च संस्पृश्य स्वाहा नत्यवसानिकः।। ४६६

व्रीह्यादिनिर्मिते पीठे दर्भानास्तीर्य देशिकः।
विन्यसेत् पिण्डिकामन्यां शिलामाधारसंज्ञिकाम्।। ४६७

अधिवास्याथ वस्त्रेण समाच्छाद्य प्रसन्नधीः।
यागमन्दिरमासाद्योत्थापयेत् प्रतिमामपि।। ४६८

ततोर्घ्यादिभिरभ्यर्च पायसान्नं निवेदयेत्।

बलिः

पललं रजनीचूर्णं लाजं दधि च सक्तु च।। ४६९

एभि स्संयोज्य बल्यन्नं बलिदानं समाचरेत्।
आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः।। ४७०

प्रसन्नाः परितुष्टास्ते बलिं गृह्णन्तु तेऽधुना।
वृक्षेषु पर्वताग्रेषु ये विदिक्षु च संस्थिताः।। ४७१

भूमौ व्योम्नि स्थिता ये च बलिं गृह्णन्तु तेऽपि च।
विनायकाः क्षेत्रपाला ये चान्ये बलिकांक्षिणः।। ४७२

पूष्णाद्याः पार्शदाश्चैव परिगृह्णन्त्विमं बलिम्।
चण्डाद्याः कुमुदाद्याश्च ये भूता स्सर्वतः स्थिताः।। ४७३

आगच्छन्तु पदे सर्वे गृह्णन्तुत इमं बलिम्।
आभिर्गाथाभि राचार्यः सर्वतो दिक्षु निक्षिपेत्।। ४७४

बालशक्तिः

ततो व्रीह्यादिभि र्धान्यैः स्थण्डिलं परिकल्पयेत्।
महाकुंभं सकरकं सोपकुंभाष्टकं न्यसेत्।। ४७५

इन्द्रादीनुपकुंभेषु महाकुंभे ततो गुरुः।
बालबिंबगतां शक्तिं करके च सुदर्शनम्।। ४७६

आवाह्य सम्यगभ्यर्च्य मूर्तिपैस्सह देशिकः।

पूर्णाहुतिः

पूर्णाहुतिं कारयित्वा यथाशास्त्रं चतुर्मुख! ।। ४७७

शयीत दर्भानास्तीर्य यजमानेन देशिकः।
प्रभाते गुरुरुत्थाय शांतिहोमं समाचरेत्।। ४७८

एकबेरविधाने

एकबेरविधाने तु द्वारदक्षिणपार्श्वतः।
वास्तुहोमं स्वयं हुत्वा तस्मिन्नग्नौ ततःपरम्।। ४७९

समिद्भिराज्यैश्चरुभिः विष्णुगायत्रिया पृथक्।
आहुतीनां शतं हुत्वा प्रविशेत् गर्भमन्दिरम्।। ४८०

वृत्तां वा चतुरस्रां वा शिलामाधारसंज्ञिकाम्।
मध्ये गर्भगृहं न्यस्य तस्या गर्तेषु पंचसु।। ४८१

मध्ये तु नवरत्नानि स्वर्णमैन्द्रेऽथ दक्षिणे।
राजतं पश्चिमे ताम्रं उत्तरे कांस्यमब्जज! ।। ४८२

यद्वा सर्वत्र रत्नानि यद्वा स्वर्णानि वा न्यसेत्।
तदूर्ध्वं पिण्डिकां स्थाप्य सुधया दार्ढ्यमाचरेत्।। ४८३

ततः कुर्वीत पुण्याहं पिण्डिकां प्रोक्षयेदपि।
प्रागाद्याशासु सर्वासु देवतावाहनं चरेत्।। ४८४

विमला मुत्कर्षिणीं च ज्ञानशक्तिं क्रियां तथा।
योगात्मिकां तथा प्रह्वीं सत्यामीशान संज्ञिकाम्।। ४८५

अनुग्रहमयीं शक्तिं कर्णिकायां समर्चयेत्।
अभ्यर्च्य गंधपुष्पाद्यैः पिण्डिकायां श्रियं यजेत्।। ४८६

नवेन वाससाऽच्छाद्य द्वारि चक्रं समर्चयेत्।
यागमंदिरमासाद्य द्वारतोरणकुंभके।। ४८७

स्थितान्देवान् समुद्वास्य ततः कुण्डस्थितानपि।
उरपरिष्टात् तन्त्रपूर्वं देवस्य हृदयांबुजम्।। ४८८

आरोप्य कुंभोपकुंभान् मंगलाष्टकमप्यथ।
उद्धृत्य मूर्तिपैस्साकं गृहीत्वा करकं गुरुः।। ४८९

अच्छिन्नया गलद्वारि धारया सेचयन् पुरा।
मार्गं प्रदक्षिणीकृत्य धामान्तः प्रविशेत् ततः।। ४९०

धान्यपीठे ततः कुंभान् स्थापयित्वा ततःपरम्।
यागमंदिरमासाद्य ब्राह्मणाना मनुज्ञया।। ४९१

हस्ताभ्यां देवमादाय वेदवाद्ये प्रवर्तिते।
स्वयं न्यस्तः षडङ्गस्सन् परिक्रम्य च मन्दिरम्।। ४९२

ततो गर्भगृहद्वारि संपूज्य प्रतिमां गुरुः।
अन्तः प्रवेशयित्वाऽथ परिक्रम्य च पिण्डिकाम्।। ४९३

सुमुहूर्ते ध्रुवाद्यौ रित्युच्चरत्सु द्विजातिषु।
देवस्य पुरतःस्थित्वा सर्वविद्यां जपन् गुरुः।। ४९४

संस्थाप्य पिण्डिकामध्य ऊर्ध्वलंबिततन्तुना।
निश्चित्य समतां पश्चात् पिण्डिकारंध्रनालयोः।। ४९५

चूर्णगुग्गुललाक्षाभिः कषायमधुसूक्तिभिः।
तूलेन चाथलिङ्गेन नवनीतेन पद्मज! ।। ४९६

अष्टबन्धनम्

जनितेनाष्टबंधेन दार्ढ्यं कुर्यादतन्द्रितः।
अष्टबंधन संयोगं अद्य वक्ष्ये शृणुष्वह।। ४९७

चूर्णं सार्धैक भागस्यात् भागैकं गुग्गुलं भवेत्।
अर्धभागा भवेल्लाक्षा कषायं तु तदर्धकम्।। ४९८

मधूच्छिष्टं तदर्धन्तु तूललिंगे यथामति।
नवनीतं यथायोगं द्रव्याण्यष्टौ चतुर्मुख! ।। ४९९

उलूखले तु मुसलैः कुट्टये दष्टबन्धनम्।
दृढीकृत्याथ पुण्याहं वाचयित्वा तदंबुभिः।। ५००

प्रोक्षयित्वा वक्ष्यमाण विधिनावाहनं चरेत्।
आवाहयामि तं देवं तमसः परमव्ययम्।। ५०१

आनंदं सर्वगं नित्यं व्योमातीतं परात्परम्।
मरीचि चक्रमध्यस्थं वासुदेव मजं विभुम्।। ५०२

ध्यात्वैवं द्वादशार्णेन देव मावाहयेत् गुरुः।
ब्रह्मरंध्र पथा बिंबे तं प्रविष्टं विचिंतयेत् ।। ५०३

महाकुंभस्थितं देवं मूलमंत्रेण देशिकः।
कूर्चेन प्रतिमा मूर्ध्नि प्रोक्ष्य शक्तिं नियोजयेत्।। ५०४

प्रणवेन ब्रह्मरंध्रं अपिधाय ततः परम्।
सान्निध्य प्रार्थनां कृत्वा मंत्रन्यासं समाचरेत्।। ५०५

कुंभतोयावशेषेण पूर्वोक्त विधिना गुरुः।
परिवारान् समावाह्य यथाविधि समर्चयेत्।। ५०६

निवेद्य पायसान्नं च वासोभिः कंबलै रपि।
आवेष्ट्य सर्वतो बिंबं कवाटेन दिनत्रयम्।। ५०७

बंधयेत् मंदिरद्वारं ब्राह्मणानपि तोषयेत्।
चतुर्थेऽहनि संप्राप्ते कवाटोद्घाटनं चरेत्।। ५०८

स्नापयित्वा यथाशास्त्रं ध्वजारोहण पूर्वकम्।
महोत्सवं प्रकुर्वीत बहुबेरविधिं शृणु।। ५०९

बहुबेरे

चित्रादिकं चेत् तद्बिंबं रत्नन्यासं चतुर्मुख! ।
शूलस्थापन वेळायां एव कार्य स्ततः परम् ।। ५१०

प्रतिष्ठा समये गर्भगेह मासाद्य देशिकः ।
मार्जनाद्यै र्गुरुर्गेहर संशोध्य तदनंतरम् ।। ५११

ब्राह्मेन्यसे दर्चनाख्यं पीठं दैवे स्थिति र्भवेत् ।
मानुषे तु परीवाराः पैशाचेऽप्यायुधानि च ।। ५१२

किंचिन्मानुष माश्रित्य दैवे स्यादासनं विधे! ।
दिव्य मानुषयो श्शय्या पैशाचे यानमुच्यते ।। ५१३

दैवे देव्यः स्थापनीयाः पादमूले स्थितस्य च ।
अन्येषामासनादीनां रत्नन्यासस्तु पृष्ठतः।। ५१४

कर्मार्चादीनि बिम्बानि कुंभैस्सह समुद्धरेत्।
मूर्तिपैः स्वयमाचार्यः करकं करयोर्धरन्।। ५१५

वेदे वाद्ये च संघुष्टे देवस्याग्रे चतुर्मुख!।
गळन्तिकांबुना सिंचन् मार्ग माचार्य बिंबयोः।। ५१६

न कश्चिदंतरायायात् तथागारं परिक्रमेत् ।
गर्भमंदिर मासाद्य द्वारि देवं समर्चयेत् ।। ५१७

अंतःप्रविश्य कर्मार्चां अर्चनापीठिकोपरि ।
नृसूक्तेन निवेश्याथ चोत्सवादीनि पार्श्वयोः ।। ५१८

निवेश्य धाराशेषांबु शरावे पूरये द्गुरुः ।
शलाकमात्राधाराभिः बिंबानां परिषेचनम् ।। ५१९

कृत्वा देवस्य पुरतो धान्यपीठे निवेशयेत् ।
कुंभानथो वक्ष्यमाण विधिनावाहनं चरेत् ।। ५२०

पुरतो मूलबेरस्य चासीनः परमासने ।
मुहूर्ते शोभने प्राप्ते प्राणानायम्य चिंतयेत् ।। ५२१

आवाहनम्

वासुदेवमजं शांतं उज्ज्वलन्तं निरंजनम् ।
चिन्मयं तत्परंब्रह्म षाड्गुण्यपरिकर्मितम् ।। ५२२

निर्विकारं निराकारं निष्कलंकं निरामयम् ।
सहस्ररविवह्नींदु तेजोमंडलमंडितम् ।। ५२३

एवं ध्यात्वा सदा विष्णुं महाविष्णौ नियोजयेत् ।
महाविष्णुं ततो विष्णौ विष्णुं हृदयपंकजे ।। ५२४

ततः पुरुषमंत्रेण रचये दंजलिं हृदि ।
अंजलौ संस्मरेत्पद्मं तत्र भद्रासनं स्मरेत् ।। ५२५

तत्र ध्यायेत् हृदब्जस्थं विष्णुं विश्वात्मविद्यया ।
ब्रह्मरंध्र पथा बिंबे प्रविष्टं चिंतयेत्ततः ।। ५२६

सर्वमंत्रेण तद्बिंबे सर्वत्र व्याप्य संस्थितम् ।
ध्यात्वा महाकुंभगतां बालकुंभगता मपि ।। ५२७

बालोपकुंभशक्तीश्च देशिकोऽथ यथाक्रमम् ।
तत्तत् कुंभस्थितैः कूर्चैः प्रोक्षये न्मूलविद्यया ।। ५२८

शक्तीस्संयोज्य देवेन ब्रह्मरध्रं गुरूत्तमः ।
प्रणवेनापिधायाथ तन्मुद्रामपि दर्शयेत् ।। ५२९

संदृश्य परमामुद्रां साम्मुख्य याचयेदपि ।
प्रणम्योत्थाय सान्निध्यं प्रार्थ्य मुद्रां च दर्शयेत् ।। ५३०

मुद्रया स्वागतं चोक्त्वा यथार्हं न्यासमाचरेत् ।

विशेषन्यासः

सर्वत्र वा स्थितिन्यासः योषितां चेच्चतुर्मुख! ।। ५३१

न्यासं षडंगं कुर्वीत सृष्टिस्तु ब्रह्मणो विदुः ।
रुद्रस्य संहृतिन्यासः अन्येषां तु षडंगवत् ।। ५३२

चंडादि परिवारांस्तु स्थाप्य स्वेस्वे पदे गुरुः ।
महाकुंभजलेनैव सर्वत्रावाहनं चरेत् ।। ५३३

कुंभावशेष तोयेन बलिपीठं च सेचयेत् ।
महानसेऽग्निकुंडेन गार्हपत्य हुताशनम् ।। ५३४

प्रतिष्ठाप्य ततो देवं देशिको रचितांजलिः ।
भक्तवत्सल भक्ताना मभिप्रेतार्थदायक।। ५३५

प्रार्थयेत्वामहं देव मदनुग्रहकाम्यया ।
सन्निधत्स्व चिरं स्थाने कल्पिते श्रद्धया मया ।। ५३६

प्रसीद देवदेवेश! पूजामपि गृहाण मे ।
ग्रामस्य राज्ञो राष्ट्रस्य प्रजानामिंदिरा वरा ।। ५३७

देहि पुष्टिं च तुष्टिं च गतिं च परमां तथा ।
यजमान स्तदा ब्रह्मन्! गो भू स्वर्णमणीनपि ।। ५३८

पूजोपकरणं सर्वं धारापूर्वं समर्पयेत् ।

आत्मसमर्पणम्

आचार्यो यजमानस्य करयो रंजलिं स्वयम् ।। ५३९

पुण्याहवारिभिः प्रोक्ष्य रत्नैः पुष्पैश्च पूरयेत्।
अर्घ्योदकेन संप्रोक्ष्य यजमान स्ततःपरम्।। ५४०

स्वांजलौ रत्नकुसुमे स्वात्मानं चिन्तयन्तथा।
देवस्याननमालोक्य चेमां गाथा मुदीरयेत्।। ५४१

त्वया विना न मे किंचित् मां विना तव कस्तथा।
तस्मान्मामात्मसात्कर्तुं प्रसीद परमेश्वर!।। ५४२

भूमौ विन्यस्तपादानां भूमिरेवावलम्बनम्।
त्वय्येव प्रतिपन्नानां त्वमेव शरणं विभो!।। ५४३

इति प्रार्थयत स्तस्यांजलि पुष्पमणीनपि।
देशिकस्यांजलौ गृह्णन् द्वादशाक्षरविद्यया।। ५४४

आत्मानं यजमानस्य ध्यायन् स्वांजलि पंकजे।
अस्मद्गुरुभ्यो नम इत्युच्चरन् देवपादयोः।। ५४५

समर्पयेत् प्रतिष्ठान्ते वाद्यघोषपुरस्सरम्।
ततस्सर्वविधान्नानि देवाय विनिवेदयेत्।। ५४६

महानसे गार्हपत्ये समिद्भि श्चरुभि स्ततः।
आज्येन मूलमन्त्रेण नृसूक्तेन यथाविधि।। ५४७

हुत्वा पूर्णाहुतिं चापि बलिं दद्यात् यथापुरम्।
कवाटबन्धनं नैव बहुबेरे चतुर्मुख!।। ५४८

चतुर्थे दिवसे प्राप्ते चतुस्थानार्चनान्वितम्।
समाप्य स्नपनं ब्रह्मन्! ध्वजपूर्वोत्सवं चरेत्।। ५४९

देशिकं यजमानोपि गोभूवस्त्रादिभिर्धनैः।
पंचागभूषणाद्यैश्च तोषयित्वा ततःपरम्।। ५५०

शिबिकादिक मारोप्य निनयेत् सदनं स्वयम्।
ऋत्विजश्च यथावित्तं तथैव परिचारकान्।। ५५१

वैष्णवान् तोषयित्वाथ स्वयं स्वनिलयं विशेत्।

विभवमूर्ती प्रतिष्ठा

सर्वास्वपि प्रतिष्ठासु द्वादशाक्षरविद्यया।। ५५२

अथवा मूलमन्त्रेण स्वस्व मन्त्रै रथापि वा।
कुंभाभिमन्त्रणं कुर्यात् कुंडे वा पंचमेऽनले।। ५५३

मन्त्रन्यासश्च बिंबेषु सर्वमन्यत् पुरोदितम्।
अवतारेषु सर्वेषु मत्स्यादिषु यथाक्रमम्।। ५५४

तत्तत् देव्यादयः पूज्याः परिवारा श्चतुर्मुख!।

विना चतुर्थस्नपन षोडशन्यासकर्मणि।। ५५५

कर्मजालं यथापूर्वं समाप्य प्रोक्ष्य पूजयेत्।

कर्मबिम्बस्थापनम्

स्थापयेत् कर्मबिंबानि वक्ष्यमाणेन वर्त्मना।। ५५६

कर्मार्चां स्थापयेत् ब्राह्मे ब्राह्मे चोत्सवकौतुकम्।
उत्तरे स्थापयेत् ब्रह्मन्! तीर्थस्नपनकौतुके।। ५५७

शयनार्चां च बल्यर्चां न्यसेदुत्सवदक्षिणे।
यद्वोत्सवानि बिंबानि विन्यसेत् द्वारपार्श्वयोः।। ५५८

मंडपे वाभिषेकार्थे विन्यसे द्दक्षिणामुखम्।
महाकुंभगतां शक्तिं मूलबेरे नियोजयेत्।। ५५९

मूलबेरगतां शक्तिं दीपाद्दीप वदब्जज!।
कर्मार्चायां समावाह्य यथावत् परिपूजयेत्।। ५६०

कर्मार्चासंगतां शक्तिं उत्सवादिषु योजयेत्।
कर्मान्तेषु पुनः शक्तिं कर्मार्चायां नियोजयेत्।। ५६१

कर्मार्चायास्ततः शक्तिं मूलबेरे नियोजयेत्।

एकबेरविधाने

एकबेरविधाने तु तत्र पूजाविधिं शृणु।। ५६२

मूलबेरं प्रतिष्ठाप्य संप्रोक्ष्य च यथाविधि।
तत् प्रोक्षणावशेषेण प्रोक्षये दुत्सवादिकम्।। ५६३

नित्यं समर्चयेत् ब्रह्मन्! आह्वानोद्वासनं विना।
उत्सवादिषु कुर्वीत मूलदावाहनं गुरुः।। ५६४

ध्वजपूर्वोत्सवान्यत्र मूलान्नावाहनं मतम्।

देवीनां प्रतिष्ठा

प्रतिष्ठां देवदेवीनां शृणुष्व कमलासन!।। ५६५

स्थापनं देवदेवीनां समान समये यदि।
शयनादीनि सर्वाणि देवेन सह कारयेत्।। ५६६

देवप्रोक्षणशेषेण देवीनां प्रोक्षणं भवेत्।
भिन्नकाले यदि ब्रह्मन्! विशेष मवधारय।। ५६७

नवभिः पंचभिर्यद्वा कलशैः स्नपनं मतम्।
सर्वत्र श्रियमावाह्य स्वां स्वां मूर्तीं च मध्यमे।। ५६८

श्रीसूक्तेन स्नापयेच्च तोरणेषु यथाक्रमम्।
बलाकिनी वन्यमाला विभीषिकाथ शंकरी।। ५६९

कुंभेषु द्वंद्वशो ब्रह्मन् ज्येष्ठाविद्ये पुरा दिशि।
शुद्धाशान्ति स्ततो याम्ये श्रीस्तुष्टिः पश्चिमे ततः।। ५७०

उत्तरे तु क्षमावृद्धिः ध्वजेषु कमलासन!।
धृतिर्लज्जा पुरद्वारे जया माया च दक्षिणे।। ५७१

सावित्री च क्षमापश्चात् शुद्धिश्रद्धा स्तथोत्तरे।
ततश्चतुर्षु कुंडेषु प्रागादिषु यथाक्रमम्।। ५७२

लक्ष्मीं सरस्वतीं पुष्टिं तुष्टिं कुंभेषु पद्मज!।
वागीश्वरी क्रिया कीर्तिः लक्ष्मीः सृष्टिस्ततशृणु।। ५७३

प्रह्वी सत्या च ब्राह्मी च महाकुंभे श्रियं यजेत्।
सुदर्शनं च करक एवं वा स्नपने यजेत्।। ५७४

षोडशन्यासरहितं सर्वमन्यद्यथा पुरम्।

स्वतन्त्रे देवीनाम्

स्वतंत्रेऽस्तु विशेषोऽपि ग्रामेषु नगरादिषु ।। ५७५

मंदिरं कल्पयेत् ब्राह्मे यद्वा ग्रामाभिमुख्यतः ।
परितोपि विमानस्य तुष्टिं पुष्टिमतः परम् ।। ५७६

सावित्रीमपि वा देवीं कोणेषु विहगाधिपम् ।
चंडीं प्रचंडीं कुर्वीत गर्भद्वारस्य पार्श्वयोः ।। ५७७

बलाकिनीं वन्यमालां अर्धद्वारस्य पार्श्वयोः ।
विभीषिकां शांकरीं च नृत्तार्ध द्वारपार्श्वयोः।। ५७८

सर्वत्र गोपुर द्वारे पार्श्वे शंखनिधी उभे ।
विष्वक्सेने पदे ब्रह्मन्! शंखचक्रधरां शुभाम् ।। ५७९

वामेन वेत्रं दधतीं तर्जयंतीं तदन्यतः ।
कुर्यात् वेत्रवतीं ब्रह्मन्! प्रासादाभिमुखं ततः ।। ५८०

कल्पयेत् विहगाधीशं द्विभुजां वा चतुर्भुजाम् ।
शंखचक्रधरां यद्वा दधानां कमलद्वयीम् ।। ५८१

अभयं वरदानं च मुख्याभ्यां बिभ्रतीं श्रियम् ।
कल्पयित्वा गर्भगेहे परिवारान् हरे र्यथा ।। ५८२

परिकल्प्य प्रतिष्ठाप्य तुर्येऽह्नि स्नाप्यतां श्रियम् ।
ध्वजपूर्वोत्सवं कुर्यात् यथाविधि चतुर्मुख!।। ५८३

देवीनामुद्वाह विधिः

शृणुष्व देवदेवीनां पाणिग्रहण कर्मवत् ।
अंकुरा नर्पयित्वादौ गुरु र्वैवाहिकेऽहनि ।। ५८४

विवाह कौतुकं बध्वा वस्त्राद्यै र्मंडिते पृथक् ।
शिबिकां देवमारोप्य परिक्रम्य च मङ्गलैः ।। ५८५

विवाहमंडपं प्राप्य देवं तत्र समर्चयेत् ।
स्थंडिलेऽग्निं प्रतिष्ठाप्य देवीं नूतनवाससा ।। ५८६

आवेष्ट्य वेदैरन्यैश्च देवेनसह योजयेत् ।
असून् कर्ता समायम्य संकल्प्य तदनंतरम् ।। ५८७

जगत् कारणभूताय देवायास्मै स्वयंभुवे ।
मदीय गोत्रजां कन्यां देवी मस्मिन् महोत्सवे ।। ५८८

प्रजासहत्वकर्मेभ्यः सर्वतः प्रतिपादये ।

कन्यादानम्

इति गो भू हिरण्याद्यैः धारादान पुरस्सरम् ।। ५८९

कन्यां कनकसंपन्नां सर्वाभरणभूषिताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोक जिगीषया ।। ५९०

इति गाथामुदीर्यैव दद्यात् कन्यां स्वयंभुवे ।
गृहीतपाणिं तं देवं आसने विनिवेशयेत् ।। ५९१

अभ्यर्च्य देवं तदनु द्विजाज्ञां प्राप्य देशिकः ।

मांगल्यधारणम्

बध्नीया न्मंगळं सूत्रं देवीकंठे हरिं स्मरन् ।। ५९२

मंगळं भगवान् विष्णुः मंगळं मधुसूदनः ।
मंगळं पुंडरीकाक्षः मंगळं गरुडध्वजः ।। ५९३

बध्वा मंगळसूत्रं तत् मंत्रेणानेन देशिकः ।
उत्तराशामुखः स्थित्वा प्राणायाम मथाचरेत् ।। ५९४

संकल्प्य च परिस्तीर्य पुरस्तात् तन्त्र माचरेत् ।
योगपीठादिकं हुत्वा श्रीसूक्तेन चतुर्मुख! ।। ५९५

समिद्भि श्चरुणाज्येन जुहुयात् षोडशाहुतीः ।
आज्येन विष्णुगायत्र्या चतुर्विंशति चाहुतीः ।। ५९६

भूम्याश्च तद्वत् कुर्वीत विवाहो युगपद्यदि ।
अंकुरादि पृथक् कुर्यात् पर्यायेण चतुर्मुख! ।। ५९७

यौगपद्ये विवाहे तु चैकं प्रतिसरं हरेः ।
अग्निरेकोऽथ वा भिन्ने यथाभिमत माचरेत् ।। ५९८

श्रियं विनान्य देवीनां स्वस्व मन्त्रेण देशिकः ।
समिच्चरुघृतैः कुर्यात् प्रत्येकं षोडशाहुतीः ।। ५९९

ततस्तु विष्णुगायत्र्या चतुर्विंशाहुती श्चरेत् ।
ततः पुरुषसूक्तेन सर्पिषा षोडशाहुतीः।। ६००

लाजहोमं प्रकुर्वीत विष्णुसूक्तेन देशिकः।
अनलं त्रिः परिक्रम्य लाजशेषमतःपरम् ।। ६०१

प्रणवेन सकृत् हुत्वा पंचवारुणिकैरपि ।
पंचोपनिषदै र्मन्त्रैः प्रायश्चित्ताहुती श्चरेत् ।। ६०२

पूर्णाहुती स्ततः कुर्यात् द्वादशाक्षरविद्यया ।
ब्राह्मणान् तोषयित्वाथ घृतारोपण माचरेत् ।। ६०३

घृतारोपणम्

घृतं दूर्वांकुरं ब्रह्मन्! चन्दनं शालितंडुलम् ।
पात्रे निक्षिप्य हस्ताभ्यां विप्रास्ते देशिकादयः ।। ६०४

पादयोश्च कटौ मूर्ध्नि ब्रुवन्तो मंगळं क्रमात् ।
मधुपर्कं निवेद्याथ हाराद्यै र्मण्डयेत् ततः ।। ६०५

अभ्यर्च्य चाथ नीराज्य क्षिपेद्दिक्षु च पिंडिकाम् ।
यानमारोप्य कुर्वीत ततो ग्रामप्रदक्षिणम् ।। ६०६

ततस्तौ मंडपं नीत्वा उपचर्य च राजवत् ।
हविर्निवेद्य विप्रेन्द्रान् भोजयित्वा दिने दिने ।। ६०७

स्नपनं चोत्सवं कृत्वा होमपूर्वं चतुर्मुख! ।

शेषहोमः

तुर्येन्ह्यपरराज्यां वै शेषहोमं समाचरेत् ।। ६०८

समिदाज्यचरुप्रायैः अष्टोत्तरशताहुतीः ।
जुहुयात् स्वेन मूलेन पंचोपनिषदैरपि ।। ६०९

पूर्णाहुतिं ततः कृत्वा पंचमे दिवसे गुरुः ।
अभ्यज्य देवीं देवं च संस्नाप्य कमलासन! ।। ६१०

महाहविर्निवेद्याथ ग्रामे कुर्यान्महोत्सवम् ।
देवीनामितरासां च विवाहविधि रीदृशः ।। ६११

जामदग्न्यादिदेवीनां उद्वाह स्मार्तवर्त्मना ।
कृतोद्वाहं ततो देवं देव्यासह समर्चयेत् ।। ६१२

विमानप्रतिष्ठा

प्रतिष्ठान्तु विमानस्य श्रुणु वक्ष्ये यथाविधि ।
अंकुरानर्पयित्वादौ मृत्संग्रहपुरस्सरम् ।। ६१३

अब्लिंगाद्यै र्यथापूर्वं विमानं शोध्य पद्मज!।
हुत्वा शान्तिं यथापूर्वं कृत्वा कौतुकबन्धनम् ।। ६१४

दिङ्मूर्तीनां विमानस्य जले छायाधिवासनम् ।
कृत्वा शान्तिं ततो हुत्वा नयनोन्मीलनं चरेत् ।। ६१५

छायास्नपन कर्मापि समाप्य तदनन्तरम् ।
शाययित्वा ततो वेद्यां कूर्चद्वारा चतुर्मुख! ।। ६१६

द्वारतोरण मभ्यर्च्य महाकुंभे ततः परम् ।
सहस्रशीर्षं देवं सहस्राक्षं सहस्रपम् ।। ६१७

सहस्रकुंतलोपेतं सहस्रमकुटान्वितम्।
सहस्रादित्यसंकाशं सहस्रेन्दु निभाननम् ।। ६१८

सहस्रवाहनै र्युक्तं सर्वं दिङ्नासिकान्वितम् ।
प्रासादरूपिणं देवं ध्यात्वैवावाहयेत् गुरुः ।। ६१९

सुदर्शनं च करके प्रागादिषु हरेर्यथा ।
कुंडेषु पूर्ववत् होमो न्यासश्च कमलासन! ।। ६२०

तत्र जीवमपि ध्यायेत् व्यापकं तदुपाधिकम् ।
बुद्धिं च पिंडिकां पादात् अहंकारं तथैव च ।। ६२१

पादौ पादशिलाजंघे गर्भगेहं तथोदरम् ।
स्तंभान् बाहून् कटीन् चापि तथैव कटिमेखलाम्।। ६२२

जिह्वां वर्णं तथा नेत्रं प्रतीपद्वारमेहनम् ।
अपानं जलनिर्याणं नासिकां नासिकां तथा ।। ६२३

गवाक्षमक्षिग्रीवां च स्कंधकक्षि कपोलकौ ।
शिरश्च कलशं मांसं प्रलेपं स्पर्शनं सुधा ।। ६२४

अस्थीनि च शिलास्तत् स्थास्नायुदारुशिलाध्वजाः ।
केशरोमाणि कूर्चं स्यात् ध्यात्वा धाम पुमाकृतिम्।। ६२५

तत्र तत्र स्पृशेत् ब्रह्मन्! हुत्वा हुत्वा पुरा यथा ।
शान्तिं च पूर्ववत् हुत्वा दिङ्मूर्तीना मतःपरम् ।। ६२६

बलिं समन्ततो दत्वा मुहूर्ते शोभने गुरुः ।
महाकुंभोपकुंभांश्च मूर्तिपेषु वहत्स्वपि ।। ६२७

करकं स्वयमादाय कृत्वा धामप्रदक्षिणम् ।
विन्यस्य स्थंडिले चोर्ध्वं महाकुंभांबुभिः पुरा ।। ६२८

मूर्तिकुंभांबुभिः पश्चात् प्रोक्षयित्वा यथाक्रमम् ।
प्राणप्रतिष्ठां कृत्वाथ महाकुंभांबुशेषतः ।। ६२९

दिङ्मूर्तीः स्वस्वमंत्रैश्च प्रोक्षयेच्च यथाक्रमम् ।
नैवेद्यान्तं समभ्यर्च्य दिङ्मूर्तीश्च चतुर्मुख! ।। ६३०

मंडपानां गोपुराणां एक एव विधिर्भवेत् ।
आस्थानमंडपस्य स्यात् एककुंडविधानतः ।। ६३१

शेषं यथावत् कुर्वीत प्राकारस्य यथापुरम् ।
एककुंड विधानेन वर्मणा प्रोक्षणं चरेत् ।। ६३२

बलिपीठप्रतिष्ठा

बलिपीठ प्रतिष्ठां तु वक्ष्यामि श्रृणु पद्मज! ।
गर्भगेह समायाम विस्तारार्धं प्रकल्पयेत् ।। ६३३

बलिपीठं तदर्धं वाऽधिष्ठानादि मनोहरम् ।
त्रिधा विभज्य तत्कोटिं द्वाभ्यां पद्मं प्रकल्पयेत् ।। ६३४

अग्रे तु कर्णिकाक्षेत्रं भागेनैकेन पीठिकाम् ।
पीठिकायाश्च कोणेषु वैनतेयान् प्रकल्पयेत् ।। ६३५

विघ्नेशशिवपक्षीश दुर्गाः प्रागादिषु क्रमात् ।
पार्श्वयो र्बलिपीठस्य कल्प्यास्सोपानपंक्तयः ।। ६३६

गोपुरास्थानयोर्मध्ये कल्पयेत् बलिपीठिकाम् ।
प्राकाराङ्गणदेशेषु पीठानि परिकल्पयेत् ।। ६३७

कुर्यादायाम विस्तारं तालद्वयमितं तथा ।
मेखलात्रय संयुक्तं मध्ये कर्णिकयान्वितम् ।। ६३८

प्रत्यावरणदेशेषु स्थापयेत् दिग्विदिक्ष्वपि ।
ध्वजस्तंभस्य पीठं तु महापीठस्य पृष्ठतः ।। ६३९

मन्दिराभिमुखं पीठे स्तंभमेकं प्रकल्पयेत् ।
अंकुरार्पणकर्मादि शान्तिकर्मावसानिकम् ।। ६४०

प्रासादस्येव कृत्वाथ प्रोक्षये न्मूलविद्यया ।
तत् प्रोक्षणावशेषेण तद्दिङ्मूर्ती र्यथाक्रमम् ।। ६४१

उद्दिश्य पार्षदान् सर्वान् कर्णिकाया मतःपरम् ।
तत् प्रोक्षणावशेषेण पीठानामपि पद्मज! ।। ६४२

महानसप्रतिष्ठा

महानसप्रतिष्ठान्तु श्रुणु वक्ष्ये यथातथम् ।
अंकुरार्पणकर्मादि समाप्य तदनन्तरम्।। ६४३

कुंभमेकं तु संस्थाप्य मूलेनावाहयेत् हरिम् ।
एककुंड विधानेन सर्वं कृत्वा विमानवत् ।। ६४४

महानसस्थ चंडादि देवानां न्यासमाचरेत् ।
अग्निमीळेति मन्त्रेण चुल्यायां परिचारकाः ।। ६४५

चरूणां श्रपणं कुर्युः नित्यकुंडे हुताशनम् ।
प्रतिष्ठाप्य महाकुंभ जलेन प्रोक्षयेत् पुरा ।। ६४६

महानसो ततो द्वारे चंडयो रुभयोरपि ।
द्वारस्य दक्षिणे पार्श्वे क्षेत्रपालस्य पद्मज! ।। ६४७

यत्र भाति स्वयं लक्ष्मीः तत्र तां प्रोक्षयेत् ततः ।
धर्मं तु वामे चुल्यायाः अधर्मं दक्षिणे ततः ।। ६४८

पृष्ठतश्चापि धातारं विधातारं हुताशने ।
तत्र चुल्याभिवदनं लक्ष्मीमावाहयेदपि ।। ६४९

महाकुंभांबुभि श्चैवं आवाह्य तदनन्तरम् ।
कुंभतोयावशेषेण श्रीसूक्तेन ततःपरम्।। ६५०

महानसस्य कूर्चेन सर्वतः प्रोक्षणं चरेत्।

वापीकूपतटाकानाम्

वापीकूपतटाकानां सर्वं कृत्वा यथापुरम् ।। ६५१

कुंभे वरुणमावाह्य करके च सुदर्शनम् ।
इंद्रादीनन्य कुंभेषु चैककुंडे यथापुरम् ।। ६५२

हुत्वा कुंभांबुभिः प्रोक्ष्य गंगाद्या स्सरित स्ततः ।
आवाह्य तत्तोयमध्ये सालग्रामशिलां न्यसेत् ।। ६५३

प्रतिष्ठिततटाकादौ न शौचाद्यशुचिं चरेत् ।

पीठध्वजप्रभादीनां प्रतिष्ठा

पीठध्वज प्रभादीनां प्रतिष्ठा मवधारय।। ६५४

अंकुरार्पण कर्मादि सर्वं कर्म यथा पुरा ।
कुंभेष्वाशासु चेन्द्राद्याः करके तु सुदर्शनम् ।। ६५५

विशेषस्तु महाकुंभे ध्वजस्य विनतासुतः ।
पादुकासनपीठानां शेष एव हि देवताः।। ६५६

प्रभाया भास्करो ब्रह्मन्! वाहनानां खगेश्वरः ।
एककुंड विधानोऽयं सुलग्ने प्रोक्ष्य पूजयेत् ।। ६५७

घंटाधूपदीपानाम्

घंटाया धूपपात्रस्य दीपपात्रस्य पद्मज! ।
कुंडमेकं कुंभ एकः कर्मजालं यथा पुरा ।। ६५८

शब्दब्रह्म च घंटायाः धूपपात्रस्य पावकः ।
सूर्यस्या द्दीपपात्रस्य प्रोक्ष्य पूजासु योजयेत् ।। ६५९

वाद्यानि

पंचगव्येन शुद्धेरन् वाद्यानि कमलासन! ।

छत्रादीनाम्

छत्रादीनान्तु पुण्याह वारिणा प्रोक्ष्य देशिकः ।। ६६०

एकस्मिन् हि महाकुंभे चन्द्रं तत्र सभाजयेत् ।
एककुंडेऽथ जुहुयात् संहारोत्पादनं विना ।। ६६१

समिच्चरुघृतै र्हुत्वा संपाताज्येन संस्पृशेत् ।
प्रोक्षयेत् कुंभतोयेन ततो देवेन योजयेत् ।। ६६२

ध्वजस्तंभः

पंचगव्येन संक्षाळ्य ध्वजस्तंभं गुरूत्तमः ।
अंकुरादि यथापूर्वं समाप्य सकलक्रियाः ।। ६६३

वैनतेयं तथेन्द्रादीन् आवाह्य कलशेषु च ।
तत स्तत्त्वानि विन्यस्य प्रोक्षयेत् कुंभवारिभिः ।। ६६४

श्रीवत्सस्य

किरीटकौस्तुभमणि वनमालादि वर्मणाम् ।
महाकुंभे स्वमन्त्रेण किरीटादीन् दिशास्वपि ।। ६६५

मकुटादि आभरणानाम्

इन्द्रादीन् करके चक्रं आवाह्यैक हुताशने ।
हुत्वा तत्त्वानि विन्यस्य प्रोक्षयेत् कुंभवारिणा ।। ६६६

देवमाराध्य तदनु मंडयेत् मकुटादिभिः ।
अन्ते महोत्सवं कुर्यात् वासुदेवस्य पद्मज! ।। ६६७

हारादीनाम्

हारादि नूपुरान्तानां क्षालयेत् गन्धवारिभिः ।
स्थंडिले स्थापयेदग्नौ एकस्मिन् स्वस्व विद्यया ।। ६६८

संपाताज्येन संस्पृश्य प्रोक्षयेत् कुंभवारिणा ।
मंडयेत् देवदेवेशं द्वादशाक्षरविद्यया ।। ६६९

चक्राद्यायुधानाम्

चक्रादीना मायुधानां कुंभेषु दशसु क्रमात् ।
आवाह्य चैकस्मिन् कुंडे हुत्वा तत्त्वानि विन्यसेत् ।। ६७०

होम श्चतुर्षु कुंडेषु पुरुषः प्रकृतीनि चेत् ।
अन्ते संप्रोक्षयेत् ब्रह्मन्! देवेनसह योजयेत् ।। ६७१

चंडादि परिवाराणां दशकुंभाः प्रकीर्तिताः ।
एककुंडे तु यजनं सर्वमन्य द्यथापुरम् ।। ६७२

अनन्तगरुडविष्वक्सेनाः

अनन्तस्य खगेशस्य विष्वक्सेनस्य पद्मज! ।
चंडादीनां यथा तद्वत् सर्वमन्य द्यथापुरम् ।। ६७३

आदित्यस्य च तद्वत्स्यात् दिक्पालानां तथैव च ।
दुर्गादिमातरस्सप्त याश्चान्या देवतास्त्रियः ।। ६७४

तासां प्रतिष्ठा लक्ष्मीवत् विष्णुव द्ब्रह्मवेधसोः ।
उपकुंभाष्टके भेदः इन्द्राद्यावाहनं मतम् ।। ६७५

स्वस्वमूर्ती र्महाकुंभे सर्वमन्यत्र विष्णुवत् ।

अक्षमालाः

रत्नस्फटिक लोहाद्यैः निर्मिता मक्षमालिकाम् ।। ६७६

यद्वा पद्माक्षरुद्राक्ष धात्र्यक्षादि विनिर्मिताम् ।
पंचवारुणिकै र्मंत्रैः पंचोपनिषदैरपि।। ६७७

पंचगव्येन संक्षाळ्य प्रोक्ष्य पुण्याहवारिणा ।
तां पद्मपत्रे संस्थाप्य कुंकुमाद्यै र्विलिप्य च ।। ६७८

मंडयित्वा धान्यक्लुप्ते स्थंडिले चाधिवासयेत् ।
कुंभमेकं तु हेमाद्यं स्थापयेत् स्थंडिलान्तरे ।। ६७९

देवतामंत्रपुरुषं तमावाह्य समर्चयेत् ।
ततस्तु कुंडे चैकस्मिन् हुत्वा तत्त्वानि विन्यसेत् ।। ६८०

शान्त्यन्तं जुहुयादग्नौ प्रोक्षयेत् कुंभवारिभिः ।
सन्निधत्तां भवान् देव! मंत्रमूर्ते! जनार्दन! ।। ६८१

जपाक्षमालावलये भक्तानुग्रहकाम्यया ।
एवं ध्यात्वाथ भक्ताय तां दद्यात् अक्षमालिकाम् ।। ६८२

भक्त प्रतिष्ठा

भक्तबिंबप्रतिष्ठां तु श्रुणुष्व कमलासन! ।
सिंहदिङ्मूर्तिरहितं मन्दिरं कल्पयेत् पुरा ।। ६८३

नोपकुंभाष्टकं ब्रह्मन्! नैव शय्याधिवासनम् ।
सर्वमन्यत् यथापूर्वं भक्तानां कर्म शस्यते ।। ६८४

गृहार्चा

प्रतिष्ठां तु गृहार्चायाः यथाविध्यवधारय ।
अंकुरार्पण कर्मादि कुंभांबु प्रोक्षणावधि ।। ६८५

सर्वं कर्मयथापूर्वं विशेष मवधारय ।
केवलं जंगमं बिंबं यदि वेद्यां यथारुचि ।। ६८६

ध्रुवे चास्थानमानीय आवाह्य प्रोक्षणं चरेत् ।
द्वारे चंडप्रचंडौ च वैनतेयं पुरो भुवि ।। ६८७

ऐशान्यां क्षेत्रपालं च सेनानीं कमलासन! ।
वास्तुनाथं च तत्रैव दुर्गादेवीं च मारुते ।। ६८८

गृहं तु पश्चिमे भागे पार्श्वयो रुभयोरपि ।
शंखपद्मनिधी ब्रह्मन्! आवाह्याभ्यर्चये त्ततः ।। ६८९

यजमान स्ततो देवं दंडवत् प्रणिपत्य च ।
दासोऽस्मि तव देवेश! सपुत्रगणबान्धवः ।। ६९०

सन्निधत्स्व गृहे यावत् अन्ववायो ममाच्युत! ।
पूजां मम यथाशक्ती विहितां विकलामपि ।। ६९१

गृह्णीष्व भगवन्! भक्तजनानुग्रहकाम्यया ।
इति संप्रार्थयेत् ब्रह्मन्! गुरुणा चोदितस्वयम् ।। ६९२

गुरुं च ऋत्विजो विप्रान् तोषयेत् दक्षिणादिभिः ।। ६९३

इति श्रीपांचरात्रे श्रीविष्णुतिलके ब्रह्मोपदेशे
प्रतिष्ठाविधिर्नाम सप्तमोऽध्यायः

अथ उत्सवविधि र्नाम अष्टमोऽध्यायः

उत्सव विधिः

भगवान् देवदेवेशः प्रतिष्ठाविधि मुत्तमम् ।
उपदिश्य ततोऽस्मभ्यं निजगादौत्सवं विधिम् ।। १

औत्सवं विधि माख्यास्ये शृणु ब्रह्मन्! यथातथम् ।

ध्वजारोहणम्

उत्सवारंभणात् पूर्वं ध्वजारोहणमाचरेत् ।। २

गर्भद्वार समायामविस्तीर्णं पटमाहरेत् ।
तन्मध्ये विलिखेत् देवं कांचनाभं खगेश्वरम् ।। ३

गगने गमनाकारं पक्षद्वय परिष्कृतम् ।
नागैरष्टभिराकीर्णं बद्धांजलिकरद्वयम् ।। ४

सर्वाभरण संयुक्तं सुधाकुंभं च पार्श्वतः ।
विलिख्य शिल्पिना तस्य नयनोन्मीलनं चरेत् ।। ५

संगृह्य मृत्तिकां पश्चात् अंकुरार्पण माचरेत् ।
प्रणवेन पटं गृह्य देवस्याग्रे चतुर्मुख! ।। ६

विस्तार्य स्थंडिले देवं अर्घ्याद्यै रुपचर्य च ।
पुण्याहवारिभि स्तत्र पटस्य प्रोक्षणं चरेत्।। ७

सिद्धार्धैः अस्त्रमंत्रेण सन्ताड्य विहगाधिपम् ।
देवस्याननमालोक्य प्रार्थयेत् गाथयाऽनया ।। ८

भगवन्! पुण्डरीकाक्ष! सर्वेश्वर! जगन्मय! ।
त्वया यथा तु कथितं तथा कर्तुं न शक्यते ।। ९

अस्वातन्त्र्यात् असामर्थ्यात् श्रद्धादीना मभावतः ।
तदात्मनाद्य सर्वेषां न्यूनाधिक्योपशांतये ।। १०

समालोकय नेत्राभ्यां शीतलाभ्यां पटस्थितम् ।
सर्वदोषापहारिभ्यां वैनतेयं प्रसीदय ।। ११

इति प्रार्थ्याथ नीराज्य पटमुत्थाप्य देशिकः ।
यागमंदिर मासाद्य स्थापयेत् स्थण्डिलोपरि ।। १२

निबध्य कौतुकं ब्रह्मन्! कृत्वा छायाधिवासनम् ।
वास्तुनाथं समभ्यर्च्य नयनोन्मीलनं चरेत् ।। १३

कर्मांगस्नपनं कृत्वा शय्याया मधिवासयेत् ।
कुंभेष्वावाह्य संपूज्य हुत्वा तत्त्वानि विन्यसेत् ।। १४

समाप्य शांतिहोमांतं पटमुत्थाप्य पद्मज! ।
कृत्वा पूर्णाहुतिं वह्निं समारोप्य पटे गुरुः ।। १५

उपकुंभांबुभिः प्रोक्ष्य पटं कमलसंभव! ।
योगपीठं पटे कृत्वा गंधाद्यै रर्चयेत् ततः ।। १६

आवाह्य विहगाधीशं सान्निध्य प्रार्थनां चरेत् ।
महाबल! महाबाहो! वैनतेय! वयोधिप! ।। १७

सन्निधत्स्व पटे तुभ्यं नमः प्रणवमूर्तये ।
कर्मणां सिद्धिमाहूतः कुरुष्व विहगेश्वर! ।। १८

आहूतव्या स्त्रयो लोकाः त्वयि सन्निहिते विभो! ।
इति प्रार्थ्यार्घ्य दीपांतं अभ्यर्च्य च निवेद्य च ।। १९

महाकुंभस्य च तथा नैवेद्यांतं समाप्य च ।
स्तोत्रयेत् विहगेशानं शुद्धेनैवांतरात्मना ।। २०

मंत्रं श्री वैनतेयस्य जपन्नेव नयेन्निशाम् ।
प्रभाते देशिक स्स्नात्वा नित्मकर्म समाप्य च ।। २१

ततः पटं समुत्थाप्य देवागार प्रदक्षिणम् ।
कृत्त्वास्तंभ समीपोर्व्या मंदिराभिमुखं गुरुः ।। २२

संस्थाप्य मंदिरं गत्वा मंडयेत् बिंबमौत्सवम् ।
यानमारोप्य तदनु स्तंभस्य निकटं नयेत् ।। २३

महाकुंभं सकरकं समभ्यर्च्य प्रसन्नधीः ।
पटस्थं च ततः कुंभतोयेन प्रोक्षणं चरेत् ।। २४

ततो मंत्राणि विन्यस्य प्रागादिषु यथाक्रमम् ।
इंद्रादीन् सम्यगभ्यर्च्य खगेशानं समर्चयेत् ।। २५

निवेद्य च यथान्याय मिंद्रादीनां बलिं क्षिपेत् ।
भुंजते या स्त्रियः पिण्डान् बल्यर्थान् कमलासन! ।। २६

अपत्यलाभं तासां स्यात् सत्यमुक्तं चतुर्मुख! ।
अवशिष्टोदकैः पीठं बल्यर्थ्य मभिषेचयेत्।। २७

तदंबुशीकरं स्पृष्ट्वा योषितो गतविक्लबाः ।
ग्रहपीडानिवृत्ताश्च रुग्णो रोगात् विमुच्यते ।। २८

ध्वजवेण्वग्रविवरे तंतुभि स्त्रिगुणी कृते ।
पाशे ध्वजपटं ब्रह्मन्! बध्वा पुरुषविद्यया ।। २९

अनुज्ञातो द्विजश्रेष्टै स्स्तुवन् पद्यैः खगाधिपम् ।
सुपर्णोसीति मंत्रेण ध्वजारोपण माचरेत् ।। ३०

प्रार्थयेत् तत्र सान्निध्यं गाधया वक्ष्यमाणया ।
पक्षींद्र! पक्षविक्षेप तरंगानिलसंपदा ।। ३१

निरस्तासुरसंत्रास समरे शत्रुसूदन! ।
सन्निधत्स्व पटे यावत् उत्सवावभृथेक्षणम् ।। ३२

प्रार्थ्यैवं विहगाधीशं तत्र देवं समानयेत् ।
प्रदर्शयेत् खगाधीशं भगवन्निति गाथया ।। ३३

पुष्पाण्यंजलिनादाय तदा देवस्य सन्निधौ ।
गरुडाननमालोक्य गाथा एता उदीरयेत् ।। ३४

अस्माद्दिनात् समारभ्य यावत्तीर्थदिनं हरेः ।
सन्निधिं कुरु पक्षींद्र! राज्ञो जनपदस्य च ।। ३५

ग्रामस्य यजमानस्य वैष्णवानां महात्मनाम् ।
तुष्टये पुष्टये चैव सर्वशत्रुजयाय च ।। ३६

अपमृत्यु हरार्थाय वैनतेय! प्रसीद ओम् ।
इत्युदीर्याथ पुष्पाणि पटोपरि विकीरयेत् ।। ३७

कुर्वीत देवताह्वानं त्वयि देवपटस्थिते ।
आहूता रक्षणीयाश्च देवाद्या विहगाधिप! ।। ३८

इति प्रार्थ्य खगाधीशं देवस्य निकटं गुरुः ।
आसाद्य दंडवत् भूमौ नत्वा देवं विलोकयन् ।। ३९

ज्ञानतोऽज्ञानतो वाऽपि यथोक्तं न कृतं मया ।
तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा ।। ४०

ओमच्युत! जगन्नाथ! मंत्रमूर्ते! जनार्दन! ।
रक्ष मां पुंडरीकाक्ष! क्षमस्वाज प्रसीद ओम् ।। ४१

इति विज्ञाप्य तं देवं निनये न्मंडपान्तरम् ।
अभ्यर्च्य विधिवद्देवं यथापूर्वं निवेशयेत् ।। ४२

ध्वजस्य निकटे नक्त मनिर्वाणं प्ररोपयेत् ।
कर्मांतं विहगाधीशं अभ्यर्च्य विनिवेदयेत् ।। ४३

उत्सवारंभदिवसात् पूर्वेद्यु र्निशि पद्मज! ।

अधिवासविधिः

शय्यायां वासुदेवं तं देवीभ्यामधिवासयेत् ।। ४४

विधिं तस्य वदिष्यामि यथावदवधारय ।
त्रिभि र्भागवतै स्साकं देशिको गर्भमंदिरम् ।। ४५

आसाद्य गंधपुष्पाद्यै र्मूलबेरं समर्चयेत् ।
कर्मार्चायां मूलबेरात् तस्मात् उत्सवकौतुके ।। ४६

आवाह्य सन्निधिं प्रार्थ्य कर्मांतं सम्यगर्चयेत् ।
पुण्याहपूर्वं बध्नीयात् देव्या देवस्य वै करे ।। ४७

अर्चयित्वा निवेद्याथ कर्मांगस्नपनं चरेत् ।
मंडयित्वा सदेवीकं स्नातमुत्सवकौतुकम् ।। ४८

यथाविधि समभ्यर्च्य परमान्नं निवेदयेत् ।
प्रकल्पयेत् तत श्शय्यां प्रतिष्ठायां यथा गुरुः ।। ४९

देवीभ्यांसह देवेशं शाययेत् कोणभूमिषु ।
अनिर्वाणान् समुद्दीप्य दीपान् सांकुरपालिकाः ।। ५०

संस्थाप्य नित्याग्निकुंडे समिच्चरु घृतै स्ततः ।
मूलेन च नृसूक्तेन पूर्णाहुत्यवसानिकम् ।। ५१

हुत्वा देवं तत स्त्सुत्वा जागरेण निशां नयेत् ।
ततः प्रभाते देवीभ्यां देव मुत्थाप्य देशिकः ।। ५२

समभ्यर्च्य यथान्यायं गाथामेना मुदीरयेत् ।
प्रसीद देवदेवेश! उत्सवः क्रियते मया ।। ५३

अस्मात् काललवाद्यावत् पुष्पयागमहोत्सवः ।
त्वत् प्रीतये जगन्नाथ! यद्यत् कर्म करोम्यहम् ।। ५४

तत् सर्वमात्मसात्कृत्वा कृपया मे प्रसीद ओम्! ।
इति विज्ञाप्य तं देवं यानमारोप्य पद्मज! ।। ५५

आरोपितं ध्वजं दृष्ट्वा देवताऽनयनाय च।
नियुज्य गरुडं ग्रामं परिक्रम्य यथापुरम् ।। ५६

आस्थानमंडपे देव मवतार्य गुरूत्तमः ।
अभ्यर्च्य यागसंभारान् संभृतान्जनसंसदि ।। ५७

इतोयात मितोयात मितोयात मितीरियन् ।
दर्शयित्वा स्नापयित्वा समभ्यर्च्य यथाविधि ।। ५८

कर्मार्चायां समुद्वास्य मूलबेरे समुद्वसेत् ।

देवताह्वानम्

आरोपिते ध्वजे विष्णो र्देवताह्वान माचरेत् ।। ५९

यद्वा देवान् समाहूय ध्वजारोहण माचरेत् ।
बलिपीठस्य पुरतः क्षितिं गोमयवारिणा ।। ६०

आलिप्य रंगवल्ल्याद्यै रलंकृत्य प्रकल्प्य च ।
स्थंडिलं विलिखेत् तत्र कालचक्रं चतुर्मुख! ।। ६१

भेरीं निवेशये न्मध्ये नववासो विवेष्टिताम् ।
तद्दक्षिणस्यां कोणञ्च प्रविशेत् गर्भमंदिरम् ।। ६२

मूलबेरात् कर्मबिंबे ततोऽपि बलिकौतुके ।
समावाह्य समभ्यर्च्य सान्निध्यं प्रार्थयन् पुरा ।। ६३

उत्थाप्य भेरीदेशस्य पश्चिमे स्थंडिलोपरि ।
कालचक्रे विलिखिते भद्रपीठं निवेशयेत् ।। ६४

कौतुकं तत्र विन्यस्य नैवेद्यान्तं समर्चयेत् ।
भेरीकौतुकयोर्मध्ये कुंभमेकं सलक्षणम् ।। ६५

कुंभाष्टकं च परित स्स्थापयेत् स्थण्डिलोपरि ।
स्नातं मृदोर्ध्वतिलकं शुक्लांबरधरं शुचिम् ।। ६६

सोपवीतं दर्भपाणिं भेर्या स्तस्याः पुरो भुवि ।
स्थाप्य पारशवं तत्र स्थापयेत् गणिकाजनम् ।। ६७

ततः कुर्वीत पुण्याहं भेरीं पारशवं ततः ।
गाणिक्यमपि कोणं च प्रोक्षये दस्त्रविद्यया ।। ६८

भेरीमध्येऽर्चयेत् ब्रह्मन्! प्रकृतिं त्रिगुणात्मकाम् ।
दक्षिणोत्तरयो र्विष्णुं श्रियं तत्र सभाजयेत् ।। ६९

वायुं कोणे समावाह्य यथाविधि समर्चयेत् ।
सुलग्ने कोणमादाय शब्दतन्मात्र विद्यया ।। ७०

देवान् सर्वान् समाहूय स्वस्वनामभिरब्जज! ।
आहूय ताडयेत् भेरीं प्रत्येकं ताडनत्रयम् ।। ७१

आह्वानक्रमः

भेरीताडनवेळायां नृत्येच्च गणिकाजनः ।
आहूतव्या स्सर्वयज्ञा स्स्वाहा वौषट् समन्विताः ।। ७२

ब्रह्मा च सपरीवार आहूतव्यो महोत्सवे ।
विष्णुश्च सपरीवार स्सहपारिषदै स्तथा ।। ७३

आहूतव्य स्तथा रुद्रः प्रमधाद्यै स्समन्वितः ।
देवताश्च स्त्रयस्त्रिंशत् ऋषयश्च तपोधनाः ।। ७४

सिद्धविद्याधरा श्चान्ये नागा मानुषविग्रहाः ।
स्वर्गिणो यक्षरक्षांसि नद्यो विद्याश्च सागराः ।। ७५

आहूतव्याः पर्वताश्च स्वैस्वै र्नामभि रब्जज! ।
एवमुत्सवसेवार्थं देवानाहूय देशिकः ।। ७६

आवाह्य मध्यमे कुंभे तीर्थावधि समर्चयेत् ।
लोकपालान् समाहूय प्राक्कुंभादिषु पूर्ववत् ।। ७७

निवेद्यचाथ नीराज्य गुप्तदेशे निवेशयेत् ।
बलिबेरगतां शक्तिं मूलबिंबे निवेशयेत् ।। ७८

उत्सवविधिः

उत्सवारंभदिवसात् सप्तमे पंचमेऽहनि ।
तृतीयेऽण्न्यपि सद्यो वा कारये दंकुरार्पणम् ।। ७९

अष्टादशदिने यद्वा दशाहे तत्तथा न चेत् ।
नवमे दिवसे वापि कुर्यादवभृथोत्सवम् ।। ८०

प्रतिष्ठादिवसे यद्वा राज्ञो जन्म दिनेऽपि वा ।
मास नक्षत्र तिथिषु दर्शे वा तीर्थमाचरेत् ।। ८१

सागरे वा महानद्यां पुण्यतीर्थेऽथ वाऽब्जज! ।
वाप्यां वा पुष्करिण्यां वा कुर्यादवभृथोत्सवम् ।। ८२

तिथिष्वेव प्रकुर्वीत सागरेऽवभृथोत्सवम् ।
दर्शे वा पूर्णमास्यां वा नान्यत्र कमलासन! ।। ८३

नक्षत्रे वा तिथौ यद्वा नद्यादौ तीर्थमाचरेत् ।
तिथि नक्षत्र योगे तु तीर्थं सर्वगुणोत्तरम् ।। ८४

कलयावापि विद्धा चेत् तिथिर्वा यदि तारका ।
वर्जयित्वाऽथ तां विद्धां परेद्यु स्तीर्थमाचरेत् ।। ८५

कलामात्राऽवशेषा चेत् तिथिर्वा यदि तारका ।
तत्रोत्सवं प्रकुर्वीत सा हि सर्वगुणोत्तरा ।। ८६

तीर्थोत्सवं विनिश्चित्य द्वजारोहण माचरेत् ।
उत्सवारंभदिवस अपराह्णे चतुर्मुख! ।। ८७

विष्वक्सेनं पुरस्कृत्य यद्वा पक्षीश्वरं गुरुः ।
बहिर्निर्गत्य धरणीं संगृह्यांकुरमर्पयेत् ।। ८८

गर्भमंदिर मासाद्य देव मभ्यर्च्य तंत्रवित् ।
कर्मार्चायां समावाह्य तस्मादप्युत्सवादिषु ।। ८९

आवाह्य तत्र याचेत तीर्थान्तं सन्निधिं गुरुः ।
अर्चयित्वाथ बल्यर्चां तथा वै स्नानकौतुकम् ।। ९०

प्रापय्य यागसदनं स्थंडिलोर्ध्वं निवेशयेत्।
ततो गर्भगृहं प्राप्य प्रणम्य प्रार्थयेत् हरिम् ।। ९१

भगवन्! पुण्डरीकाक्ष! करिष्ये कौतकक्रियाम् ।
महोत्सवार्थं देवेश! तदर्थं त्वं प्रसीद मे ।। ९२

इति विज्ञाप्य शयन तीर्थकौतकवर्जितम् ।
देवीभ्यांसह सर्वेषां बध्नीयात् कौतुकं करे ।। ९३

गुरु स्स्वदक्षिणे हस्ते कृत्वा कौतुकबंधनम् ।
यागमंदिरमासाद्य कुंभस्थापनमाचरेत् ।। ९४

नवकुंभान् सकरकान् वेदिकायां यथाक्रमम् ।
स्थण्डिलोपरि संस्थाप्य पुण्याहमपि वाचयेत् ।। ९५

द्वारतोरणमभ्यर्च्य विन्यसे न्मंगळाष्टकम् ।
योगपीठं महाकुंभे तथान्येष्वपि कल्पयेत् ।। ९६

महाकुंभे मूलबेरात् तत् शक्तिं मूलविद्यया ।
सुदर्शनं च करके प्रागादिषु यथाक्रमम् ।। ९७

आवाह्य वासुदेवादीन् पुरुषादीन् विदिक्षु च ।
अभ्यर्च्य चाभिमंत्र्याथ चक्रपद्मं समर्चयेत् ।। ९८

प्रागादि सर्वकुण्डेषु वासुदेवादिकान् यजेत् ।
मूलादावाहयेत् ब्रह्मन्! आवसथ्ये गुरूत्तमः ।। ९९

पंचभिर्वा चतुर्भिर्वा त्रिभिरेकेन वाऽनलैः ।
यजेत तत्र सान्निध्यं तीर्थांतं प्रार्थये दपि ।। १००

घृतप्रसूनपुष्पाद्यै स्तत्तन्मंत्रै र्यथाक्रमम् ।
जुहुयु र्मूर्तिपा ब्रह्मन्! चरुभिश्च पुरोदितैः ।। १०१

परिवारहोमः

आवसथ्येऽनले यद्वा प्राक्कुंडे वा गुरुस्स्वयम् ।
पायसेनैव जुहुयात् परिवारान् यथाविधि ।। १०२

उद्धृत्य प्रणवं पूर्वं तत्तन्नाम चतुर्थिकम् ।
सपरीवार शब्दस्य चतुर्थ्या सहितं पुनः ।। १०३

तत स्स्वाहांत मुद्धृत्य होमः प्रोक्त श्चतुर्मुख! ।
ब्रह्मा प्रजापती रुद्रो देवा श्छंदांसि पद्मज! ।। १०४

ऋषयश्चापि गंथर्वा स्तथैव च सरीसृपाः ।
यक्षाश्चाप्सरसश्चैव मासाद्यैस्सह वत्सराः ।। १०५

समुद्राः पर्वताश्चैव प्रजा भूतानि पद्मज! ।
पशवश्च तथा वृक्षा स्तथैवौषधय स्स्मृताः ।। १०६

वनस्पति श्चोद्भिदश्च स्वेदजा श्चांडजास्तथा ।
जरायुजाश्च भूम्यादि सप्तलोका स्तथैव च ।। १०७

अतलाद्या स्सप्तलोका स्तथा चंडादि देवताः ।
प्रायश्चिताहुती र्हुत्वा चेदं विष्णिवतिमंत्रतः ।। १०८

हुत्वा पूर्णाहुतिं ब्रह्मन्! बलिदानं समाचरेत् ।
न दहेत् परिधीन् दर्भान् देवान्नोद्वासयेदपि ।। १०९

तीर्थांत मग्नीन् संरक्षेत् तावत् होमं दिने दिने ।
सायं प्रातश्च कुर्वीत यथावत् कमलासन! ।। ११०

बलिदानम्

बलिदानं ततः कुर्यात् होमांते प्रत्यहं गुरुः ।
पुरस्तात् यागसदने कुमुदादीन् प्रतिक्षिपेत् ।। १११

बल्यर्चा मन्त्रमूर्तिं वा पुरोधाय गुरूत्तमः ।
चण्डप्रचण्डयो र्द्वारे पुरस्तात् यागमण्डपे ।। ११२

गर्भमंदिरमारभ्य पंचावरणभूमिषु ।
गत्वा ग्रामं समासाद्य ग्राममध्ये चतुर्मुख!।। ११३

आहूय तत्र ब्रह्माणं बल्यर्थं देशिकोत्तमः ।
पीठे वा स्थंडिले यद्वा समावाह्य बलिं क्षिपेत् ।। ११४

ग्रामहीने क्षिपेत् ब्रह्मन्! बलिपीठसमीपतः ।
पूर्वाद्याशासु चेंद्रादीन् आहूयावाह्य पूर्ववत् ।। ११५

बलिं पीठे स्थंडिले वा प्रक्षिपेच्च यथाविधि ।
वहन् पारशवो भेरीं हूयमाने मरुद्गणे ।। ११६

कोणेन ताडयेत् ब्रह्मन्! त्रिवारं गुरुचोदितः ।
आहूयमाने चेंद्रादौ नृत्येयु र्गणिकाजनाः ।। ११७

जगन्मनोहरं तत्र गायेयु र्गीतिवेदिनः ।
वादयेयु र्वाद्यकज्ञा स्स्तोत्रयेयुश्च वंदिनः ।। ११८

नित्योत्सवार्चयासार्थं पंचावरणभूमिषु ।
ग्रामे बल्यर्चयासार्थं बलिदानं प्रशस्यते ।। ११९

यद्वा चक्रेण कुर्वीत भेर्या केवलयाऽथ वा ।
बलिशिष्टं क्षिपेत् पीठे कौतुकं तत्र पूजयेत्।। १२०

नीत्वाऽथ यागसदनं यथास्थानं निवेशयेत् ।
आरंभदिवसे रात्रौ समाप्तदिवसेऽहनि ।। १२१

एकामेकां बलिं दद्यात् मध्ये दद्यात् बलिद्वयम् ।
उपरागे संक्रमे वा प्राप्ते तीर्थदिने तदा ।। १२२

कालद्वये बलिं दद्यात् देशिकः पंचरात्रवित् ।

उत्सवबिंबयात्राविधिः

आसाद्य गर्भसदन मर्चयित्वा यथाविधि ।। १२३

उत्सवार्चां समादाय देवीभ्यां सह वा विना ।
आस्थानमंडपे देवं यानमारोप्य देशिकः ।। १२४

आराध्य मंत्रान् विन्यस्य निशाचूर्णं ततो हरेः ।
विन्यस्य पादयो ब्रह्मन्! पादुकामपि योजयेत् ।। १२५

यानं वहत्सु विप्रेषु वैनतेयं समर्चयेत् ।
देवाग्रे निनयेत् दीपान् घृतवर्ति समन्वितान् ।। १२६

गायकाश्चापि गायेरन् वादयेयुश्च वाद्यकाः ।
ताळादिसर्वं कुर्वीरन् तत्र वैताळिका जनाः ।। १२८

धूपांश्चैव बृहद्दीपान् धारयेयु स्समंततः ।
छत्रचामरवृन्तानि बिभृयुः परितो हरेः ।। १२९

घोषयेयु र्द्विजश्रेष्ठा वेदान् देवस्य पृष्ठतः ।
पठेयुः पद्यगद्यानि स्तुतिं वा देवपृष्ठतः ।। १३०

ग्रामं सर्वं परिक्रम्य अवरोप्य च मंडपे ।
आराध्य पृथुकादीनि निवेद्य च यथातथम् ।। १३१

पुनरुद्धाप्य देवेशं स्थापये न्मंदिरान्तरम् ।
न्यासपूर्वं समभ्यर्च्य निवेद्य तदनंतरम् ।। १३२

नीराज्य यानाद्देवेशं अवरोप्य ततःपरम् ।
यथास्थानं समावेश्य स्नापयेत् कलशै स्ततः ।। १३३

वीथीपर्यटने प्राप्ते स्नानं देवस्य कीर्त्यते ।
वीथीं गच्छति देवेशे यदि भक्ष्यादिकं पथि ।। १३४

अस्त्रमंत्रेण संप्रोक्ष्य देवाय विनिवेदयेत् ।
फलं वा यदि तांबूलं तूष्णीमेव निवेदयेत् ।। १३५

प्राप्ताभरण वस्त्राणि प्रोक्ष्यास्त्रेण नियोजयेत् ।
सायं प्रातः प्रतिदिनं वीथीभ्रमण माचरेत् ।। १३६

अन्नाद्यै र्द्विगुणै र्नित्यं मूलाय विनिवेदयेत् ।

चूर्णोत्सवम्

सप्तमेऽहनि सायाह्ने देवं स्नानार्चयासह ।। १३७

उत्तमाद्यैश्च कलशै स्स्नापयेत् गंधवारिभिः ।
उपचर्य च दीपांतं एकबेरे चतुर्मुख! ।। १३८

मूलबिंबे प्रकुर्वीत स्नपनं शास्त्रवर्त्मना ।
ततो देवस्य पुरत स्स्थंडिले धान्य निर्मिते ।। १३९

उलूखलं मण्डयित्वा विन्यसेत् वस्त्रवेष्टितम् ।
श्रीसूक्तेन श्रियं ध्यायन् अर्चयित्वाऽभिमंत्र्य च ।। १४०

मूलमन्त्रेण मुसले देवं ध्यायन् समर्चयेत् ।
निशातंडुलयो श्चूर्णं निक्षिपेदप्युलूखले ।। १४१

पठंतो मंगळं दास्यो गृहीत्वा मुसलं ततः ।
विमर्दयेयु र्निभृतं यथा सूक्ष्मतरं तथा ।। १४२

निशाचूर्णं तदादाय कुंभे वेष्टितवाससि।
निक्षिप्य स्थंडिले स्थाप्य कृत्वा कूर्चापिधानवत् ।। १४३

तत्र श्रियं समावाह्य समभ्यर्च्य यथाविधि ।
श्रीसूक्तेनाथ तच्चूर्णं देवं तमभिषेचयेत् ।। १४४

ततो देवं परिक्रम्य प्रणिपत्य गुरुस्स्वयम् ।
पुष्पांजलिं विकीर्याथ सायं कुर्यान्महोत्सवम् ।। १४५

जलद्रोण्यर्चनम्

जलद्रोण्यर्चनं ब्रह्मन्! अपराह्णेऽष्टमेऽहनि ।
कुर्वीत तद्विधिं वक्ष्ये शृणुष्व कमलासन! ।। १४६

निनयेत् सरसीतीरं देवीभिस्सह कौतुकम् ।
अवरोप्य प्रपायां तं निर्माय स्थंडिलं पुरः ।। १४७

कटाहं वा जलद्रोणीं विन्यसेत् स्थंडिलोपरि ।
गंधोदकै स्समापूर्य विकिरेत् परितोऽक्षतान् ।। १४८

ततो दर्भैः परिस्तीर्य प्रोक्ष्य पुण्याहवारिभिः ।
शोषणादि विधायात्रा गंगाद्या स्स्मरितोऽर्चयेत् ।। १४९

अब्लिंगाभि र्महामंत्रै रभिमंत्र्याथ तज्जलम् ।
गाथाभि र्वक्ष्यमाणाभि स्तमीशं प्रार्थयेद्गुरुः ।। १५०

भगवन् ! पुंडरीकाक्ष! शरणागत वत्सल! ।
अस्मिन्नहनि कर्तव्या जलक्रीडा त्वया विभो! ।। १५१

शुद्धये सर्वलोकानां देवानां प्रीतयेऽपि च ।
यात्रा तदर्थं कर्तव्या मदनुग्रहकाम्यया ।। १५२

इति प्रणम्य विज्ञाप्य देवमर्घ्यादिभि र्यजेत् ।
वाद्यवेदेषु घुष्टेषु देवीर्देवं च देशिकः ।। १५३

अब्लिंगा द्वारुणंसूक्तं जपंस्तत्रावगाहयेत् ।
नीराजनांत मभ्यर्च्य यथाविधि चतुर्मुख! ।। १५४

मृगयोत्सवः

उत्थाप्य यानमारोप्य निनयेत् मंडपांतरम् ।
तद्रात्रौ समलंकृत्य समारोप्य तुरंगमं ।। १५५

ग्रामसीम परिक्रम्य नयेत् उद्यानमंडपम् ।
अभ्यर्च्य विविधै र्भोगैः नयेत् धाम यथापुरम् ।। १५६

रथोत्सवः

नवमे दिवसे ब्रह्मन्! रथं पुण्याहवारिभिः ।
संप्रोक्ष्य वक्ष्यमाणेन वर्त्मनाऽवाहनं चरेत् ।। १५७

ब्रह्माणं तस्य शिखरे धनेशं समहेश्वरम् ।
तले द्वितीय आवाह्य चोपकंठे चतुर्मुख! ।। १५८

वासुदेवं समभ्यर्च्य तक्षकं प्रथमे तले ।
महापीठे तु गरुडं मध्यपीठे शृणुष्व ह ।। १५९

इंद्रादीन् प्रथमे पीठे कुमुदादीन् समर्चयेत् ।
चक्रे वायुं रथे ब्रह्मन्! वैनतेयं समर्चयेत् ।। १६०

हविर्निवेद्यैंद्रादिभ्यो बलिं दत्वा रथोत्तमम् ।
आरोप्य देवं कुर्वीत वीथीपर्यटनं गुरुः ।। १६१

अवरोप्य रथाद्देवं निनयेत् मंडपांतरम् ।
यत्समीपेऽस्ति नद्यादि तत्र देशिकसत्तमः ।। १६२

रात्र्युत्तरार्धे देवस्य मृगया दिवसे गुरुः ।
तीर्थबेरं समासाद्य गाथामेता मुदीरयेत् ।। १६३

तीर्थोत्सवः

तीर्थयात्रा त्वया कार्या श्वः प्रभाते सुरोत्तम! ।
तत्र प्रतिसरारंभं त्वमनुज्ञातुमर्हसि ।। १६४

इति विज्ञाप्य तीर्थार्थं कृत्वा प्रतिसरं तदा ।
अभ्यर्च्य स्थंडिले वेद्यां अधिवास्य यथाविधि ।। १६५

उत्सवानंतरं प्रात रुत्थाप्य कमलासन! ।
समयोत्सवबेरस्य प्रापय्य विधिपूर्वकम् ।। १६६

मंत्रासनादि नवभिः कलशैरभिषेचयेत् ।
कुर्यान्नद्यादि तीर्थानां दाहन प्लावनं ततः ।। १६७

पुण्याहवारिभिः प्रोक्ष्य गंगादिसरितो गुरुः ।
आवाह्याभ्यर्च्य विधिवत् कूर्चेनैव तदंबुभिः ।। १६८

कल्याणकौतुकं प्रोक्ष्य तत उत्सवसन्निधौ ।
तीर्थबेरं समादाय शिरसा धारयन् विधे! ।। १६९

नद्यादितीर्थमासाद्य चक्रमंत्र मनुस्मरन् ।
निमज्जन्नेव तद्बिंबं त्रिवारं मज्जयेत्सुधीः ।। १७०

तदा सर्वे निमज्जेयु र्लिप्सवो वा मुमुक्षवः ।
तदानीमेव बिंबानां स्वस्य कौतुकबंधनम् ।। १७१

विमुच्य तज्जले क्षिप्त्वा निनयेन्मंडपांतरम् ।
अभ्यर्च्य रात्र्यां पूर्वस्यां देव मास्थानमंडपे ।। १७२

सन्निवेश्य चतुर्वक्त्र! प्रविशेत् यागमंडपम् ।

अवरोहणम्

अभ्यर्च्य स्थापितान् कुंभानादाय गुरुसत्तमः ।। १७३

देवस्य पुरतो भूमौ धान्यपीठे निवेशयेत् ।
उत्सवांतोचितं कुर्यात् स्नपनं तद्यथाविधि ।। १७४

अंते कुंभांबुभि स्सर्वैः कूर्चै स्सेचनमाचरेत् ।
एकबेरे मूलबिंबे तीर्थबेरे परत्र चेत् ।। १७५

निवेदनांतं कृत्वाऽथ प्रविशेत् यागमण्डपम् ।
हुत्वा यथाविधि तत श्शांतिहोमं समाचरेत् ।। १७६

प्रायश्चित्तार्थमाज्येन पंचोपनिषदा गुरुः ।
ततः पूर्णाहुतिं हुत्वा विसृजेच्च हुताशनान् ।। १७७

तोरणादि स्थितान् देवान् उद्वास्य विधिपूर्वकम् ।
यानमारोप्य देवेशं ध्वजस्तंभं समाश्रयन् ।। १७८

तत्र पक्षींद्र मभ्यर्च्य महान्नं विनिवेदयेत् ।
प्रदक्षिणं परिक्रम्य संहारक्रममाश्रयन् ।। १७९

कुंभे ध्वजस्थमावाह्य मूलबेरे नियोजयेत् ।
सन्निधावुत्सवार्धस्य ध्वजं तमवरोपयेत् ।। १८०

उद्वास्य तत्र चेंद्रादीन् कुर्यात् वीथी प्रदक्षिणम् ।
तत्राप्यावाहितान् देवान् बल्यर्थं चतुरानन! ।। १८१

उद्वास्य मंदिरं नीत्वा यानात् तमवरोप्य च ।
उत्सवादीनि बेराणि प्रापयेत् गर्भमंदिरम् ।। १८२

अभ्यर्च्य तानि सर्वाणि जपेदष्टाक्षरं मनुम् ।
तत उद्वास्य तत् शक्तिं मूलबेरे गुरूत्तमः ।। १८३

अभ्यर्च्य च यथान्यायं नत्वा स्तुत्वा विशेषतः ।
प्रदक्षिणं परिक्रम्य स्वनिकेतनमाश्रयेत् ।। १८४

पुष्पयागविधिः

उत्तरेऽहनि तीर्थस्य सायाह्ने गर्भमंदिरे ।
ध्रुवबेरं समभ्यर्च्य प्रार्थयेत् परमेश्वरम् ।। १८५

भगवन्! पुंडरीकाक्ष! शरणागतवत्सल! ।
ध्वजार्थांकुरमारभ्य उत्सवावभृथांतिमम् ।। १८६

यन्मयानुष्ठितं कर्म तव सुप्रीतये विभो! ।
तथान्यै स्तदनुज्ञातै र्देशिकैश्चापि यत्कृतम् ।। १८७

साधकैश्च तथान्यैश्च विविधैः परिचारकैः ।
तत्तत् संपूरणार्थं च न्यूनाऽधिक्योपशांतये ।। १८८

त्वामद्यावसरे यष्टुं चतुस्स्थानस्थितं विभो! ।
प्रवृत्तमनुजानीहि मदनुग्रहकाम्यया ।। १८९

इति विज्ञाप्य चावाह्य गुरुरुत्सवकौतुके ।
संपूज्य यानमारोप्य निनयेन्मंडपांतरम् ।। १९०

न्यसेत् द्वाराणि चत्वारि मध्येमंडप मब्जज! ।
तन्मध्यदेशं शुचिभिः मृद्भि स्संपूरयेदपि ।। १९१

चतुरश्रं यथा कृत्वा गोमयेनानुलेपयेत् ।
दर्पणोदरवत् कृत्वा तत्र चक्राब्जमंडलम् ।। १९२

शोभांतं पूरयित्वाऽथ प्रोक्ष्य पुण्याहवारिभिः ।
न्यसेत् भद्रासनं तत्र देवं तत्र निवेश्य च ।। १९३

पुष्पयागं ततः कुर्यात् तत् प्रकारमिह शृणु ।
कर्णिकाबिंदुषु ब्रह्मन्! विन्यसेत् द्वादशाक्षरान् ।। १९४

विष्ण्वाद्या देवता स्तत्र गोविन्दांता यथाक्रमम् ।
कर्णिकायां वासुदेवं द्वादशाक्षर विद्यया ।। १९५

तत श्शोभांत मावाह्य पूर्वोक्तेनैव वर्त्मना ।
अर्घ्यादि भूषणांतैश्च नवभी रुपचर्य च ।। १९६

अर्चयेत् कर्णिकामध्ये वासुदेवं चतुर्मुख! ।
पंचवर्णैश्च कुसुमैः तन्मंत्रं पूर्वमुद्धरेत्।। १९७

फलं भवतु मे पुष्पैर्नम इत्यवसानिकम्।
अर्चयेत् हृदयाद्यंगं भूषणान्यप्यनंतरम् ।। १९८

चक्रादीन्यप्यथाभ्यर्च्य केसरादिषु पूर्ववत् ।
शंखावसानं कुसुमै स्तत्तन्मंत्रै र्यथाक्रमम् ।। १९९

ततः पुरुषसूक्तस्य ऋग्भिष्षोडशभि स्तथा ।
नारयणानुवाकैश्च विष्णुसूक्तैश्च पद्मज! ।। २००

पंचोपनिषदैर्मंत्रैः देवपादारविंदयोः ।
पुष्पैर्नमोंतं पुष्पाणि विन्यसेत् देशिकोत्तमः ।। २०१

धूपदीपौ ततो दत्वा नीराज्याथ महाहविः ।
निवेद्य तत्रैवाग्नेय्यां प्रतिष्ठाप्य हुताशनम् ।। २०२

समिच्चरुभि राज्येन पूर्णाहुत्यवसानिकम् ।
हुत्वा चाग्निं समुद्वास्य मंडलस्थ मतःपरम् ।। २०३

कौतुकं यानमारोप्य प्रथमावरणं नयेत् ।
सेवार्थमागतास्सर्वान् गंतुं स्वसदनं प्रति ।। २०४

नियुज्य मण्डपं नीत्वा नैवेद्यांतं समर्चयेत् ।
मंदिरांतर्भुवं नीत्वा एवं मूले नियोजयेत् ।। २०५

प्रणम्याज्ञानत इति विज्ञाप्य तदनुज्ञया ।
स्वधाम प्रविशेत् पश्चात् गुरुः पूर्णमनोरथः ।। २०६

यजमानश्च वित्ताद्यै स्तोषयित्वा यथातथम् ।
छत्रचामरवाद्याद्यैः आरोप्य शिबिकादिकम् ।। २०७

परिवारैस्सह गृहं गुरुं नीत्वा ततो व्रजेत् ।

पवित्रारोपण विधिः

संवत्सरोपचाराणां न्यूनाऽधिक्योपशांतये ।। २०८

चातुराश्रमधर्माणां तद्वत् दोषापनुत्तये ।
ज्येष्ठादिषु चतुर्मास्सु पवित्रोत्सवमाचरेत् ।। २०९

शुक्लपक्षेऽथ द्वादश्यां पौर्णमास्यामथापि वा ।
श्रवणे हस्त नक्षत्रे पवित्रारोपणं मतम् ।। २१०

कौशेयतंतूनथ वा कार्पासेयान् समाहरेत् ।
मुद्गचूर्णायुतै ब्रह्मन्! क्षाळयेत् शुद्धवारिभिः ।। २११

शोषयित्वाऽतपे तंतून् त्रिगुणीकृत्य तान् पुनः ।
त्रिगुणीकृत्य गोत्रायां शंकूद्वौ स्थापयेत् गुरुः ।। २१२

स्थाप्यायामानुसारेण पवित्राणि प्रकल्पयेत् ।
तंतुभीरष्टविंशद्भि र्जघन्यं परिकीर्तितम् ।। २१३

अष्टोत्तरशतै स्सूत्रै र्मध्यमं परिकीर्तितम् ।
इतोऽधिकै स्तथा सूत्रै रुत्तमं कमलासन! ।। २१४

मूलबेरादिबेराणां द्वात्रिंशद्भिर्युतं मतम् ।
कुंभमण्डलकुण्डानां तावत् ग्रंथिभिरन्वितम् ।। २१५

नेमि बाह्यपवित्राधो ग्रंथयस्स्यु श्चतुश्शतम् ।
बिंबानां मनुजानां वा नाभिमानं प्रकल्पयेत् ।। २१६

ग्रंथ्याह्वयपवित्रं तु हन्मानं परिकल्पयेत् ।
अलंकारपवित्रं तु जंघामानं चतुर्मुख! ।। २१७

मर्यादाख्य पवित्राणि जानुमानानि कल्पयेत् ।
किरीटादि पवित्राणि बहुग्रंथियुतानि च ।। २१८

देवस्य सहजे पीठे पीठमानं प्रकल्पयेत् ।
प्रभापवित्रं कुर्वीत तन्मानं कमलासन! ।। २१९

प्रतिमानां तु सर्वासां द्वात्रिंशत् ग्रंथिसंयुतम् ।
पात्राणां स्रुक्स्रुवादीनां मेखलानां च तादृशम् ।। २२०

हस्तमानायतं वह्नेः तावत् ग्रंथिसमन्वितम् ।
धूपदीपादि पात्राणां स्वच्छंदं ग्रंथिकल्पनम् ।। २२१

द्वादशांगुळमानानि धूपादीनां चतुर्मुख! ।
चंडादि परिवाराणां बहुग्रंथिसमन्वितम् ।। २२२

हस्तमानं पवित्रं स्यात् तोरणानां च पद्मज! ।
निर्मायैवं पवित्राणि सुपुष्पैर्मल्लिकादिभिः ।। २२३

आपूर्व रचयेंद्ग्रंथीन् चंदनेनानुलेपयेत् ।
पवित्रारोपण दिनात् सप्तमे पंचमेऽहनि ।। २२४

तृतीयेऽहनि सद्यो वा कारये दंकुरार्पणम् ।
उपोषितो गुरुर्ब्रह्मन्! मूर्तिपै र्गर्भमंदिरम् ।। २२५

प्रविश्य देवमभ्यर्च्य गाथामेना मुदीरयेत् ।
न्यूनातिरेकशांत्यर्थं पवित्रारोहणं परम् ।। २२६

अर्चनं भगवन्! सर्व दुरितोत्सारणक्षमम् ।
सम्पदांचापि सर्वासा मुत्पादकमनुत्तमम् ।। २२७

क्रियते तदविघ्नेन यथास्यात् कर्म चोदितम् ।
तदनुज्ञापयामि त्वा मनुजानीहि कर्म तत् ।। २२८

इति विज्ञाप्य देवेशं निनये न्मंडपांतरम् ।

एक बेरविषये

एकबेरविधानं चेत् क्रियामाणक्रमं शृणु ।। २२९

मूलबेरं समभ्यर्च्य स्नानांतं विधिपूर्वकम् ।
कृत्वा प्रतिसरं तस्य प्रविशे न्मंडपांतरम् ।। २३०

बहुबेरे तु कल्याणकौतुके कौतुकं चरेत् ।
मण्डपांतरमानीय बद्धकौतुकमब्जज! ।। २३१

संस्नाप्य विधिवद्देवं द्वारतोरण मर्चयेत् ।
स्थंडिलेऽथ पवित्राणि प्रागुदग्वा निवेशयेत्।। २३२

पुण्याहवारिभिः प्रोक्ष्य शोषणादि समाचरेत्।
गन्धद्रव्यै र्धूपयित्वा विकिरेत् कुसुमान्यपि।। २३३

नवेन वाससाच्छाद्य चक्रमुद्रां प्रदर्शयेत्।
अस्त्रमंत्रेण संपूज्य मण्डपं तंतुभिः क्रमात्।। २३४

ऐशानीं दिशमारभ्य चास्त्रेण परिवेष्टयेत्।
सुदर्शनं मण्डपोच्चै र्भूमौ पद्ममतःपरम्।। २३५

द्वारेष्वपि गदाशंखं ध्यात्वाऽष्टासु दिशास्वपि।
माषोदनेन भूतेभ्यो बलिं दत्वा यथाविधि।। २३६

वर्तयित्वाथ चक्राब्जं देवं तत्र निवेशयेत्।
अभ्यर्च्य च निवेद्याथ स्थंडिलेऽपि सलक्षणान्।। २३७

कुंभान्नव च विन्यस्य महोत्सवविधानतः।
सुदर्शनं च करके समावाह्य समर्चयेत्।। २३८

अग्नौ समिच्चरुघृतै र्हुत्वा संपातमाहरेत्।
सेचयित्वा पवित्राणि पवित्रारोहणं चरेत्।। २३९

एकबेरे पुरा मूलबेरेऽन्यत्र यदि शृणु।
कल्याणकौतुके पूर्वं कुंभेष्वथ तु मंडले।। २४०

ततस्तु ध्रुवबेरेऽपि पवित्रारोपणं मतम्।
तथा सर्वासु चार्चासु पंचवर्णै श्चतंतुभिः।। २४१

प्रासादमपि संवेष्ट्य जागरेण निशां नयेत्।
परेद्यु स्स्नाप्य देवेशं वर्तयेदब्जमंडलम्।। २४२

द्वारादियजनं कृत्वा देवं तत्राब्जमंडले।
विनिवेश्य यथापूर्वं कुंभानामर्चनं मतम्।। २४३

समिदाद्यैः पायसाद्यै स्तिललाजघृतादिभिः।
अष्टोत्तरशतं हुत्वा पवित्रैरब्जमंडलम्।। २४४

भूषयित्वा ततः कुंभकुंडतोरणभूषणम्।
पात्राणां च तथा कृत्वा प्रविशेत् गर्भमंदिरम्।। २४५

तत्र देवं मंडयित्वा तत्रस्थाना मतःपरम्।
श्रियादीनां च तदनु चंडादीनां यथाक्रमम्।। २४६

बलिपीठांतमारोप्य चेदं विष्णिवति मंत्रतः।
मूलमंदिर मासाद्य देवमभ्यर्च्य देशिकः।। २४७

मनुष्यार्थानि सर्वाणि देवपादारविंदयोः।
पुष्पवद्विन्यसेत् ब्रह्मन्! एवं सप्तसु पंचसु।। २४८

त्रिषु सद्योथ वा कृत्वा पूजाकाले दिने दिने।
पवित्रारोहणदिने पवित्राणि यथापुरम्।। २४९

आरोप्य तं समभ्यर्च्य स्नापयेत् कुंभपुष्करैः।
अग्नीन्विसृज्य देवेश मर्चयित्वा यथाक्रमम्।। २५०

न्यूनातिरेकशांत्यर्थं इमां गाथा मुदीरयेत्।
भगवन्! देवदेवेश! शंखचक्रगदाधर!।। २५१

संवत्सरोपचाराणां पूरणार्धं कृतं मया।
आराधनं गृहाण त्वं भक्तानां हितकाम्यया।। २५२

नाहं स्वतंत्रः किंचिच्च करोमि विहितं हितम्।
किंतु त्वत्प्रेरितं सर्वं करोमि न वशस्स्वयम्।। २५३

तत् क्षंतव्य मशेषेण क्रिया लोपाद्यनुष्ठितम्।
इति विज्ञाप्य तदनु देशिक स्तदनुज्ञया।। २५४

स्वस्मै पवित्रं पुरतो यत्यादीनां ततःपरम्।
दत्वा तानि पवित्राणि यानमारोप्य तं विभुम्।। २५५

धाम सर्वं परिक्रम्य मंदिरान्तर्भुवं नयेत्।
प्रत्यहं देवदेवस्य पवित्रारोहणावधि।। २५६

सायाह्न उत्सवं कुर्यात् सर्वमंगळसंयुतम्।
जपेयु र्वैदिका वेदान् पवित्रार्थ महोत्सवे।। २५७

तीर्थोत्सवः

वैशाखाषाढ कार्तीक्य माघमासेषु पर्वसु।
अरुणोदयवेळायां कुर्यात् तीर्थोत्सवं हरेः।। २५८

वसंतोत्सवः

चैत्रवैशाख मासे वा वसंताख्य महोत्सवः।
यद्वा ग्रीष्मऋतौ कुर्यात् पुष्पोद्यान जलाशये।। २५९

मण्डपे देवमानीय शैत्यसौरभ्य वस्तुभिः।
उपचर्य यथापूर्वं मंदिरान्तर्भुवं नयेत्।। २६०

कल्हारोत्सवः

चैत्रे वैशाखमासे वा पौर्णमास्यां गुरूत्तमः।
कल्हारकुसुमैः कुर्यान्मंडपं सुमनोहरम्।। २६१

कल्हारकुसुमै र्देवर मंडयित्वा यथाविधि।
तैरेव कुसुमै र्हुत्वा देवस्योत्सव माचरेत्।। २६२

माघमासे पौर्णमास्यां कल्हार कुसुमैर्यथा।

दमनोत्सवः

तथा दमनिकाभिश्च मंडनं होममेव च।। २६३

कृत्वोत्सवं प्रकुर्वीत राज राष्ट्राभिवृद्धये।

हंसयजनम्

श्रावणे पौर्णमास्यां च वेदारंभण माचरेत्।। २६४

इष्ट्वा तदा हयग्रीवं सायं कुर्या न्महोत्सवम्।
उपोष्य दिवसे तस्मिन् परेद्युः पारणं मतम्।। २६५

दीपावलिः

ब्रह्मन्! आश्वयुजे मासि कृष्णपक्षे कलेस्तिथौ।
अरुणेंदूदये कुर्यात्तैलेनाभ्यंजनं हरेः।। २६६

महानवमी

तस्मि न्मासि सिते पक्षे नवम्यंतं दिने दिने।
लक्ष्म्या देवस्य यजनं सर्वसंपत्प्रदं नृणाम्।। २६७

अंकुरानर्पयित्वादौ स्थंडिले धान्यनिर्मिते।
नवकुंभा न्सकरकान् स्थाप्य मध्ये श्रियं यजेत्।। २६८

प्रतिष्ठावत् तदन्यत्र श्रियमेव हुताशने।
वाहनादीनि वाद्यानि प्रत्यहंपूजयेत् गुरुः।। २६९

नवमेऽहनि सायाह्ने होमं निर्वर्त्य देशिकः।
दशम्या मश्वमारोप्य प्रापयेच्च शमीतरुम्।। २७०

शरासनाद्यायुधानि तत्र निक्षिप्य देशिकः।
पुण्याहवारिभिः प्रोक्ष्य देवपार्श्वे निवेशयेत्।। २७१

अनुज्ञाप्य ततो देवं प्रागादिषु यथाक्रमम्।
विसृज्य बाणानंते तु शमीवृक्षे निपातयेत्।। २७२

तत श्शमीपल्लवै स्तैः देवमभ्यर्च्य देशिकः।
तत् पल्लवं स्वयं धृत्वा दद्यात् भक्तजनं प्रति।। २७३

मंडपे देव मभ्यर्च्य मंदिरांतर्भुवं नयेत्।

दीपोत्सवः

कृत्तिकायां च कार्तिक्ये सायाह्ने दीपमंगळम्।। २७४

संस्कृत्य गार्हपत्याग्निं दीपांस्तस्मात् समानयेत्।
सायंकाले वृषेलग्ने दीपाराधन माचरेत्।। २७५

दीपांश्चैव महादीपान् दीपये दग्नितृप्तये।
निवेद्य पृथुकान् लाजान् देवायोत्सवमाचरेत्।। २७६

विवाहोत्सवः

फाल्गुने मासि फल्गुन्यां तैषसंक्रमणेऽथ वा।
देवीविवाहं कुर्वीत भुक्तिमुक्तिप्रदं नृणाम्।। २७७

मृगाया

संक्रमानंतरदिने तैषे स्यान्मृगयोत्सवः।
मार्गशीर्षादि मासाना मधिपाः केशवादयः।। २७८

मासेशाराधनम्

मासर्क्षे वा तिथौ यद्वा मासेशाराधनं चरेत्।

पंचपर्वादि

एकादश्योः पौर्णमास्यां दर्शे संक्रमणेऽपि च।। २७९

पंचपर्वोत्सवो ब्रह्मन्! सर्वदोषोपशांतिदः।

आग्रेणम्

श्रावणादि त्रिमासेषु शुक्लपक्षे समाचरेत्।। २८०

आग्रेण मुत्सवं ब्रह्मन्! यानमारोप्य तं हरिम्।
केदारदेश मासाद्य प्रोक्ष्य पुण्याहवारिभिः।। २८१

सुलग्ने लवनं कृत्वा गोष्ठागारं समानयेत्।
पलालं तु बहि र्नीत्वा धान्यराशिं प्रकल्पयेत्।। २८२

तत्र श्रियं समावाह्य यथा योग्यं समर्चयेत्।
तत स्तंडुलमानीय देवागारं प्रवेशयेत्।। २८३

कृत्वा गुडान्नं विधिव द्देवाय विनिवेदयेत्।
हुत्वा दद्यात् द्विजातिभ्यो गृह्णीयाच्च स्वयं गुरुः।। २८४

प्लवोत्सवः

पुष्ये मासि तथा पुष्ये देवमभ्यर्च्य देशिकः।
प्लवे देवं समारोप्य नद्यादावुत्सवं चरेत्।। २८५

शयनोत्थानम्

आषाढे शुक्लपक्षस्य द्वादश्या मब्जमंडले।
आराध्य वासुदेवं तं शयने वेदिकोपरि।। २८६

शाययेच्च यथान्यायं देवीभ्यां सह वा विना।
देवस्य यावदुत्थानं चातुराश्रमिणो नराः।। २८७

व्रतं नित्यमनुष्ठेयु श्शयने देव मर्चयेत्।
द्वादश्यां कृत्तिकाशुद्धे उत्तिष्ठोदित्य मंत्रतः।। २८८

उत्थाप्य तं हरिं भक्त्या मंडलार्चन माचरेत्।
हुत्वा हवि र्निवेद्याथ ग्रामे कुर्या न्महोत्सवम्।। २८९

एकादशीद्वादशी

अरुणोदय विद्धायां कुर्या न्नैकादशी व्रतम्।
उपोष्यैकादशीं शुद्ध्यां द्वादश्यां पारणं चरेत्।। २९०

द्वादश्या मुपवासे तु त्रयोदश्यां हि पारणम्।

श्रीकृष्णजयंती

श्रावणे बहुळे पक्षे रोहिण्यां चंद्रदर्शने।। २९१

प्रादुरासीत् स्वयं कृष्ण स्तदा देवं समर्चयेत्।

श्रीरामनवमी

चैत्रे मासि नवम्यां तु शुक्लपक्षे रघूद्वहः।। २९२

बभूव कर्कटे लग्ने तदा तस्यार्चनं मतम्।

श्रीनृसिंहजयंती

वैशाखे तु सिते पक्षे चतुर्दश्यां नृकेसरी।। २९३

प्रदोषकाले संजज्ञे संध्यायां तं समर्चयेत्।
सर्वास्वपि जयंतीषु यजे द्देव मुपोषितः।। २९४

यागांते पारणं कुर्यात् मुक्त्येकनिरतो जनः।
बुभुक्षाणां सकामानां प्रभाते पारणं मतम्।। २९५

उपरागः

निमज्जयेत् समुद्रादौ ग्रहणे चंद्रसूर्ययोः।
स्नपनं वा प्रकुर्वीत यथार्हं कमलासन!।। २९६

धनुर्मासाराधनम्

चापसंक्रम मारभ्य तैषसंक्रमणावधि।
अरुणोदयवेळायां प्रत्यहं मां समर्चयेत्।। २९७

मुद्गान्नं जुहुया दग्नौ तथैव च निवेदनम्।

एकादशी धनुर्मासौ

तन्मास शुद्धैकादश्यां उषस्यभ्यर्च्य मां विधे!।। २९८

उत्तरं द्वार मानीय कवाटोद्घाटनं चरेत्।
सेवंते तत्र ये मर्त्या स्तेषां नास्ति पुनर्जनिः।। २९९

आर्द्रा

तन्मासे च तथार्द्रायां अभिषिक्तं चतुर्मुख! ।
दृष्ट्वा नीराजने काले पुनर्जन्म न विद्यते।। ३००

शिवरात्रिः

माघमासे कृष्णपक्षे चतुर्दश्यां महानिशि।
चतुस्स्थानार्चनं कुर्या दभिषेकपुरस्सरम्।। ३०१

प्रायश्चित्तविधिः

प्रायश्चित्तविधिं वक्ष्ये तच्छृणुष्व यथाविधि।

संप्रोक्षणम्

विच्छिन्नपूजने बिम्बे भूगुप्ते पतितेऽथ वा।। ३०२

दूषिते वर्षवाताद्यैः स्पृष्टे वा कुण्डगोळकैः।
पंचसंस्कार रहितैः वेदविक्रयकारकैः।। ३०३

शैवै र्वैखानसै र्यद्वा प्रतिलोमानुलोमजैः।
आशौचिभि र्वा पापिष्ठै रोगिभी रोदने कृते।। ३०४

स्वेदने चलने यद्वा जनने मरणेऽपि च।
श्वसृगाल खरस्पर्शे वल्मीकादि समुद्भवे।। ३०५

अर्चयित्वांकुरं पूर्वं कुर्या द्वे द्यधिवासनम्।
कुंभेष्वावाह्य चाभ्यर्च्य हुत्वा तत्त्वानि विन्यसेत्।। ३०६

शुभे मुहूर्ते संप्रोक्ष्य यथाविधि समर्चयेत्।

शास्त्रांतर प्रतिष्ठायाम्

शास्त्रांतर प्रतिष्ठायां पूजाभंगो भवेद्यदि।। ३०७

शांतिं हुत्वा यथापूर्वं संप्रोक्ष्यैव समर्चयेत्।

अस्पृश्यस्पर्शे

अज्ञातजाति चंडाल चोरैर्वा वृषळैरपि।। ३०८

दीक्षितैरद्विजै स्त्रीभिः स्पर्शात् प्रोक्षण मुच्यते।

परिवारार्चनभंगे

परिवारार्चने भंगे स्नपनात् शुद्धिरुच्यते।। ३०९

महानसादि स्थानेषु श्वसृगालादि दर्शने।
पुण्याहवारिभिः प्रोक्ष्य शुद्धि र्भवति पद्मज!।। ३१०

अग्नौशांते

अग्नौ शांते मथित्वाग्निं शान्तिं हुत्वा यथापुरम्।
अष्टोत्तरशतं मूलं मंत्रजाप श्चतुर्मुख!।। ३११

क्रिमिकेशादि संस्पृष्टेऽस्पृश्यस्पृष्टे हुताशने।
होमो व्याहृतिभि र्ब्रह्म न्नष्टाविंशति संख्यया।। ३१२

त्रिदशादि प्रतिष्ठायां

त्रिदशादि प्रतिष्ठायां पूजालोपो न दूषणम्।
दीप धूपाग्नि निर्वाणे दक्षिणं श्रवणं स्पृशेत्।। ३१३

गृहार्चायां पूजाभंगे

पूजाभंगे गृहार्चायां भंगकाल हवींषि च।
निवेद्य हरये विप्रान् भोजयेत् कमलासन!।। ३१४

षाण्मासार्चन भंगे तु पुन स्संप्रोक्षणं मतम्।

आतपस्पर्शे

बिंबाना मातपस्पर्शे शुद्ध्यर्थं स्नपनं मतम्।। ३१५

अग्निदाहे

धामादीना मग्निदाहे शांतिं हुत्वा यथापुरम्।
निर्माय प्रोक्षणं कुर्यात् अभंगे शांतिमाचरेत्।। ३१६

छत्रचामरवाद्यानां दाहे शान्तिर्यथा पुरम्।
निर्माय पूर्ववत्कर्म पूर्वसंबन्ध वर्जितम्।। ३१७

वस्त्रदाहे परित्यज्य शान्तिहोमं समाचरेत्।
स्नपनं धारणे विष्णोः कारयेच्छांत्यनंतरम्।। ३१८

अग्निदाहे तु सर्वत्र चैव मेव चतुर्मुख! ।

नित्यादियौगपद्ये तंत्रानुष्ठानम्

नित्यं नैमित्तकं काम्यं त्रिविधं कर्म पद्मज!।। ३१९

तेषां तु यौगपद्ये चेत् कर्मतंत्रेण कारयेत्।

स्नपने बिंबपतने

प्रवृत्ते स्नपने तत्र पतिते कौतुके भुवि।। ३२०

अवस्थाप्य तत स्स्नाप्य शान्तिहोमं समाचरेत्।

उत्सवस्खलने

स्खालित्ये यद्युत्सवस्य शान्तिहोमं समाचरेत्।। ३२१

विना नित्योत्सवं नैव ध्वजपूर्व महोत्सवः।
कुर्याच्चेच्छांतिरन्ते स्यात् चेत् ध्वजस्य विपर्यये।। ३२२

ध्वजांतरं सद्य एव समुत्थाप्य यथापुरम्।
उत्सवं कारयेच्छेषं शान्तिहोम पुरस्सरम्।। ३२३

कुंभादिनष्टे

कुंभमंडलकुंडाग्नि पालिका तोरणादिषु।
नष्टेषु दुष्टस्पृष्टेषु हतेषु पतितेषु वा।। ३२४

पुनरन्य द्यथापूर्वं कृत्वा शान्तिं समाचरेत्।

उत्सवादिस्खालित्ये

उत्सवे ग्रामशैथिल्ये देवस्य स्नपनं चरेत्।। ३२५

मुहूर्तादिक्रमे शान्तिः प्रतिष्ठोत्सव कर्मसु।
स्खालित्ये येन केनापि बलिदानोत्सवादिषु।। ३२६

अतिक्रान्तं पुरा कृत्वा तत्काले कार्यमाचरेत्।

अधिकारिविघ्ने

अधिकारिषु विघ्नेचेत् देशिकादिषु कारणात्।। ३२७

द्विजैरन्यै स्ततः कर्म देशिकानुज्ञया चरेत्।

बिंबे वातादिदुष्टे

वाताद्यै रुत्सवे दुष्टे स्नापये द्यागमंदिरे।। ३२८

तत्त्वन्यासं विनाहोमः स्नाप्याथोत्सवमाचरेत्।

बिंबे पतिते

तथैव पतिते बिंबे न विशेषोऽस्ति कश्चन।। ३२९

पूर्ववद्बिंबदाहेपि शान्तिहोमं समाचरेत्।

बिंबनष्टे

बिंबे चोरादिबिर्नष्टे शक्तिः कर्मार्थकौतुके।। ३३०

समारोप्यान्यबिंबेन शेष मुत्सव माचरेत्।
शान्तिहोमश्च कर्तव्यः यथावत् कमलासन! ।। ३३१

तीर्थोत्सवभंगे

हानिश्चे त्तीर्थयात्रायाः पुन रुत्सवमाचरेत्।

अवरोहणकालः

तीर्थयात्रा दिनादूर्ध्वं कुर्या त्पंचदिनावधि।। ३३२

ध्वजावरोहणं ब्रह्मन्! परतः शान्तिमाचरेत्।

पुष्पयागभंगे

पुष्पयागो यदि निशि शांतये पुष्टये दिवा।। ३३३

पुष्पयागस्य हानिश्चेत् उत्तमस्नपनं चरेत्।

तंत्रेण कौतुकम्

कर्मणां यौगपद्यानां कौतुकं तंत्रतश्चरेत्।। ३३४

अनाचार्य प्रतिष्ठायां पुन स्स्थापनमाचरेत्।
सर्वं ते कथितं ब्रह्मन्! पंचरात्रं यथाविधि।। ३३५

देवेभ्यश्च ऋषिभ्यश्च शास्त्रमेतत् प्रपंचय।
शास्त्रेणानेन ये ये मां यजन्ति चतुरानन! ।। ३३६

मय्येव तेषामावासः शृण्वतां पठतामपि।
नास्तिकाय न दातव्यं नाभक्ताय कदाचन।। ३३७

न देयं ज्ञानहीनाय इत्यादिश्य जगत् प्रभुः।
पश्यतो मे पुरो विप्राः तत्रैवांतरधीयत।। ३३८

इदं पवित्रं पापघ्नं पंचरात्राह्वयं महत्।
युष्माकं पृच्छतामद्य कृपयाह मुपादिशम्।। ३३९

सार्धकोटि प्रमाणं हि शास्त्रं तत्पंचरात्रकम्।
कात्स्र्येन भगवानाह लोकानां हितकाम्यया।। ३४०

सहस्र त्रयसंख्यातं षडुत्तर शतान्वितम्।
शास्त्रं ब्रह्मोपदेशाख्यं संहितासु सुपूजितम्।। ३४१

अनेन सकलं साध्यं नासाध्यं विद्यते क्वचित्।
अनुक्तं ग्राह्यमन्येभ्य अन्यत्रैतन्नियोजयेत्।। ३४२

अभ्यस्य संहितामेनां शुभं प्राप्स्यथ योगिनः।
अभ्यस्तसर्वश्रुतय स्तपसा विजितेंद्रियाः।। ३४३

आराधयध्वं देवेशं स हि सर्वस्वदोहरिः।
पृच्छतो मुनिशार्दूलान् बृहस्पतिमुखान् स्वयम्।। ३४४

पार्श्वरुद्र स्स्वयं ज्येष्ठः प्राहैषी दनुकंपया।। ३४५

इति श्री पांचरात्रे श्री विष्णुतिलके ब्रह्मोपदेशे
उत्सवविधिर्नाम अष्टमोऽध्यायः

श्री विष्णुतिलक संहिता सम्पूर्ण.

सर्वं श्रीकृष्णार्पणमस्तु